मीमांसापरिभाषा ।

श्रीकृष्णयज्वकृता ।



वाराणसीवास्तव्येन विद्याविनोदिना
चौखाम्बा संस्कृतपुस्तकालयाध्यक्षेण
श्रीहरिदासगुप्तेन
स्वीये "विद्याविलास" नाम्नि यन्त्रालये
मुद्रयित्वा प्रकाशिता ।



१९०३ मिते खीस्तशके ।

मीमांसापरिभाषा ।

मू नारायणं वन्दे देवीं त्रिपुरसुन्दरीम् ।
गुरूनाथगनाथांश्च निरन्तरमहं भजे ॥ १ ॥
बालानां शास्त्रसिद्ध्यर्थं लेशबोधाय धीमताम् ।
मीमांसापरिभाषेयं क्रियते कृष्णयज्वना ॥ २ ॥

इह खलु महर्षि-जैमिनिना द्वादशलक्षण्यां पूर्व्वमीमांसायां धर्म्माधर्म्मावेवानुष्ठानोपयोगितया विचारितौ । तत्र वेदबोधितेष्टसाधनताको धर्म्मः । यथा यागादिः ॥ वेदबोधितानिष्टसाधनताकोऽधर्म्मः । यथा कलञ्जभक्षणादिः ॥ तयोश्च वेदः स्मृतिराचारश्च प्रमाणम् । तत्र वेदः स्वतन्त्रप्रमाणम् । तत्र वेदो द्विविधः । मन्त्ररूपो ब्राह्मणरूपश्चेति । तत्र प्रयोगकालीनार्थस्मरणहेतुतया मन्त्राणान्तु प्रयोगइति वक्ष्यते । प्रयोगानुष्ठानं तत्कालीनेत्यर्थः । विधायकं वाक्यं ब्राह्मणम् । ब्राह्मणशेषश्चार्थवादः । तस्य विधेयप्राशस्त्यप्रतीति जनन द्वारा विधिवाक्यैकवाक्यतया प्रामाण्यमिति वक्ष्यते ॥

तच्चानेकविधम्-कर्मोत्पत्तिवाक्यम् । गुणवाक्यम् । फलवाक्यम् । फलाय गुणवाक्यम् । सगुणकर्मोत्पत्तिवाक्यमित्यादिभेदात् ।

तत्र येन वाक्येनेदं कर्म्म कर्त्तव्यमिति बोध्यते तत् कर्मोत्पत्तिवाक्यम यथाग्निहोत्रं जुहोति इति, अत्राग्निहोत्रहोमः कर्त्तव्यतया विधीयते इति कर्मोत्पत्तिवाक्यम ।

विहित कर्म्मणि तदङ्गतया द्रव्यदेवतादिविधायकं वाक्यं गुणवाक्यम् । यथा दध्ना जुहुयादिति गुणवाक्यमिदम । कर्म्माङ्गतया विहितत्वमेव दध्यादेर्गुणत्वम् । अत्र होमस्योद्देश्यत्वं नाम मानान्तरप्राप्तत्वे सति विधेयान्वयितया निर्देश्यत्वम । तस्यैव मानान्तरप्राप्तस्य पुनः कथ्यमानरूपत्वमनुवाद्यत्वम् । दध्यादिगुणान्वयितया प्राधान्यञ्च दध्यादेर्मानान्तराप्राप्तत्वादत्रैव विधेयत्वं होमसाधनत्वाच्च होमापेक्षया गुणत्वम् । पुरुषेणानुष्ठीयमानत्वाच्चोपादेयत्वञ्चेति ।

अत्र मानान्तरप्राप्तत्वं मानान्तरज्ञातत्वम्। अप्राप्तत्वञ्चाज्ञातत्व-मिति बोध्यम्।

उत्पन्नस्य कर्म्मणः फलाकाङ्क्षायां फलसम्बन्धबोधको विधिः फलविधिः। यथाग्निहोत्रं जुहुयात् स्वर्गकाम इति। अत्र यः स्वर्गं कामयते स तत्साधनत्वेनाग्निहोत्रनामकं होमं भावयेत् कुर्यादिति अग्निहोत्रवाक्योत्पन्नस्य कर्म्मणः फलसम्बन्धो बोध्यत इति फलवाक्यमिदम्।

प्राप्तं कर्म्माश्रित्य फलाय गुणविधौ फलाय गुणवाक्यं यथा दध्नेन्द्रियकामस्य जुहुयादिति। अत्राग्निहोत्रवाक्योत्पन्नं होममाश्रित्येन्द्रियफलाय दधिरूपो गुणो विधीयते। होमाश्रितेन दध्ना इन्द्रियरूपं फलं भावयेदिति। होमाश्रितेन होमकारकीभूतेनेत्यर्थः। अयमेव गुणफलविधिः गुणकामविधिरपि चोच्यते।

द्रव्यदेवतादिगुणविशिष्टकर्म्मविधायकं वाक्यं सगुणकर्मोत्पत्तिवाक्यम्। यथा 'सोमेन यजेते'ति। अत्र सोमलताविशिष्टो यागो विधीयते। विशिष्टविधावपि विशेषणस्य अर्थाद्विधिः। क्वचित् कर्मोत्पत्तिवाक्यमेव फलसम्बन्धबोधकमपि भवति। यथा 'उद्भिदा यजेत पशुकाम' इति अत्रोद्भिन्नामको यागो वाक्यान्तराविहित एव पशुकामस्य पशुफलाय विधीयत इत्येकमेवेदं वाक्यं फलसाधनयागकर्म्मविधायकम्। प्रधानविधिरेवाङ्गविधिभिरेक-वाक्यतया महावाक्यतामापन्नः सन् सर्व्वाङ्गविशिष्टप्रधानप्रयोग विधायकत्वात् प्रयोगविधिरुच्यते। यथा अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यत्राग्निहोत्रहोमेन स्वर्गं भावयेदित्यर्थः। प्रतीयते भावयेत् कुर्य्यादिति यावत्। अत्र कथमनेन होमेन स्वर्गं कुर्य्यादिति कथम्भावाकाङ्क्षा जायते यथा कुठारेण द्वैधीभावं कुर्य्यादित्युक्ते भवत्याकाङ्क्षा कथमनेन द्वैधीभावं कुर्य्यादिति। तत्रोद्यमनानिपातनादिसहायेनेति गम्यते तद्वदत्राप्यग्निं प्रणयत्यग्निषु समिधदानोत्पाद्यङ्गविधिविहितप्रणयनसमिदाधानापतनशोधनादिकाङ्गकलपजनितोपकारसहितेनाग्निहोत्रहोमेन स्वर्गं कुर्य्यादिति प्रकरणलिपतेन महावाक्येन स्वर्गाय साङ्गाग्निहोत्रप्रयोगो विधीयत इ ताहशः प्रयोगविधिः। अङ्गजातमेवेत्थम्भाव इतिकर्त्तव्यता चेचोच्यते अत्राग्निहोत्रहोमः प्रधानप्रणयनादिकं सर्व्वम् अङ्गम्।

' आत्मन्यविनाशिनां कर्म्मणां कालान्त

भाविस्वर्गादिफलसाधनत्वानुपपत्ते रिति चेन्नैवम् । विहितनिषिद्धकर्म्मणां तत्तद्वाक्यैस्तत्तत्फलसाधनत्वेऽवगते आशुतरविनाशिनां कर्म्मणां कालान्तरभाविफलसाधनस्योपपत्त्यर्थमन्तरापुण्यपापरूपमपूर्वं कल्पते । ततश्च यागादेरपूर्वद्वारा स्वर्गसाधनत्वं न साक्षात्, तदेव फलापूर्वं तत्करणत्वञ्च प्राचीदिच्याङ्गविशिष्टस्य प्रधानस्य भवति न प्रधानमात्रस्य प्रधानमात्रादेवफलापूर्वजनने फलस्यापि तत एव सिद्धेरङ्गानामानर्थक्यापत्तेः ।

ननु सर्व्वाङ्गविशिष्टस्य प्रधानस्यापूर्वजनकत्वमुक्तम् । आशुतरविनाशिनः प्रधानस्याङ्गसाहित्याभावादिति चेन्न । प्रधानकर्म्मणः स्वरूपेणाङ्गसाहित्याभावेऽपि उत्पत्त्यपूर्वद्वारा साहित्यसम्भवात् । प्रधानस्य सर्वाङ्गसाहित्यसिद्ध्यर्थं प्रधानकर्म्म परमापूर्वयोर्मध्ये प्रधानमात्रजन्यमुत्पत्तिनामकं किञ्चिदपूर्वमस्तीत्यङ्गीकारात् । एवमङ्गानामपि परस्परसाहित्यानामेव प्रधानोपकारकत्वात्तेषां स्वरूपेण साहित्यभावात्, तत्तदुत्पत्त्यपूर्वद्वारा साहित्यं बोध्यम् । अङ्गानां प्रधानोपकारकत्वं नाम प्रधानस्य फलापूर्वजननसामर्थ्योन्मुखीकरणमेव । दर्शपौर्णमासयोस्तु विशेषः । 'यदाग्नेयोष्टाकपालोऽमावस्यायाञ्च पौर्णमास्याञ्चाच्युतो भवती" त्याग्नेय यागो विहितः । ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छदित्यग्नीषोमीय यागो विहितः 'उपांशुयागमन्तरा यजतीति" उपांशुयागः तावब्रूतामग्नीषोमावाज्यस्यैवनावुपांशु पौर्णमास्यां यजन्तीति वाक्यात् पौर्णमास्यां विहितः । एतानि पौर्णमास्यां प्रधानानि । एषामाग्नेयाग्नीषोमीयोपांशुयागानां तत्तद्वाक्यावगत पौर्णमासीकालसम्बन्धं निमित्तीकृत्य 'य एवं विद्वान् पौर्णमासी यजत' इति विद्वद्वाक्ये पौर्णमासीपदेनैकवचनान्तेन समुदायरूपेणानुवादः । तेन वेदे यत्र पौर्णमासीशब्दः तत्र तदाग्नेयादिसमुदायोपस्थितिः । ननु यदाग्नेय इति वाक्ये यागवाचकपदस्याश्रवणात् कथं यागविधायकत्वमिति चेन्नैवम् । अग्निर्देवता अस्य पुरोडाशस्येति अर्थे विहितदेवतातद्धितान्त आग्नेयशब्दः । तस्य पुरोडाशपदसामानाधिकरण्याद्द्रव्यदेवतासम्बन्धोऽवगतः । स यागमन्तरा न सम्भवति द्रव्यदेवतासम्बन्धस्य यागादन्यत्र क्रियायामसम्भवात् । यागक्रियायामेव सम्भवो वाच्यः । देवतोद्देशेन द्रव्यत्यागयागरूपत्वाङ्गीकारात् । अतः श्रुतद्रव्यदेवतासम्बन्धानुमितो यागो यजेतेति कृ-

लिप्तपदेन विधीयते । अग्निदेवत्यपुरोडाशद्रव्यकामावास्यादिका-लकर्त्तव्ययागेनेष्टं भावयेदिति । एवं यत्रयत्र द्रव्यदेवतासम्बन्धमात्रं श्रूयते सौर्य्यञ्चरुन्निर्वपेदित्यादौ तत्र सूर्यदेवतासम्बन्धानुमितो यागो विधीयत इति न कश्चिद्दोषः ।

तनूपांशुयाजवाक्ये यजिश्रवणेऽपि विधिप्रत्ययलिङादेरभावात् कथं विधायकत्वमिति चेन्मैवं यजतीत्यस्य यजेतेति विपरिणामेन विधायकत्वसम्भवात् एवं यत्र लिङादिर्न श्रूयते 'व्रीहीन् प्रोक्षति' 'समिधो यजती'त्यादौ तत्र विपरिणामो बोध्यः । केचित्तु यजती-त्यस्य पञ्चमलकारत्वाङ्गीकारात् विधायकत्वसम्भव इत्याहुः । तथा ऐन्द्रं दध्यमावास्यायां ऐन्द्रं पयोमावस्यायामिति वाक्यविहितं सान्नाय्ययागौ यदाग्नेय इति वाक्यविहिताग्नेयश्चामावास्यायां प्रधानानि । एषां त्रयाणां 'य एवं विद्वानमावास्याञ्च यजते' इति वाक्ये अमावस्यामिति नाम्ना द्वितीयैकवचनान्तेन समुदायरूपेणानुवादः । तेन वेदे यत्र दर्शशब्दोऽमावस्याशब्दो वा श्रूयते यागसमुदायोपस्थितिः । त्रिकस्य त्रिकस्यामावास्यापौर्णमासीभ्यां समुदायरूपेण विद्वद्वाक्येऽनुवादस्य प्रयोजनन्तु दर्शपौर्णमासाभ्यां स्वर्गकामो यजेतेत्यादौ द्विवचनोपपत्तिः । अन्यथा षणामाग्नेयादि यागानां बहुत्वाद्दर्शपौर्णमासैरिति बहुवचनं स्यात् ।

मानान्तरेण प्राप्तार्थस्य पुनः श्रवणमनुवादः । तथा फलवदाग्नेयादिसन्निधावाम्नातानि प्रयाजाज्यभागानुयाज्यादीनि परयागानामङ्गभूतानि । एवं स्थिते 'दर्शपौर्णमासाभ्यां स्वर्गकामो यजेते'त्यस्यायमर्थः—दर्शपौर्णमासाभ्यां समुदायाभ्यां परस्परमिताभ्यां स्वर्गापूर्वं कुर्यादिति । तत्र कथं कालद्वयवर्त्तिनोः समुदाययोः परस्परसाहित्यमित्याकाङ्क्षायां स्वरूपेण साहित्याभावेऽपि त्रिकात्त्रिकादेकैकमपूर्वं जायते । तद्द्वारा द्वयोः समुदाययोः साहित्यमित्युच्यते । एकैकस्य त्रिकस्य त्रिकस्यापि त्रिकापूर्वजनकत्वं कथमित्याकाङ्क्षायां प्रयाजानुयाजादिपूर्वोत्तराङ्गकलाप विशिष्टैकस्य त्रिकस्य समुदायापूर्वजनकत्वमुच्यते । एकैकत्रिकस्य सर्वसाहित्यं स्वरूपेण न सम्भवतीति त्रिभिर्यागैस्त्रीण्युत्पत्त्यपूर्वाणि यते तद्द्वारा सर्वाङ्गसाहित्ये अङ्गानामपि प्रयाजादीनां स्वरूप प्रधानसाहित्याभावात्तदुत्पत्त्यपूर्वद्वारा साहित्यं वाच्यम् ।

प्रदस्ति तदेव प्रधानानामङ्गविशिष्टस्वरूपसाङ्गत्वम् एवञ्च पौर्णमास्यामाग्नेयादिजन्यैस्त्रिभिरपूर्वैः प्रयाजादिजन्योत्पत्त्यपूर्वसचिवैः समुदायापूर्वमेकं जन्यते। तथा दर्शेऽपि आग्नेयैन्द्रद्वययजन्यैस्त्रिभिरपूर्वैरङ्गोत्पत्त्यपूर्वसचिवैरेकं त्रिकापूर्वं जन्यते। ताभ्यान्त्रिकापूर्वाभ्याम आग्नेयाद्युत्पत्त्यपूर्वत्रितयजन्याभ्यां फलजनकीभूतमहापूर्वं फलापूर्वनामकं जन्यते। ततश्च फलमिति। तथा च सर्वाङ्गोपकृताभ्यां दर्शपौर्णमासाभ्यामपूर्वद्वारा स्वर्गं कुर्य्यादिति फलापूर्वनिष्पत्त्यै साङ्गप्रधानकर्त्तव्यताबोधको विधिः प्रयोगविधिरिति सिद्धम्।

पुनरपि त्रिविधः। अपूर्वविधिर्नियमविधिः परिसङ्ख्याविधिश्चेति। तत्र यो विधिरत्यन्ताप्राप्तमर्थं प्रापयति स अपूर्वविधिः, यथा दर्शपौर्णमासप्रकरणे व्रीहीन् प्रोक्षतीति। एतद्विध्यभावे दर्शपौर्णमासीयव्रीहिषु प्रोक्षणं कथमपि न प्राप्नोति। एतद्विधिसत्त्वे तु तत्सम्बन्धिव्रीहिषु प्रोक्षणं प्राप्नोत्येवेत्यत्यन्ताप्राप्तप्रोक्षणप्रापकत्वादयमपूर्वविधिः।

यो विधिः पक्षे प्राप्तमर्थं नियमयति स नियमविधिः तत्रैव व्रीहीनवहन्तीति। एतद्विध्यभावे दर्शपौर्णमासिकेषु व्रीहिषूत्पत्ति–वाक्यावगतपुरोडाशोपयोगि–तण्डुल–निष्पत्त्यनुकूलवैतुष्यकार्य्यायावहननवत् कदाचिन्नखविदलनमपि प्राप्नुयादिति तस्मिन् पक्षेऽवहननस्य प्राप्त्यभावात् कार्य्यान्यथोपपत्तेरवहननस्य पाक्षिकी प्राप्तिः स्यात् सत्यस्मिन् विधौ अवहननेनैव वैतुष्यं कार्य्यमिति नियमे सति विदलनं सर्वात्मना निवर्त्तेत इति नियमविधिरयम्। न च वैतुष्यस्य नखविदलनेनापि सम्भवादवहननियमो व्यर्थः प्रयोजनाभावादिति वाच्यम्। अवघातेनैव वैतुष्यकरणे किञ्चिददृष्टं जन्यते इति नियमादृष्टाङ्गीकारात्। नियमेन दृष्टकार्य्यलाभेऽप्यदृष्टस्योत्पत्तेः। तच्चापूर्वं यागोत्पत्त्यपूर्वद्वाराफलापूर्वे उपयुज्यतेऽनेन नियमापूर्वाभावे फलापूर्वमेव नोत्पद्यत इति कल्पनान्नियमापूर्वस्य न वैयर्थ्यम्। एवं व्रीहिसोमादिनियमविधिषु बोध्यम्।

‘द्वयोः समुच्चित्यप्राप्तावितरनिवृत्तिफलको विधिः परिसङ्ख्याविधिः।’ यथा चयनप्रकरणे।—‘इमामगृह्णन् रशना मृतस्येत्यश्वाभिधानीमादत्त’ इत्यश्वरशनाग्रहणाङ्गत्वेन मन्त्रविधिः। एतद्विध्यभावे हि रसनाग्रहणप्रकाशको मन्त्रो रसनादानप्रकाशनसा-

मर्थ्यरूपाल्लिङ्गादश्वरशनादान इव गर्दभरशनादानेऽपि नियमेन प्राप्नुयात् । सत्यस्मिन् विधौ अनेन मन्त्रेणाश्वरशनामेवाददीत न तु गर्दभरशना सा तु तूष्णीमेव प्राप्नोति गर्दभरशनानां मन्त्रनिवृत्तिर्भवतीति द्वयोः समुच्चित्यप्राप्तावितरनिवृत्तिफलकत्वादयं परिसङ्ख्याविधिः । पूर्वं दर्शपौर्णमासाङ्गत्वं प्रयाजादीनामुक्तम् ।

तत्राङ्गत्वबोधकप्रमाणानि श्रुति–लिङ्ग–वाक्य–प्रकरणस्थानसमाख्या–भेदेन षट् । तत्र दध्ना जुहुयादित्यत्राग्निहोत्रवाक्यप्राप्तं होमं जुहुयादित्यनेनोद्दिश्य तत् करणत्वेन तृतीयया श्रुत्या दधि विधीयत इति श्रुत्या दध्नोऽङ्गत्वम् ।

लिङ्गं नाम सामर्थ्यम् । तच्च द्विविधम् । अर्थगतं शब्दगतञ्चेति । आद्यं यथा स्रुवेणावद्यतीत्यवदानसामान्यशेषत्वावगमेऽपि स्रुवस्य सामर्थ्यरूपाल्लिङ्गादाज्यसान्नाय्यादिद्रवद्रव्यस्यावदानविशेषाङ्गत्वं स्रुवेण पुरोडाशाद्यवदानस्य कर्त्तुमशक्यत्वात् । शब्दगतं तु लिङ्गमर्थप्रकाशनसामर्थ्यम् । यथा अग्नये जुष्टं निर्वपामीति मन्त्रस्य निर्वापप्रकाशनसामर्थ्यरूपात् लिङ्गान्निर्वापाङ्गत्वम् । यस्य मन्त्रस्य यत् प्रकाशनसामर्थ्यं तस्य तदङ्गत्वं पदान्तरसमभिव्याहारो वाक्यम् । यथा इषेत्वेति छिनत्तीति अत्र छेदनाङ्गत्वं इषेत्वेतिमन्त्रवाक्येन विधीयते । यद्वा अग्नये जुष्टमित्यत्रैव अग्नये जुष्टमित्यादिपदानां निर्वपामीत्यनेनैकवाक्यतापन्नत्वान्निर्वपाङ्गत्वम् । प्रकरणं नाम परस्परकाङ्क्षा । यथा दर्शपौर्णमासाभ्यां स्वर्गकामो यजेतेति अत्र दर्शपौर्णमासाभ्यां स्वर्गापूर्वं कुर्य्यादित्युक्ते भवत्याकाङ्क्षा कथमाभ्यां स्वर्गापूर्वं कर्त्तव्यमिति तथा फलवदाग्नेयादिसन्निधौ समिधो यजति तनूनपातं यजति आज्यभागौ यजतीत्यादिभिः प्रयाजादयः फलरहिताः श्रुतास्तेषां स्ववाक्येषु फलाश्रवणात् भवति प्रयोजनाकाङ्क्षा किमेतेषां प्रयोजनमिति ततश्च प्रयोजादीनां प्रयोजनकाङ्क्षायां दर्शपौर्णमासयोः कथम्भावाकाङ्क्षायां परस्पराकाङ्क्षालक्षणेन प्रकरणेन प्रयोजादीनां सर्वेषां दर्शपौर्णमासाङ्गत्वं निश्चीयते ॥

स्थानं नाम सन्निधिः । यथा सान्नाय्यपात्रसन्निधौ शुन्धध्वमिति मन्त्रस्य पाठात् सन्निधानात् सान्नाय्यपात्रप्रोक्षणाङ्गत्वम् ।

समाख्या संज्ञा । यथा अध्वर्युकाण्डप्रतिपादिते कर्म्मजाते आध्वर्यवसमाख्यावशादध्वर्य्योः कर्तृत्वेनाङ्गत्वम् । तथा 'ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः' इत्यादिषु काम्येष्टिसमाख्या

तेषु ऐन्द्राग्नादियागेषु काम्येष्टियाज्यानुवाक्याकाण्डसमाख्याव-शादुभावामिन्द्राग्नी इत्यादीनां याज्यनुवाक्यत्वेन विनियोगः । विनियोगानामङ्गत्वेनान्वयः ।

श्रुत्यादीनामेकत्र समावेशे पूर्वपूर्वस्य प्राबल्यम् उत्तरोत्तरस्य दौर्बल्यम् । यथा 'कदाचनस्तरीरसीत्यैन्द्या गार्हपत्यमुपतिष्ठत इ-त्यग्निहोत्रप्रकरणे श्रूयते तत्र मन्त्रस्य इन्द्रप्रकाशनसामर्थ्यरूपात् लिङ्गादिन्द्रोपस्थानाङ्गत्वे प्राप्ते ऐन्द्येति तृतीयाश्रुत्या गार्हपत्यमिति द्वितीयाश्रुत्या च गार्हपत्योपस्थानाङ्गत्वेन विधिना लैङ्गिक इन्द्रोप-स्थाने विनियोगो बाध्यते श्रुतिर्हि स्वतो विनियोजिका लिङ्गन्त्वि-न्द्रप्रकाशनसामर्थ्यमालोच्य 'ऐन्द्येन्द्रमुपतिष्ठते' इति श्रुतिकल्प-नाद्वारा विनियोजकमिति वाच्यम् । तच्चात्र न सम्भवति । यत्र श्रु-तिर्विनियोगो नास्ति 'अग्नये जुष्टं निर्वपामीत्यादौ तत्र मन्त्रस्य नि-र्वापप्रकाशनसामर्थ्यमालोच्य अनेन मन्त्रेण निर्वापं कुर्य्यादिति श्रुतिकल्पनाद्वारा लिङ्गं विनियोजकं भवत्येव, श्रुतिकल्पनाप्रतिब-न्धकाभावात् । तथा 'स्योनन्ते सदनं करोमि तस्मिन् सीदेत्यत्र तस्मिन्निति तच्छब्दस्य पूर्ववाक्यार्थसापेक्षतया एकवाक्यत्वमाना-द्वाक्यप्रमाणेन द्वयोरेकमन्त्रत्वं भाति लिङ्गेन भिन्नमन्त्रत्वं भाति आद्यस्पन्दनप्रकाशन सामर्थ्यात् । तस्मिन् सीदेत्यस्य सादनप्रकाश-कत्वात् । तत्र वाक्यापेक्षया लिङ्गस्य प्राबल्याद्वाक्यं बाधित्वा लिङ्गेन स्योनन्त इत्यस्य सदनाङ्गत्वं तस्मिन् सीदेत्यस्य सादनाङ्ग-त्वमिति निर्णयः । स्योनन्त इत्यस्य तस्मिन् सीदेत्यनेनैकवाक्यत्व-बलाद्यथाकथञ्चित्सादनसामर्थ्यरूपलिङ्गं कल्पयित्वा अनेन वि-शिष्टमन्त्रेण सादनं कुर्य्यादिति श्रुत्या स्योनन्तः इत्यस्य शीघ्रं सदने विनियोगे सति तेनैव मन्त्रस्य नैराकाङ्क्षाद्वाक्यप्रमाणात् लिङ्गं क-ल्पयित्वा श्रुतिकल्पना प्रतिबध्यते विलम्बितत्वादिति लिङ्गेन वा-क्यस्य बाधः । एवं वाक्येन प्रकरणस्य, प्रकरणात् क्रमस्य क्रमात्स-माख्यायाः बाधो वेदितव्यः । तथा श्रुत्या वाक्यादेरपि बाधः । तदे-वमङ्गताबोधकप्रमाणानि श्रुत्यादीनि निरूपितानि ।

तच्चाङ्गत्वं पारार्थ्यमिति यावत् । परोद्देशेन प्रवृत्तकृतिव्याप्यत्वं पारार्थ्यं प्रयाजादीनां दर्शपौर्णमासोद्देशेन प्रवृत्तपुरुषकृतिव्याप्य-त्वात् लक्षणसङ्गतिः दर्शादेः प्रयाजाद्युद्दिश्य प्रवृत्तकृतिविषयत्वा-भावान्नातिव्याप्तिः । केवलप्रयाजानुद्दिश्य कस्यचिदपि पुरुषस्या-

प्रवृत्तेः । तान्यङ्गानि द्विविधानि । सन्निपत्योपकारकाणि, आरादुपकारकाणीति चेति । यान्यङ्गानि साक्षात्परम्परया वा प्रधानयागशरीरं निष्पाद्य तत् द्वारा तदुत्पत्त्यपूर्व्वोपयोगीनि तानि सन्निपत्योपकारकाणि । यथा व्रीह्यादिद्रव्याणि तत्संयुक्तावहननप्रोक्षणादीनि अग्न्यादिदेवतातत्संयुक्तयाज्यानुवाक्यावचनादीनि च । अत्र प्रोक्षणादेर्व्रीहिगतातिशयद्वारा अवहननादेस्तुषविमोकादिरूपदृष्टद्वारा व्रीह्यादीनां पिण्डद्वारा पुरोडाशनिष्पादकत्वं तद्वारा यागशरीरतदुत्पत्त्यपूर्व्वहेतुश्च याज्यानुवाक्यादेर्देवतासंस्कारद्वारा देवतायाश्च साक्षाद्यागशरीरनिर्वर्त्तकत्वं तद्वारा तदुत्पत्त्यपूर्व्वोपयोगित्वञ्च । यागस्य देवतोद्देशेन द्रव्यत्यागरूपत्वात् । द्रव्यदेवते हि यागस्वरूपमिति सिद्धान्ताच्च । एतान्येव सामवायिकानीत्युच्यन्ते ॥

आत्मसमवेतापूर्व्वजनकान्याराদुपकारकाणि । यथा । प्रयाजाज्यभागानूयाजादीनि । एतानि द्रव्यगतदेवतागतं वा संस्कारं न जनयन्ति । किन्त्वात्मगतमदृष्टं जनयन्तीत्यारादुपकारकाणि । तत्र सामान्यतः कर्म्म द्विविधम् । अर्थ कर्म्म गुणकर्म्म चेति । तत्रात्मगतापूर्व्वजनकं कर्म्मार्थकर्म्म । यथा अग्निहोत्रं दर्शपौर्णमासप्रयाजादिकम् ॥

गुणकर्म्म संस्कारजनकम् । तच्च द्विविधम् । उपयुक्तसंस्कारकम्, उपयोक्ष्यमाणसंस्कारकञ्च । तत्र उपयुक्तसंस्कारकं प्रतिपत्तिकर्म्म । उपयुक्तस्य आकीर्णकरस्य द्रव्यस्य विहितदेशे प्रक्षेपः प्रतिपत्तिरिति लक्षणात् । यथा इड़ाभक्षणकृष्णविषाणप्रासनचतुरवत्तहोमादिकम् नन्विड़ाभक्षणस्य प्रधानयागोपयुक्ताकीर्णकरपुरोड़ाशद्रव्यप्रक्षेपात्मकत्वात् प्रतिपत्तित्वं युक्तम् । होमस्य तु यागोपयुक्तद्रव्यसंस्कारकत्वाभावात् कथं प्रतिपत्तित्वम् । होमस्य यागसमानकालीनत्वेन होमसंस्कार्य्यस्य चतुरवत्तादेरुपयुक्तत्वाभावादिति चेदत्राहुः । उपयुक्तसंस्कारमात्रं प्रतिपत्तिः न तु प्रधानयागोपयुक्तत्वम् । तथा सति पशोर्विशसनानन्तरं वपाहृदयाद्युद्धरणकालकर्त्तव्यहोलोहितशकृन्निरसनस्य प्रतिपत्तित्वाभावप्रसङ्गात् । यागोपयुक्तद्रव्यप्रक्षेपरूपत्वाभावात् । तथा कृष्ण विषाणप्रासनस्यापि प्रतिपत्तित्वं न स्यात् । यागाङ्ग भूतकण्डूयनोपक्तत्वेऽपि यागोपपत्त्याभावात् । अतो यत्र कचनोपयोगमात्रं विवक्षितं यत्र कचिदुपयोगः तत्राप्यस्ति वसाहृदयाद्युद्धरणेनोपयुक्तपशो सम्बन्धिनः

सकृल्लोहितस्याकीर्णे करस्य प्रतिपत्त्यपेक्षत्वात् । एवं यथा कथञ्चिदुपयोगो होमस्थलेऽप्यस्ति ॥

तथाहि, प्रतिपत्तिस्त्रिधा—प्रधानोत्तरकाला, प्रधानसमकाला, प्रधानपूर्व्वकाला चेति । तत्राद्या इडाभक्षणादिका । द्वितीया होमादिका । तथाहि—दर्शपूर्णमासप्रकरणे श्रूयते—'सकृदुपस्तृणाति' 'द्विर्हविषोवद्यति' 'सकृदभिघारयति' 'चतुरवत्तञ्जुहोति ।' तत्र चतुरवत्तवाक्ये होमानुवादेन चतुरवत्तद्रव्यं तत्साधनत्वेन न विधीयते । न च यागहोमयोरभेद इति वाच्यम् । देवतोद्देशे द्रव्यत्यागस्य यागशब्दार्थत्वात् । प्रक्षेपविशिष्टस्य यागस्य होमशब्दार्थत्वात् । तत्राग्नेयचोदनया यागस्य प्राप्तत्वेऽपि प्रक्षेपांशस्य प्राप्तत्वेनानुवादासम्भवात् । किन्तूपस्तरणद्विरवदानाभिघारणवाक्यैः प्राप्तं चतुरवत्तमुद्दिश्य तत्संस्कारत्वेन प्रक्षेपो जुहोतीत्यनेन विधीयते । स च संस्कारः प्रतिपत्तिरूप एव । अग्नये जुष्टमभिघारयामीत्यादि निर्देशैर्यागाङ्गभूताग्न्यादिदेवतार्थतया यथाकथञ्चिदुपयुक्तस्य पुरोडाशस्य प्रतिपत्त्यपेक्षया यद्द्वाच्यदानकर्म्मकप्रक्षेपस्य प्रतिपत्तिकर्म्मत्वौचित्यात् । स च संस्कारः प्रधानसमकालः । होमो हि वषट्कृते जुहोतीति विधानात् । वषट्कारोत्तरक्षणे अध्वर्युकर्त्तव्यः यागोऽपि तस्मिन्नेव क्षणेयागस्य स्मरणार्थत्वे वषट्कारेण स्मारितः सन् यजमानेनानुष्ठेय इति तयोर्योगपद्यसम्भवात् । तदिदं सर्व्वप्रधानाधिकरणवार्त्तिके स्थितम् । प्रधानपूर्व्वकाला प्रतिपत्तिर्यथा—शकृत्संविध्यति लोहितं निरस्यतीति शकृत्संप्रवेधन लोहितनिरसेन । इदमपि पशावनालम्भात् लोहितशकृतोः कर्तृत्वमित्यधिकरणे स्थितम् ॥

उपयोक्ष्यमाणसंस्कारोऽप्यनेकविधिः । साक्षाद्विनियुक्त संस्कारः । साक्षाद्विनियुक्तस्य यदुपकारकं तत्संस्कारः । निवियोक्ष्यमाण संस्कारश्चेति । तत्राद्यो यथा—'वत्समालभेतेति । दोहाङ्गत्वेन साक्षाद् विनियुक्तस्य गोद्रव्यस्योपकारको वत्सस्तत्संस्कारकमिदमालम्भनम् । तृतीयो यथा—'तप्ते पयसि दध्यानयतीति' 'अवत्सा वैश्वदेव्यामामिक्षेति वाक्येन तच्छब्देन निर्दिश्य वैश्वदेवयागाङ्गत्वेन विनियोक्ष्यमाणे यत्पयस्तत्संस्कारकत्वाद्विनियोक्ष्यमाणसंस्कारकं दध्यानयनम् । पशुपुरोडाशयागस्तूपयुक्तोपयोक्ष्यमाणदेवता संस्कारार्थः । त्यागांश अदृष्टार्थश्च अत्र तत्संस्कार्य्याग्निषोमदेवताया वपायागे उपयुक्तार्थत्वात् । हृदयाद्यङ्गयागेषु उपयोक्ष्यमाणत्वाच्च । त्रि-

श्रुक्याग द्रव्यांशे देवतांशे च उपयुक्तसंस्कारार्थः त्यागांशे अदृष्टार्थश्च सूक्तवाक् साधनप्रमाणमपि तथैव । उत्तमप्रयाजो । वक्ष्यमाणदेवता संस्कारत्वात्तदंशे उपयोक्ष्यमाणसंस्कारः इतरांशे अदृष्टार्थः हृदयादिर्हविर्यागात्पूर्व्वं क्रियमाणो वसाहोमोऽपि वसांशे प्रतिपत्तिरितरांशे अदृष्टार्थ इत्याद्युह्यम । केचित्तु उपयोक्ष्य माणसंस्कारभिन्नसंस्कारकर्म्मत्वं प्रतिपत्तिकर्मत्वम । चतुरवत्तद्रव्यस्य होमेन भस्मीभूतस्य होमे उपयोक्ष्यमाणत्वाभावात् तद्भिन्नत्वं होमेऽस्तीति लक्षणसङ्गतिः । अत्रायं विशेषः । अर्थकर्म्मणि द्रव्यापेक्षया कर्म्मणाप्राधान्यम । कर्म्मणि द्रव्यस्य गुणत्वम । यथा अग्निहोत्रादौ दध्यादेर्गुणत्वं, गुणकर्म्मणि द्रव्यस्य प्राधान्यं, द्रव्ये च कर्म्मणो गुणत्वं, व्रीहीन् प्रोक्षति अवहन्तीत्यादौ द्वितीयया व्रीहीणां क्रिया साध्यत्वप्रतीतेः क्रियापेक्षया द्रव्यस्य प्राधान्यं प्रोक्षणादिक्रियायास्तदपेक्षया गुणत्वमिति ॥

पुनरपि गुणकर्म्म चतुर्विधम । उत्पत्याप्तिविकृतिसंस्कृति भेदात् । तत्रोत्पत्तिसंस्कारो यथा अग्नीनादधीतेति—मन्त्रविशेषैः सम्भारेषु निधायितापि आहवनीयादय उत्पद्यन्त इत्याहवनीयाद्युत्पत्तिहेतुभूतसंस्कारजनकत्त्वादाधानस्य उत्पत्तिसंस्कारत्वम । आप्तिसंस्कारो यथा—'स्वाध्यायोऽध्येतव्य इति अध्ययनेन स्वाध्याय आप्यत इत्याप्ति संस्कारोऽयम विकृतिर्यथा—'व्रीहीन् प्रोक्षेत । अत्र प्रोक्षणस्य व्रीहिगतातिशयरूपसंस्कृतिजनकत्वात् संस्कृतिरूपिगुणकर्म्मत्वम । अत्रा धानमध्ययनञ्च स्वतन्त्रं गुणकर्म्म न तु क्रत्वङ्गम । प्रोक्षणादिकं सर्व्वं क्रत्वङ्गम गुणकर्मेति ध्येयम ॥

अर्थकर्म्म त्रिविधम । नित्यनैमित्तिककाम्यभेदात् । तत्र 'यावज्जीवमग्निहोत्रं जुहोति' 'सायं जुहोति" 'प्रातर्जुहोति जीवता पुरुषेण सायं प्रातः कालयोः नियमेन कर्त्तव्यतया अवगतमग्निहोत्रादिकं नित्यम । अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्व्वपेदिति दर्शपूर्णमासातिपत्तिनिमित्तक पथि कृदिष्ट्यादिकं नैमित्तिकम । नित्यनैमित्तिकयोरकरणे प्रत्यवाय एव । कृते फलं नास्तीति केचित् । अन्ये तु दुरितनिवृत्तिः फलमस्ति । नित्यनैमित्तिकैरेव कुर्व्वाणो दुरितक्षयमित्यादिवाक्यैः प्रत्यवायनिवृत्तेः फलत्वेन श्रूयमाणत्वात् । नचैवं तयोरपि काम्यत्वापत्तिः फलवत्त्वादिति वाच्यम् । फलकामनापूर्व्वकानुष्ठानाभावात् । तत्तद्विधिवाक्ये फलकाममुद्दिश्य तद्-

र्थफलसाधनत्वेन विधानाभावाच्च काम्यत्वानुपपत्तेः ॥

काम्यमपि कर्म्म त्रिविधम् । केवलमैहिकफलकम्, आमुष्मिकम् ऐहिकामुष्मिकफलकञ्चेति । तत्राद्यं यथाकारीर्य्यादि । तत्तत्समयवर्त्तिशुष्यत्सस्यसञ्जीवनहेतुवृष्टिकामिना क्रियते । न कालान्तरभाविवृष्टिकामेन जन्मान्तरीयवृष्टिकामेन वा । केवलामुष्मिकफलकं यथा—स्वर्गाद्यर्थदर्शपूर्णमासादिकं स्वर्गस्य इहलोकभोग्यत्वाभावात । ऐहिकामुष्मिकसाधारणफलकं यथा—'वायव्यं श्वेतमालभेत भूतिकाम इति भूत्यादिफलकमित्यत्र विस्तारः । ननु दर्शपूर्णमासादिकर्म्मणां व्रीह्यादिद्रव्याणाञ्च प्रत्यक्षत्वेन लौकिकत्वात । कथं वेदस्यालौकिकार्थ बोधकत्वमिति चेन्न, कर्म्मणां प्रत्यक्षत्वेऽपि तेषां स्वर्गादि फलसाधनतया कर्म्मकर्त्तव्यताबोधकस्य वेदस्यालौकिकार्थ बोधकत्वात् । एवं व्रीह्यादीनां यागादिक्रियासाधनत्वं न प्रत्यक्षवेद्यमिति । तद्बोधकस्यापि वेदवाक्यस्यालौकिकार्थबोधकत्वमिति न दोषः । इदानीं विधिवाक्यस्य विधायकत्वप्रकारः कथ्यते । तत्र स्वर्गकामो यजेतेत्यत्र यजिधातोरुपरितने त—प्रत्यये धर्म्मद्वयमस्ति । आख्यातत्वं लिङ्त्वं चेति । तत्र आख्यातत्वञ्च सर्व्वलकारसाधारणम् । तदवच्छेदेन लिङ्प्रत्ययः पुरुषप्रवृत्तिरूपाम् अर्थभावनां प्रतिपादयति । सा चार्थभावना किं?केन? कथमिति अंशत्रयविशिष्टा । तथाहि यजेतेत्यत्र प्रथमं प्रत्ययेन भावयेदिति प्रतीयते । सुबन्ताभिहितानां सर्व्वेषां कारकाणां तिङन्तार्थक्रियान्वयनियमे सति तिङन्तार्थस्य प्राधान्यात् । तत्र प्रकृत्यर्थापेक्षया प्रत्ययार्थस्य प्राधान्यात् । प्रथम प्रत्ययार्थभावनाय उपस्थितियुक्ता । ततः करोति—समानार्थकं भावयतेः सकर्म्मकत्वात् कम्भावयेदिति कर्म्माकाङ्क्षायां भिन्नपदोपात्तोऽपि स्वर्गो भाव्यत्वेनान्वेति । दुःसाध्यात्मकस्य यागस्य ईप्सिततमस्वरूपकर्म्मत्वायोग्यत्वात् । स्वर्गस्य त्वानन्दात्मकत्वेन ईप्सिततमतया कर्म्म वेनान्वययोग्यत्वात् । ततश्च स्वर्गं भावयेदिति बोधो भवति । ततः केनेति करणाकाङ्क्षायां समान पदोपात्तो यागः करणत्वेनान्वेति । यागेन स्वर्गं कुर्यादिति । ततःकथं यागेन सर्गं कुर्य्यादिति कथम्भावाकाङ्क्षायां अग्न्यन्वाधानावहनादिजन्यद्दष्टोपकारेण प्रयाजादिजातितादर्थ्योपकारेण सहितेन यागेन स्वर्गं कुर्य्यादिति । अग्न्यन्वाधानप्रयाजादिकमङ्गजातमितिकर्त्तव्यतयान्वेति कथम्भावा-

काङ्क्षा पूरकत्वमिति कर्त्तव्यतात्वम् । यथा ओदनकाम पचेदित्यत्र लिङा भावना प्रतीयते । किं भावयेदित्याकाङ्क्षायाम् ओदनोभाव्यत्वेनान्वेति । केनेत्याकाङ्क्षायां पाकेनेति लभ्यते । कथमित्याकाङ्क्षायां तृणफुत्कारसहितेनेति । ततश्च तृणफुत्काराद्युपकृतेन पाकेन तेजः संयोगेन ओदनम्भावयेदिति वाक्यार्थः सम्पद्यते तन्नवेदेऽपि बोध्यः । स एवं लिङ्त्वाव च्छेदेन शब्दभावनां प्रेरणाख्यामभि धत्ते । लोकेऽपि गामानयेदित्याचार्य्यवाक्यश्रवणानन्तरम अयमाचार्योमाङ्गामानयेति प्रेरयतीति प्रेरणाख्यव्यापारं ज्ञात्वैव शिष्यो गवानयने प्रवर्त्तत इत्यन्वयव्यतिरेकाभ्यां प्रेरणाज्ञानं प्रकृतिकारणं प्रेरणाज्ञानस्य चान्वयव्यतिरेकाभ्यां लिङादिश्रवणजन्यत्वावधारणात्, लिङादेः प्रेरणायां शक्तिर्लोके गृह्यते इति वेदेऽपि तथैव शक्तिकल्पनौचित्यात् । इयांस्तु विशेषः–लोके गवानयनादि प्रत्यनुकूलप्रेरणाख्यो व्यापारः प्रयोक्तृपुरुषगताभिप्रायविशेषः, वेदे तु प्रयोक्तृपुरुषाभावात् लिङादि शब्दनिष्ठ एव स इत्यङ्गीक्रियते अतएव शब्दनिष्ठव्यापारत्वाच्छाब्दीभावनेत्युच्यते यागहोमादिविषयप्रवृत्तिहेतुत्वात् प्रवर्त्तना प्रेरणेति चोच्यते ।

सैषा शब्दभावनापि अंशत्रयविशिष्टा—तत्र पुरुष प्रवृत्तिरूपार्थ भावना भाव्यत्वेनान्वेति । अध्ययनावगत लिङादिकं करणत्वे नान्वेति । अर्थवादप्रतिपाद्यप्राशस्त्यज्ञानाना मितिकर्त्तव्यतात्वेनान्वेति । तत्र साङ्गवेदाध्येतारोऽधीतव्याकरणनिगमनिरुक्तादिवशाद् व्युत्पत्तिमन्तः पुरुषा अध्ययनगृहीतस्वाध्यायगतलिङादिभिः प्राशस्त्यज्ञानसचिवैर्यागाद्यर्थस्य कर्त्तव्यत्वेन बुध्वा यागादीननुतिष्ठन्तू इति शाब्दोभावनाबोधः । अनुष्ठानं कुर्युरित्यर्थ अनुष्ठाने प्रवृत्तिः, तेन पुरुषप्रवृत्ती शब्दभावना–भाव्यत्वमक्षतम् । इयञ्च शब्दभावना ज्योतिष्टोमादि प्रातिस्विकयागेषु स्वरूपेण प्रतीयमानापि कर्त्तव्यत्वेन न प्रतीयते । न चात्रार्थभावनाया एव विधेयत्वमिति वाच्यम् । 'स्वाध्यायोऽध्येतव्यः' इति वाक्यस्यार्थभावनाया एव सकलविधिवाक्यस्य शब्दभावनारूपत्वात् । तथाहि—अधिपूर्वकादिङ्ध्ययने इति धातोः कर्म्मणि तव्य त्ययो विहितकर्म्म च स्वाध्याय प्रधानं, तत्संस्कारमध्ययनं गुणकर्म्म । व्रीहिसंस्कारप्रोक्षणादिवत् अध्ययनजनितग्रहणसंस्कारविशिष्टस्वाध्यायस्य प्रयोजनाकाङ्क्षायां स्वाध्यायगतलिङादिविशिष्टवाक्यसामर्थ्यलभ्यं यदनुष्ठानौपयिकयागादिरूपाय-

र्थज्ञानं तदेव इष्टत्वात् तत्कर्म्मानुष्ठानद्वारा स्वर्गादिरूपालौकिकश्रेयः साधनत्वाच्च प्रयोजनं कर्मावबोधं विना कर्म्मानुष्ठानयोगात् न त्वदृष्टं प्रयोजनं, दृष्टफले सम्भवत्यदृष्टफलकल्पनायोगात्। तथाच स्वाध्यायविधिनैव स्वाध्यायगतविधिवाक्यगतलिङादिप्रतिपादिताः सर्व्वाः शब्दभावनाः अंशत्रयविशिष्टाः कर्त्तव्यत्वेन विधीयते। साङ्गवेदाध्ययनव्युत्पन्नाः पुरुषाः अध्ययनगृहीतस्वाध्यायगतलिङादिभिरर्थवादावगतप्राशस्त्यरूपाङ्गसचिवैः फलवद्यागादिकर्त्तृतां बुध्वा यागादौ नानुतिष्ठेयुरिति, अनुतिष्ठेयुः प्रवृत्तिं कुर्युरित्यर्थः। तत्र पुरुषप्रवृत्तेर्भाव्यत्वेनान्वयात्, अध्ययनावगतलिङादेः करणत्वेनान्वयात्, प्राशस्त्यज्ञानस्येतिकर्त्तव्यतात्वेनान्वयात्, शब्दभावनाया अपि अंशत्रयवैशिष्ट्यम्। अर्थभावनाया इव इष्टं तत्र समीहितस्वर्गादिभाव्यकत्वमानमपि विधिवशादेव प्रवर्त्तनायाङ्गविधिः, यागादेः पुरुषार्थसाधनत्वे तत्र पुरुषं प्रवर्तयितुं शक्नोतीति स्वाभाव्यपुरुषप्रतिविषयस्य यागादेः पुरुषाभिलषितस्वर्गादिसाधनत्वमापादयति। अन्यथा स्वप्रवर्त्तनात्वमेव न स्यात्। प्रवृत्तिहेतुव्यापारस्यैव प्रवर्त्तनत्वात्। तङादिस्थले तु प्रवर्त्तनात्मकविधेरभावादर्थभावनायाः पुरुषार्थभाव्यत्वनियमो नास्ति।

भावनात्वं नाम भवितुः प्रयोजकव्यापारत्वम्। तत्रार्थभावनायाम्। भवितुर्जायमानस्य स्वर्गादेः प्रयोजकव्यापारत्वात् लक्षणसङ्गतिः। शब्दभावनायामपि पुरुषप्रवृत्तिरूपस्य भवितुः प्रयोजकव्यापारत्वात् लक्षणसङ्गतिः। ननु 'ज्योतिष्टोमेन स्वर्गकामो यजेदित्यत्र यागेन स्वर्गं भावयेदित्यर्थवर्णने ज्योतिष्टोमपदस्य कथमन्वयः?—इति चेन्न, भावनाकरणत्वेनाभिमतयागनामत्वेनान्वयात्=ज्योतिष्टोमनामकेन यागेनेति। कथं तन्नामत्वमिति चेन्न, ज्योतिराख्यास्त्रिवृदादिस्तोमा अस्मिन् सन्तीति व्युत्पत्त्या यागनामत्वात्। यागस्य त्रिवृदादिस्तोमसम्बन्धः केनावगम्यते? इति चेन्न, त्रिवृत् पञ्चदशः सप्तदशः स्तोमा इति वाक्यान्तरेण एतच्छब्दार्थस्य तत्सम्बन्धावगमात्, एवं शास्त्रोक्तैः मत्प्रख्यादिभिर्हेतुभिस्तत्र नामत्वं बोध्यम्, शास्त्रे हि तत्प्रख्यतद्व्यपदेशयौक्तिकवाक्यभेदैश्चतुर्भिर्नामत्वं प्रतिपादितम्। तथाहि—'अग्निहोत्रं जुहोतीत्यत्र 'अग्निहोत्रशब्देन अग्निदेवतारूपो गुणो न विधीयते। अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोतीति वाक्यविहितेन मन्त्रेण देवतायाः

प्राप्तत्वात्, किन्तु अग्निप्रख्यापकम् अग्निप्रापकं यच्छास्त्रान्तरम् अग्निर्ज्योतिर्ज्योतिरग्निरित्यादिकं तेन प्राप्तमग्निसम्बन्धं निमित्तीकृत्य अग्नये होत्रं होमोऽस्मिन्निति बहुव्रीहिणा अग्निहोत्रपदस्य होमनामधेयत्वम्। ननु च होमस्य वाचित्वाम् अर्थभावनायां करणत्वात् तन्नामत्वे अग्निहोत्रेणेति तृतीया स्यात्। ज्योतिष्टोमेनेतिवदिति वाच्यम्। द्वितीयाया एव लक्षणया करणार्थकत्वात्—'नामधेयं कर्णमिति न्यायेन असाधितस्य करणत्वायोगात्। अर्थात् प्राप्तहोमगत साध्यत्वानुवादकत्वेन वा द्वितीयोपपत्तेरिति तत्प्रख्यन्यायाद् यागनामधेयं न तु यागाङ्गत्वेन श्येनपक्षिरूपगुणविधिः, यथाह वै—'श्येनो निपत्यादत्ते य एवमेवायं द्विषन्तं भ्रातृव्यं शत्रुं निपत्यादत्ते' इत्युपमानोपमेयव्यपदेशानुपपत्तिप्रसङ्गात्, श्येनपक्षी यथा पक्ष्यन्तरं निपत्यादत्ते एवमयमपि श्येननामकः कर्मविशेषो भ्रातृव्यं शत्रुं निपत्यादत्ते इति व्यपदेशः। कर्मनामत्वपक्ष एव युज्यते, यागाङ्गतया श्येनपक्षिविधौ स्वस्य स्वेनैव उपमानोपमेयभावः स्यात्। स चाप्युक्तः; तस्मात् श्येनपदं नामधेयम्। ततश्चाभिचरन् शत्रुवधकामः श्येननामकेन यागेन अभिचारं भावयेदिति वाक्यार्थः।

नन्वेवमप्यभिचारस्यापि वेदोक्तत्वात् आभिचारिके कर्मण्यास्तिकानामपि प्रवृत्तिः स्यादिति चेन्न। वेदोक्तोऽप्यभिचारो वेदविहितो न भवति फलत्वात्। फलं न विधेयं किन्तु फलमुद्दिश्य तत्साधनत्वेन कर्मैव विधेयमिति सिद्धान्तात्। अतोऽभिचारस्याविहितत्वेन प्रत्यवायजनकत्वम्। एवमुद्भिदा यजेत पशुकाम इत्यत्र पशुरूपफलाय विधित्सितस्य यागस्य उद्भिदिति नामधेयं, न तु यथाकथञ्चित् प्राप्तयागमुद्दिश्य तदङ्गतयोद्भिद्रूपगुणविधिर्द्रव्यादिवद् उद्भिन्नामकस्य गुणस्य अप्रसिद्धत्वात्। यागे तूद्भिद्यते फलमनेनेति योगवचनवृत्तिसम्भवात् यागनामत्वम्। ननु उद्भिद्यते भूमिः अनेनेति यौगवशेन खनित्रादावप्युद्भिदः प्रयोगसम्भवात् खनित्रादिगुणविधिः किन्न स्यादिति चेन्न, एतादृशस्थले गुणविधिः क्वापि वक्तुं न शक्यते' विरुद्धत्रिकद्वयसमावेशाख्यदोषप्रसङ्गात्।

तथाहि—'उद्भिदा यजेत पशुकाम इत्यत्र मानान्तरेणाप्राप्तस्य यागस्यानुवादासम्भवात् पशुकर्मकभावनायां करणत्वेन यागो विधेयः यागेन पशून् भावयेदिति' ततश्च यागस्य विधेयत्वं फलं प्रति शेषतयाप्रतीयमानत्वाद् गुणत्वं शेषतया अङ्गतयेत्यर्थः। फल-

सिद्ध्यर्थं पुंसानुष्ठेय तानत्वात् उपादेयत्वमिति विधेयत्वगुणत्वोपा-
देयत्वात्मकमेकं त्रिकम् यागे अस्ति, तथा यागोद्देशेनोद्भिद्गुणवि-
धित्सितगुणापेक्षा प्राधान्यम् उद्देश्यत्वम् अनुवाद्यत्वञ्चेति द्वितीयं त्रि-
कम् तदेतत् त्रिकद्वयपरस्परविरुद्धम् एकस्मिन् यागे प्रसज्येत । अतो
न गुणविधिः । न च सोमेन यजेतेत्यत्र विरुद्धत्रिकादिकम् विनैक-
सोमशब्दस्य सोमयागे लक्षणामङ्गीकृत्य सोमवता यागेनेष्टं भावये-
दिति सोमविशिष्टयागविधानाद् यथा सोमरूपगुणविधिः तद्वदुद्भि-
त्पदस्यापि मत्वर्थलक्षणयाऽत्रोद्भिद्गुणविशिष्टयागविधिः स्यादिति
वाच्यम् । सोमादौ गत्यन्तराभावान्मत्वर्थलक्षणाया विशिष्टविध्य-
ङ्गीकारादुद्भिदादौ नामत्वेनगतिसम्भवाद्विशिष्ट विध्यङ्गीकारायो-
गात् तस्माद्योगवशादुद्भिदादीनां सत्त्वम्: तथा चित्रया यजेत पशु-
काम इत्यत्र चित्रापदं प्राजापत्य नामधेयम् दधिमधुघृतमापोधा-
नास्तण्डुलास्तत्संसृष्टं प्राजापत्यमिति सामानाधिकरण्याद्योदध्यादि-
द्रव्यषट्कस्य प्रजापतिदेवतासम्बन्धः श्रुतः तेनानुमितो यागो वि-
धीयते । विहितस्य यागस्य फलाकाङ्क्षायां 'चित्रया यजेतेति वाक्यं
फलसम्बन्धविधायकं तत्र फलार्थत्वेन पुनर्विधिरिति तस्य प्राजा-
पत्ययागस्य दध्यादिविचित्रद्रव्यकत्वात् चित्रापदम् नामधेयम्, न-
त्वग्नीषोमीय पशुमालभेतेतिवाक्यप्राप्तं पशुयागं यजेतेत्यनूद्य
चित्रत्वस्त्रीत्वगुणद्वयविधानम् मानान्तरप्राप्तकर्मोद्दिश्य तत्रानेक-
गुणविधाने वाक्यभेदात् । तदुक्तम् 'प्राप्ते कर्मणि नानेको विधातुं
शक्यते गुणः' इति, मानान्तरप्राप्तकर्मत्वेनैकदेवताष्टाकपालपुरोडा-
शमात्रस्यापौर्णमास्याद्यनेकगुणविशिष्टो द्रव्यदेवतासम्बन्धेनानु-
मितो यागो विधीयते इति सिद्धान्तात् । तदुक्तम् 'अप्राप्ते तु वि-
धीयन्ते बहवोऽप्येकयत्नतः' इति ।

अथ यथा पशुना यजेतेत्यत्र मानान्तरप्राप्तयागमुद्दिश्यतया प-
शुनेत्येकपदोपात्तानां पशुद्रव्यतद्गतलिङ्गसङ्ख्यादीनां त्रयाणां वा-
क्यभेदं विनैव विधिरङ्गीकृतः तद्वदत्राप्येक पदोपात्तचित्रात्वस्त्री-
त्वविशेषितपशुद्रव्यकारकस्य विधानान्न वाक्यभेदः अतएव तत्र
विधेयस्य पशोरुपादेयत्वात् तद्गतमेकत्वं यज्ञाङ्गतया विवक्षितमि-
त्येकेनैव पशुना यष्टव्यम् । 'ग्रहं सम्मार्ष्टीत्यत्र उद्देश्य गतत्वादेक-
त्वमविवक्षितमिति सिद्धान्तप्रवादःकथम् ? ग्रहं सम्मार्ष्टीत्यत्र ग्रह-
मिति द्वितीयया ग्रहस्येप्सिततमत्वेनोद्देश्यत्वात् प्रयोजनवत्त्वाच्च

प्राधान्यं गम्यते। संमार्गस्तु ग्रहं प्रति गुणभूतः 'प्रतिप्रधानं गुण आवर्त्तनीय' इति न्यायाद् यावन्तो ग्रहास्तेषां सर्वेषां संमार्ग इति निश्चये सति, कति ग्रहाः सम्मार्जनीयाः इति बुभुत्साया अभावा-दुद्देश्यगतमेकत्वं श्रूयमाणमप्यविवक्षितम् यदुच्यते नेदमुद्देश्यगतं किन्तु स्वयं विधेयं, ग्रहं संमृज्यात् तच्चैकमिति तथा सति वाक्या-र्थभेदाद्वाक्यभेदः स्यात्। तथा बुभुत्साया अभावात् विधित्साया-गाश्चोद्देश्यगता सङ्ख्या न विवक्षिता, उद्देश्यगतमपि विशेषणं कि-ञ्चिद्विवक्षितं' यस्य विशेषणस्य विवक्षां विना उद्देश्यप्रतीतिर्न पर्य-वस्यति यथा तत्रैव ग्रहत्वं विवक्षितं तद्विवक्षां विना उद्देश्यस्वरू-पस्य ज्ञातुमशक्यत्वात्। तेन ग्रहजातीयसाधनसोमयागापूर्वार्थ-त्वाच्चमसेषु न समार्गइति स्थितम्। 'पशुना यजेत'त्यत्र यागम् प्रति पशुर्विधेयत्वाद् गुणभूतः, प्रतिगुणं प्रधानावृत्तिर्नास्तीति कियता पशुना यागः कर्त्तव्य ? इत्याकाङ्क्षायाम् एकवचनेन प्रतीयमानं विधेयगतमेकत्वं विवक्षितम्, बुभुत्सितत्वात्। किञ्च लिङ्गसङ्ख्या-विशेषितस्य पशुद्रव्यरूपकारकस्य एकपदोपात्तस्य विधेयत्वाद्विधे-यपशुद्वारा तद्गतलिङ्ग सङ्ख्यादेरपि त्रिपदोपात्तस्य विधेयत्वाद्वि-धेयपशुद्वारा एतद्गतलिङ्गसङ्ख्यादेरपि क्रियाङ्गत्वादेकत्वम् विव-क्षितम् अथवा तृतीयया विभक्त्याभिहितया करणकारकशक्त्या-त्मसात्कृतयाः प्रातिपदिकार्थे पशुद्रव्येण सम्बन्धमनादृत्य तद्वदेव साक्षात् क्रियाङ्गत्वेन विधाने सति पश्चादरुणैकहायनीन्यायेन प-रस्परमन्वयः। यागाङ्गत्वेनाभिहितो पशुः स एकः पुमांश्चेति। यथा—'अरुणया पिङ्गाक्ष्या एकहायन्या गवा सोमं क्रीणाति'त्यत्र कारकाणां क्रियान्वयनियमात् करणविभक्त्याभिरारुण्यपिङ्गाक्ष्यैत्या-दीनां चतुर्णां परस्परमनन्वितानामेव सोमक्रयणाङ्गत्वेन अन्वये सति अरुण्यादेर्गुणस्यामूर्त्तस्य सतः क्रियासाधनत्वायोगात् क्रि-यासाधनैकहायनीगोपरिच्छेदकत्वेन पश्चात् परस्परं पार्ष्णिकान्व-यः। या एकहायनी गौः सा पिङ्गाक्षी अरुणेति। तद्वत् तदेवमुद्देश्य-गतविशेषणमविवक्षितम्, उपादेयगतं विवक्षितमिति स्थितम्। ए-वञ्च चित्रापदेन चित्रा—स्त्रीत्वोभयविशेषितपशुकारकस्य यजेतेति, यदानुदितेऽग्नीषोमीयपशुयागे विधातुं शक्यत्वात् कथं नामत्व-मिति चेन्न, तथा सति प्रकृतस्य प्राजापत्ययागस्य फलसम्बन्धा-काङ्क्षस्य हायनमप्रकृताग्नीषोमीययागस्य कल्पना च न स्यात्।

तत् द्वयमयुक्तम्। तस्माच्चित्रापदं कर्म्मनामधेयम्, एवं तत्प्रख्यादिभिरन्यतरेण सर्वकर्म्मनामत्वमूह्यम्॥

इत्थं विधिवाक्यस्य प्रामाण्यं विचारितम्।

अथ अर्थ वादविचारः।

अर्थवादानान्तु स्वार्थपरत्वे प्रयोजनाभावादध्ययनविधिवशेन फलवदर्थज्ञानार्थत्वस्यावश्यकत्वाद्विधेयगतप्राशस्त्यप्रतिपादनद्वारा विधिवाक्यतया प्रामाण्यम्। स चतुर्विधः—निन्दाप्रशंसा-परकृति-पुराकल्पभेदात्।

तत्र निन्दार्थवादो यथा—'अमेध्यं वा एतद् यदच्छन्दोमम् अमृतं हि रजतं यो बर्हिषि ददाति पुरास्य सम्वत्सराद् गृहे रुदन्ति।'

प्रशंसा यथा—'शोभतेऽस्य मुखं य एवं वेद वायुर्वै क्षेपिष्ठेत्येवमादि।

परेणदं महता पुरुषेण कर्म्म कृतमिति प्रतिपादकोऽर्थवादः परकृतिः, यथा—'अग्निर्वा अकामयतेत्यादि।

परम्परकृतं कार्य्यादिप्रतिपादकः पुराकल्पः यथा—तम शतपद् धिया विद्यात्वा च ध्यायुरित्यादि।

तत्र, निन्दार्थवादस्य विधेयात्मनिन्दाद्वाराविधेयप्राशस्त्यपरत्वम् अमृतमित्यादिरजतनिन्दाद्वाराय विधेयभूतरजतदाननिषेधप्राशस्त्यपरत्वे विरोधाभावात् इतरेषां त्रयाणां साक्षात् प्राशस्त्यपरत्वमेव। वायुर्वा इत्यर्थवादस्यवायुः क्षिप्रगामित्वादतीव प्रशस्तदेवता, अतस्तद्दैवत्यं कर्म्म प्राशस्त्यमिति विधेयदेवतावगतप्राशस्त्यप्रतिपादनद्वारा विध्येकवाक्यत्वम्। अग्निर्वा अकामयतेत्यस्य अग्निदेवत्या यागः पूर्वकाले अग्निना कृतत्वात् प्रशस्तः आधिक्यत्वादिदानीमपि अन्यैर्यजमानैरवश्यं कर्त्तव्यमिति विधेय कर्म्मगतप्राशस्त्यद्वारं विध्येकवाक्यत्वम्। एवमन्यत्राप्यूह्यम्। क्वचित् कार्य्यान्तरमप्यस्ति, यथा—'अक्ताः शर्करा उपदधातीति' विधावक्ता इतिपदेन द्रवद्रव्यसामान्यं प्रतीयते तच्च द्रव्यं किमिति सन्देहे 'तेजो वै घृतमित्यर्थवादात् मन्त्राणामध्ययनविधिना कृत्स्नस्वाध्यायस्य फलवदर्थज्ञानार्थत्वमेव नत्वदृष्टार्थत्वं दृष्टे सम्भवत्यदृष्टकल्पनायोगात्; प्रयोगकाले कर्म्मज्ञानं विना कर्म्मानुष्ठानायोगात् कर्मोपयिकमर्थज्ञानं मन्त्रैः क्रियते। न चोपदेष्टृवचनादनाप्य-

र्थस्मरणसम्भवादनुष्ठानोपपत्तिरिति वाच्यम । मन्त्रैरेवार्थं स्मृत्वानुष्ठाने सति फलं भवति नान्यथेति नियमाभ्युपगमाङ्गीकारात । नियमेनादृष्टस्याङ्गीकारात् तदभावे तज्जन्यादृष्टलोपे तन्मूलं न सिध्यतीति कल्पनात् ।

नन्वेवं मन्त्राणां स्वस्वप्रकाश्येऽर्थे विनियोग इति फलितं विनियोगो नाम शेषत्वे नान्वयः शेषत्वेनाभाङ्गत्वे; ततश्च 'इमामगृभ्णन् रशनामिति मन्त्रस्य रशनाग्रहणसामर्थ्यमस्तीति रशनाग्रहणप्रकाशनसामर्थ्यरूपात् लिङ्गादेव रशनाग्रहणाङ्गत्वोपपत्तेः 'इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते' इति वचनं किमर्थमिति ? चेत्—न, परिसङ्ख्यार्थत्वात । चयनप्रकरणे अश्वरशनाग्रहणं गर्दभरशनाग्रहणञ्चेति द्वयमस्ति, तत्र लिङ्गादश्वरशनायां मन्त्रप्राप्तावुच्यमानायां लिङ्गाविशेषाद्गर्दभरशनायामपि मन्त्रः, अतो अश्वरशनायामेव मन्त्रः कार्यः न गर्दभरशनायामिति मन्त्रनिवृत्तिरूपपरिसङ्ख्यार्थोऽयं विधिः ।

सा च परिसङ्ख्या त्रिदोषा स्वार्थत्याग—परार्थस्वीकार—प्राप्तबाधश्चेति । तत्राश्वाभिधानीमादत्त इति वाक्यस्य अनेन मन्त्रेणाश्वरशनादानं कुर्यादिति स्वार्थः, स च त्यक्तः । गर्दभरशनातो मन्त्रनिवृत्तिः परार्थः, स च स्वीकृतः । गर्दभरशनायामपि लिङ्गात प्राप्तस्य मन्त्रस्य अनेन बाधश्चेति त्रिदोषा परिसङ्ख्या गत्यभावादङ्गीकृता गत्यन्तरे सति सा न युक्ता ।

एवमष्टदोषदुष्टविकल्पोऽप्यगतिकोऽङ्गीकृतः । यथा यदाग्नेयोऽष्टाकपालः संस्कृतः पुरोडाशो यागाङ्गत्वेनावगतः । तत्रापूर्वविशेषस्य पुरोडाशप्रकृतिद्रव्याकाङ्क्षायाम् अनियमेन यस्य कस्य चिद्द्रव्यस्य प्राप्तौ 'व्रीहिभिर्यजेतेति वाक्यात् व्रीहयो नियम्यन्ते, एवं 'यवैर्यजेतेतिवाक्याद्यवा अपि नियम्यन्ते । तयोरेकार्थत्वाद्विकल्पः । एवम् 'अतिरात्रे षोडशिनं गृह्णातीति प्रतिषेधात् ग्रहणाभावो विहितः,, तयोर्ग्रहणाग्रहणयोः परस्परविरुद्धयोः एकस्मिन् प्रयोगे अनुष्ठातुमशक्यत्वात् क्वचित् प्रयोगे ग्रहणानुष्ठाने प्रयोगान्तरे तदभावानुष्ठानमिति तत्रापि विकल्पः ।

स चाष्टदोषदुष्टः । तथाहि, पूर्वं—व्रीहिप्रयोगे यवशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणप्रामाण्यपरित्यागः, अननुष्ठापकत्वलक्षणाप्रामाण्यस्वीकारः, ततो द्वितीयप्रयोगे यवानुष्ठाने पूर्वं त्यक्तं यत् प्रामाण्यं

तत्स्वीकारः, स्वीकृतं यत्प्रामाण्यं तत्परित्यागश्चेति यवशास्त्रे चत्वारो दोषाः । एवं पूर्व्वं, यवप्रयोगे व्रीहिशास्त्रं स्वस्वार्थानुष्ठापकत्वलक्षणं तत्परित्यागः, अननुष्ठापकत्वलक्षणं यदप्रामाण्यं तत्स्वीकारः, पुनर्द्वितीयप्रयोगे व्रीह्यनुष्ठाने व्रीहिशास्त्रस्य त्यक्तप्रामाण्यस्वीकारः, स्वीकृताप्रामाण्यपरित्यागश्चेति व्रीहिशास्त्रे चत्वारो दोषाः । इत्यष्टदोषदुष्टो विकल्पः ।

क्वचिदेकार्थत्वादेककार्यकारित्वादित्यर्थः, यथा व्रीह्यादौ, तत्र व्रीहियवयोरेकस्य पुरोडाशनिष्पादनक्षमत्वाद्विकल्पः । क्वचित् वचनबलात्, यथा 'बृहत्पृष्ठं भवतीति बृहत्सामसाध्यं पृष्ठनामकं स्तोत्रं विहितं 'रथन्तरपृष्ठं भवतीति रथन्तरसामसाध्यं पृष्ठस्तोत्रान्तरं विधीयते । स्तोत्रं प्रयाजादिवददृष्टार्थत्वादर्थकर्म्मसामानुसंस्कारकर्मत्वाद्गुणकर्म 'स्तोत्रसाधनीभूतस्तोत्रियाक्षराभिव्यक्तिरूपसंस्कारद्वारा साम्नां स्तोत्रसाधनत्वाङ्गीकारात्' 'प्रगीतमन्त्रसाध्यामिन्द्रादिगुणिनिष्ठगुणाभिधानं, स्तोत्रं—प्रगीतमन्त्रसाध्यं सामाभिव्यक्तऋगक्षरसाध्यमित्यर्थः । 'अप्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं, शस्त्रं—गानक्रियाविशेषः साम, स्तोत्रसाधनीभूतस्तृचः स्तोत्रीयाः' तत्स्तोत्रतृचस्थाक्षरशस्त्रादिसङ्ख्याविशेषः स्तोमः—इत्येषां भेदः । तथाच-बृहद्रथन्तरपृष्ठयोः भिन्नापूर्व्वार्थत्वेन एकार्थत्वाभावेऽपि 'बृहद्वा पृष्ठं कार्य्यं रथन्तरं वा पृष्ठं कार्य्यमिति वचनबलादेव विकल्पः । क्वचित् व्यवस्थितविकल्पः, द्वितीयप्रयाजादिकर्म्मणि,—नाराशंसतनूनपात् मन्त्रयोः एकार्थत्वाद्विकल्पः, स च राजन्यवशिष्ठानां नाराशंसः द्वितीयप्रयाजस्तनूनपादन्येषामिति वाक्यात् व्यवस्थित इति व्यवस्थितविकल्पः ।

तदेवं चोदनापरपर्य्यायाणां विधिवाक्यानाम् अंशत्रयविशिष्टभावना विधायकत्वात् प्रामाण्यम् । उद्भिदादीनां नामतयाऽर्थवादानां विधेयप्राशस्त्यपरतया मन्त्राणामनुष्ठेयार्थस्मारकतया प्रामाण्यमिति कृत्स्नस्य वेदस्यालौकिके धर्म्माऽधर्म्माख्ये प्रामाण्यं स्थितम् ।

स्मृतयोऽपि मन्वादिप्रणीता वेदमूलकत्वात्स्यादिष्टकादौ धर्म्मे प्रामाण्यम् । 'औदुम्बरी सर्व्वा वेष्टयितव्येतिरप्रमाणम्' 'औदुम्बरीं स्पृशन् गायेदिति प्रत्यक्षश्रुतिविरुद्धत्वात् । सर्व्ववेष्टने सति श्रुत्युक्तस्पर्शनस्य कर्त्तुमशक्यत्वात् ।

तथा शिष्टाचारोऽपि स्मृतिद्वाराश्रुतिमूलकत्वात् प्रामाण्यम् । मातुलसुता परिणयनादिशिष्टाचारस्त्वप्रमाणं 'मातुलस्य सुतामुद्वेत्यादिस्मृत्या निषिद्धत्वेन स्मृतिविरुद्धत्वात् । तदेवं श्रुतिस्मृत्याचाराणां धर्म्माधर्म्मयोः प्रामाण्यमुक्तम् । सच धर्म्मः परस्परं भिन्नः । भेदकप्रमाणानि तु शब्दान्तरादीनि । तथाहि—यागदानहोमानां यजतिददातिजुहोतीत्यपर्यायशब्दप्रतिपाद्यत्वाच्छब्दान्तराद्भेदः । स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादानम् । समिधोयजतीत्यादीनां पञ्चानां वाक्यानां मध्ये एकस्य कर्मविधायकत्वमन्येषां तस्मिन् कर्म्मणि गुणविधायकत्वमित्यत्र नियामकाभावात्सर्वेषां सर्वविधायकत्वे स्थिते विहितस्य कर्म्मणः पुनर्विधानं व्यर्थमिति पुनर्विधानसामर्थ्यात् पूर्ववाक्यविहितकर्मापेक्षयोत्तरोत्तरवाक्यविहितस्य कर्म्मणो भेदः सिध्यतीत्येतादृशस्थलेष्वविशेषम् पुनःश्रुतिरूपाद्यजतिपदाभ्यासात् कर्मभेदः । तिस्र आहुतीर्जुहोतीत्यत्र जुहोतिपदाभ्यासाभावेऽपि जुहोतीत्यर्थे होमे त्रित्वसङ्ख्यान्वयात्परस्परभिन्नास्त्रयो होमा इति सङ्ख्यायात्र कर्मभेदः । अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेति ज्योतिष्टोमप्रकरणे श्रुतानामपि ज्योतिराख्यानां यागानां ज्योतिष्टोमापेक्षया भेदः ।—भिन्नसंज्ञावशादेव त्रयाणां परस्परं भेद इति सञ्ज्ञया कर्म्मभेदः । तथा तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्योवाजिन मित्यत्र सा वैश्वदेवीति वाक्ये विश्वे देवा देवतामिक्षाद्रव्यसम्बन्धानुमितो यागो विधीयते, वाजिनमित्यत्रापि वाजिदेवत्य-वाजिनद्रव्य-कर्मान्तरं विधीयते। ननु पूर्वविहिते वैश्वदेवयागे वाजिन-द्रव्यरूपगुणो विधीयते पूर्वयागस्यामिक्षागुणावरुद्धत्वेन तत्र वाजिनस्य विशेषायोगात् । न च व्रीहियववद्विकल्पः । वाजिनामिक्षयोः समशिष्टत्वाभावात् । विषमशिष्टयोर्विकल्पायोगात् वैश्वदेवयागोत्पत्तिवाक्य एवामिक्षागुणः शिष्यत इति उत्पत्तिशिष्टो विधीयत इत्यर्थः ; वैश्वदेववाक्यादुत्पन्ने कर्म्मणि वाक्यान्तरेण शिष्टो विहितो वाजिनगुण उत्पन्नशिष्ट, तयोर्मध्ये ह्युत्पत्तिशिष्टः प्रबलः, कर्मोत्पत्तिवेलायामेव कर्माङ्गत्वेन प्रमितत्वात्, उत्पन्नशिष्टो वाजिनगुणो अनन्तरः प्रमितोऽपि विलम्बितत्वेन दुर्लभत्वात् तत्पूर्वकर्म्मणि निवेशमलभमानो वाजिरूपदेवतान्तरसम्बन्धात् स्ववाक्यस्य कर्मान्तरविधायकत्वमानयतीति गुणात् भेदः । " तत् घनी-

भूतं पय आमिक्षा [illegible] शिष्टं जलं वाजिनम् ।—तथा कुण्डपायिना-मयने श्रूयते 'उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोतीति, अत्र पूर्वं कर्म किञ्चिदपि सन्निहितं न भवति अपूर्वकर्मसन्निधानरूपात् प्रकरणान्तरात् प्रसिद्धाग्निहोत्रधर्म्मकं तन्नामकं कर्मान्तरं विधीयते ।—तत्राग्निहोत्रशब्देन प्रसिद्धाग्निहोत्रमनूद्यगुणविधिः प्राप्तं कर्मणि मासतन्त्रयमास रूपानेकगुणविधौ वाक्यभेदापत्तेरिति प्रकरणान्तरात् तत्कर्मभेदः —प्रसिद्धाग्निहोत्रं नैयमिकाग्निहोत्रं नित्याग्निहोत्रमिति गीयते । तदेवं शब्दान्तराभ्यास सङ्ख्या-संज्ञागुणनामधेय-प्रकरणान्तरैः कर्मभेदो दर्शितः ।

तत्र यागादिरूपमपूर्वोत्पत्तिः [illegible] क्रत्वर्थः फलं तत्करणाश्च पुरुषार्थः, यथा ज्योतिष्टोमादि स्वर्गादयश्च । दध्यादि तूभयरूपं दध्ना जुहुयादिति क्रत्वाससृक्तवाक्येन क्रत्वर्थत्वात् यथा दध्नेन्द्रियकामस्य जुहुयादित्यनेन फलाय विधानात् पुरुषार्थत्वात् । तदुक्तम्— 'एकस्य तूभयत्वे संयोगपृथक्त्वम्' [illegible] पृथक् भेदः । एकस्य उभयार्थत्वे नियामक इत्यर्थः [illegible] क्रत्वर्थः प्रयाजादौ क्रतु [illegible] रक: पुरुषार्थं फलं प्रयोजकं प्रयोजकत्वं नामानुष्ठापकत्वमपि [illegible] यदर्थं यदनुष्ठापयति स प्रयोजकः । दर्शादिविधि [illegible] दिकमनुष्ठापयतीति स्वर्गादि दर्शादौ प्रयोजक [illegible] :
प्रयोजन दर्शादयम अनुष्ठापयतीति दर्शादि [illegible] क:
दध्यानयनविधि दध्यानयनमामिक्षार्थमनुष्ठा [illegible] र्थम्,
आमिक्षार्थदध्यानयनानुष्ठाने सति वाजिनस्य [illegible] त, अत
आमिक्षैव दध्यानयने प्रयोजिका न वाजि [illegible] पालेन तु-
षानुपवपतीति तुषोपवापाङ्गत्वेन पुरोड [illegible] त,—तथापि
तुषोपवापे कपालस्य प्रयोजको न [illegible] र्थमुपात्तेनैव
कपालेन तुषोपवापसिद्धः [illegible] किन्तु [illegible] कपालस्य प्रयोजक इत्याद्यूह्यम् ।

ननु विधिना साङ्गप्रधान [illegible] च्यते । तत्राङ्गानां प्रधानानां कर्म्मणां बहुत्वात् [illegible] च्यम् । तत् क्रमनियामकं प्रमाणं किमिति ? चेत् [illegible], [illegible] मेव क्रमनियामकत्वात् । तथाहि—अध्वर्युर्गृहपतिन्दीक्षयित्वा [illegible] ह्माणं दीक्षयतीत्यत्र श्रुत्या गृहपतिदीक्षानन्तरं ब्रह्मदीक्षेति श्रौतक्रमः । समिधो यजति तनूनपातं यजतीत्यादौ विधिवाक्यपाठक्रमे देवसमीपादि यागानुष्ठानक्रमः,

अग्निहोत्रं जुहोति यवागूम्पचतीत्यत्र यवागूपाकस्य होमार्थत्वेन पाकात् पूर्वं होमं कर्त्तुमशक्यत्वात् क्रमं त्यक्त्वा अर्थक्रमः स्वीकर्त्तव्यः । अर्थःप्रयोजकं होमरूप तदर्थं क्रमः अर्थक्रमः । तेन पूर्वं पाक पश्चाद्धोमः । तथा सप्तदश प्राजापत्यान् पशूना लभत इत्यत्र सप्तदशपशुद्रव्यकप्रजापतिदेवताकाः सप्तदश यागा कर्त्तव्यत्वेन बोधिताः । तत्रोपाकरणाख्यः आद्यः पदार्थः । यतः कुतश्चिदारभ्य यत्र क च समापनीयः नियोजनादिकन्तु येन क्रमेण उपाकरणं प्रवृत्तं तेनैव क्रमेण कर्त्तव्यम । कथं प्रकृतावग्नीषोमीयपशोरेकत्वेन उपाकरणमादौ कृत्वा द्वितीयक्षण एव प्रोक्षणं व्यवधानप्रयोजकाभावात् । अत्र तु सप्तदशपशूनां महानुप्रयत्ववचनात प्रथमतो यत्र कस्मिनपशौ कृतमुपाकरणं स्वाश्रयकर्त्तव्यनियोजनाय षोडशभि क्षणा व्यवधाने सह तेन त्वधिकं तत्रोपकरणक्रमेण नियोजन प्रथमपशावकृत्वा पश्वन्तरे [illegible] जनं कृत्वानन्तरं प्रथमपशौ नियोजनकरणे षोडशक्षण [illegible] वधानं शास्त्राननुमतमापद्येत । तस्मिन्नारम्भो योपाकरणा [illegible] त्तं तेनैव नियोजनादिक कार्य्यमिति प्रकृतिक्रम । [illegible] औपवसथ्य महरारभ्य क्रमेणानुष्ठेयानाम अग्नि [illegible] पशूनां त्रयाणां साध्यस्कान्त्य सोमयाग [illegible] दानुष्ठानलक्षणं साहित्य बाधितं तदा सव [illegible] तत्र प्राक कृतकर्म परित्यज्य सवनीयस्य स्था [illegible] सवनीय पशोरुपाकरणं ततोऽग्नीषोमीयस्य [illegible] थानात् क्रमः । श्रुत्यादिवशात् पूर्वमहरौ [illegible] धर्माणां शाखाच्छेदादीनां पूर्वमनिय [illegible] नन्तरं प्रवृत्तावपि मुख्ययोराग्नेय सा [illegible] पूर्वमनुष्ठानम्मुख्ययागक्रमेणादावा [illegible] रणं ततः पयसोऽभिघारणम इति [illegible] येवं श्रुत्यर्थपाठस्थानमुख्यप्रवृत्ति [illegible] वैगुण्यमित्यलम ।

पशु [illegible]
नीय [illegible]
नसाहि [illegible]
ततोऽनु [illegible]
पवसथ्यन [illegible]
धर्माणां निय [illegible]
साध्ययागयोर्म [illegible]
ग्नेयपुरोडाशस्य [illegible]
मुख्ययागकर्म्मादौ [illegible]
क्रमैरेव कर्मानुष्ठान [illegible]

इति श्रीकृष्ण [illegible] मांसा परिभाषा

𑌶𑍍𑌰𑍀𑌰𑌸𑍍𑌤𑍁

𑌶𑍍𑌰𑍀𑌶𑌿𑌵𑌾𑌯 𑌨𑌮𑌃

𑌶𑍍𑌰𑍀𑌰𑌾𑌮𑌜𑌯𑌂

𑌶𑍍𑌰𑍀𑌤𑍍𑌰𑌿𑌕𑍂𑌟𑌾𑌚𑌲 𑌮𑌾𑌹𑌾𑌤𑍍𑌮𑍍𑌯𑌂

𑌶𑍍𑌰𑍀𑌸𑍍𑌕𑌾𑌨𑍍𑌦 𑌪𑍁𑌰𑌾𑌣𑍋𑌦𑍍𑌧𑍃𑌤𑌂

𑌅𑌤𑍍𑌰 𑌭𑌾𑌰𑌤 𑌵𑌰𑍍𑌷𑍇 𑌦𑌕𑍍𑌷𑌿𑌣𑌭𑌾𑌗𑍇
𑌸𑌹𑍍𑌯𑌪𑌰𑍍𑌵𑌤 𑌨𑌿𑌕𑌟𑌸𑍍𑌥𑌿𑌤𑌸𑍍𑌯
𑌪𑍁𑌣𑍍𑌯𑌤𑍀𑌰𑍍𑌥 𑌕𑍍𑌷𑍇𑌤𑍍𑌰𑌪𑍍𑌰𑌸𑌿𑌦𑍍𑌧𑌸𑍍𑌯
𑌶𑍍𑌰𑍀𑌤𑍍𑌰𑌿𑌕𑍂𑌟𑌾𑌚𑌲𑌸𑍍𑌯 𑌸𑍍𑌥𑌲𑌪𑍁𑌰𑌾𑌣𑌂

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]
𑌮𑍁𑌦𑍍𑌰𑌿𑌤𑌂
𑌵𑌿𑌜𑌯𑌕𑍇𑌤𑌨𑌾𑌖𑍍𑌯𑍇

குத்தால மாகாத்மியம்





𑌶𑍍𑌰𑍀𑌰𑌸𑍍𑌤𑍁

𑌶𑍍𑌰𑍀𑌗𑌣𑍇𑌶𑌾𑌯 𑌨𑌮𑌃

𑌤𑍍𑌰𑌿𑌕𑍂𑌟𑌾𑌚𑌲𑌮𑌾𑌹𑌾𑌤𑍍𑌮𑍍𑌯𑍇

𑌪𑍍𑌰𑌥𑌮𑍋𑌧𑍍𑌯𑌾𑌯𑌃

[illegible] ॥
[illegible] ॥

𑌪𑍁𑌰𑌾 𑌮𑍁𑌨𑍀𑌶𑍍𑌵𑌰𑌾𑌃 𑌕𑍇𑌚𑌿𑌨𑍍𑌨𑍈𑌮𑌿𑌷𑌾𑌰𑌣𑍍𑌯𑌵𑌾𑌸𑌿𑌨𑌃 ॥
[illegible] ॥௧॥ [illegible]
[illegible] 𑌪𑍌𑌰𑌾𑌣𑌿𑌕𑍋𑌤𑍍𑌤𑌮𑌃 ॥ [illegible]
[illegible] 𑌨𑍈𑌮𑌿𑌷𑌾𑌰𑌣𑍍𑌯 [illegible] ॥ ௨ ॥ [illegible]
[illegible] 𑌦𑍃𑌷𑍍𑌟𑍍𑌵𑌾 𑌸𑌰𑍍𑌵𑍇 𑌤𑍇 𑌮𑍁𑌨𑌿𑌪𑍁𑌙𑍍𑌗𑌵𑌾𑌃 । [illegible]
[illegible] ॥௩॥ [illegible]
[illegible] ॥ ௪ [illegible]
[illegible]

[illegible] ॥ ௭ ॥ [illegible]
[illegible] ॥ ௮ ॥
[illegible]
[illegible] ॥ ௯ ॥ [illegible]
[illegible]
[illegible] ॥ ௧௦ ॥ [illegible]
[illegible]
[illegible]
[illegible] ॥ ௧௧ ॥ [illegible]
[illegible]
[illegible] ॥ ௧௨ ॥ [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥ ௧௩ ॥ [illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥ ௧௪ ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

𑌶𑍍𑌰𑍀𑌸𑍂𑌤𑌃 [?]

[illegible]

𑌰𑍇𑌨𑌾𑌰𑌂 ॥ ௰௧ ॥ 𑌵𑌸𑌿𑌷𑍍𑌠𑌶𑍍𑌚 𑌤𑌦𑌾 𑌯𑌕𑍍𑌷𑌸𑍈𑌨𑍍𑌯𑌂 𑌪
𑌕𑍍𑌷𑍇𑌷𑍍𑌵𑌪𑌿 ॥ 𑌶𑍍𑌰𑍀𑌕𑍂𑌡𑌾𑌲𑌯 𑌸𑌂𑌹𑌾𑌰𑌚𑌿𑌤𑍍𑌤𑌾 𑌨𑌾𑌥𑌨𑍀𑌶𑍍𑌵𑌰𑌾
॥ ௰௨ । 𑌤𑌸𑍍𑌯𑌾𑌂 𑌸𑌨𑍍𑌨𑌾𑌥𑌸𑍍 𑌪𑍍𑌰𑌸𑌨𑍍𑌨𑌂 𑌤𑌂 𑌪𑌾𑌲𑌯𑍇𑌨𑍍𑌨𑌾𑌲
𑌮𑍇𑌤𑌨𑌸𑌃 । 𑌶𑍍𑌰𑍀𑌕𑍂𑌡𑌾𑌲𑌯𑌨𑌾𑌯𑌕𑌸𑍍𑌯 𑌸𑌂𑌨𑌿𑌧𑍌 𑌪𑌾𑌪
𑌤𑍋𑌷𑌿𑌤𑌃 ॥ ௰௩ ॥ 𑌮𑌾𑌯𑌤𑍀𑌰𑍍𑌥𑍇 𑌸𑌰𑍍𑌵𑌶𑍍𑌰𑌷𑍍𑌟𑌂 𑌸𑌯𑌾𑌤𑌿 𑌪𑍍𑌰
𑌸𑌨𑍍𑌨𑌵𑌤𑌂 । 𑌕𑍃𑌷𑍍𑌣𑌪𑌕𑍍𑌷𑌸𑍍𑌯 𑌦𑌶𑌮𑍍𑌯𑌾𑌂 𑌤𑌸𑍍𑌯𑌾𑌂 𑌨𑌦𑍍𑌯𑌾𑌂 𑌦
𑌹𑍇𑌦𑍍𑌯𑌦𑌿 ॥ ௰௪ ॥ 𑌸𑍍𑌨𑌾𑌤𑍍𑌵𑌾 𑌪𑌾𑌪𑌾𑌤𑍍 𑌪𑍍𑌰𑌮𑍁𑌚𑍍𑌯𑍇𑌤 𑌪𑌾
𑌤𑌕𑍀 𑌪𑌤𑌿𑌤𑍋𑌽𑌪𑌿 𑌵𑌾 । 𑌕𑌾𑌰𑍍𑌤𑌿𑌕𑍍𑌯𑌾𑌂 𑌕𑍃𑌤𑍍𑌤𑌿𑌕𑌾𑌯𑍋𑌗𑍇 𑌯𑌸𑍍𑌤𑍁
𑌪𑌂 𑌪𑍍𑌰𑌯𑌚𑍍𑌛𑌤𑌿 ॥ ௰௫ । 𑌸 𑌦𑌕𑍍𑌷𑌿𑌣𑌾𑌂 𑌪𑌾𑌪𑌮𑍁𑌕𑍍𑌤𑍋 𑌨𑌤𑍍𑌰
𑌤𑍍𑌰𑌪𑌦𑌂 𑌤𑌥𑌾 𑌭𑌵𑍇𑌤𑍍 । 𑌦𑌾𑌰𑌿𑌦𑍍𑌰𑍍𑌯𑌦𑍁𑌃𑌖𑌰𑍋𑌗𑌾𑌦𑍀𑌨𑍍 𑌨𑌿𑌰𑍍𑌦𑌿
𑌶𑍍𑌯 𑌸𑍁𑌖𑌮𑍇𑌧𑌤𑍇 ॥ ௰௬ ॥ 𑌨 𑌮𑍃𑌤𑍍𑌯𑍁𑌭𑌯𑌂 𑌤𑌸𑍍𑌯 𑌸𑌂
𑌸𑌾𑌰𑌾𑌨𑍍𑌨𑌾𑌤𑍍𑌰 𑌸𑌂𑌶𑌯𑌃 । 𑌦𑍇𑌹𑌾𑌨𑍍𑌤𑍇 𑌸𑍌𑌖𑍍𑌯𑌦𑌂 𑌦𑌿𑌵𑍍𑌯𑌂
𑌪𑌰𑌮𑌾𑌪𑍍𑌨𑍋𑌤𑌿 𑌸𑌂𑌭𑌵𑍇𑌤𑍍 ॥ ௰௭ ॥ 𑌕𑌾𑌲𑌤𑍍𑌰𑌯𑌂 𑌶𑌿𑌵
𑌸𑍍𑌯𑌾𑌸𑍍𑌯 𑌮𑌾𑌣𑌾𑌵𑌕𑌸𑍍𑌯 𑌪𑌾𑌪𑌿𑌨𑌃 । 𑌦𑌾𑌨𑌾𑌦𑌿 𑌵𑌿𑌶𑍇𑌷
𑌣𑌾𑌨𑍍𑌯𑍇 𑌵𑌿𑌤𑍍𑌤𑌾𑌪𑌹𑌾𑌰𑌿𑌣𑌃 ॥ ௰௮ । 𑌹𑌾𑌨𑌾 𑌪𑍍𑌰𑌣𑌯𑌤𑌃
𑌪𑌶𑌵𑌃 𑌕𑍃𑌤𑍍𑌵𑌾 𑌸𑌨𑍍𑌤𑌂 𑌯𑌥𑌾𑌵𑌿𑌧𑌿 । 𑌸𑌕𑌲𑌾𑌨𑍍 𑌵𑌾𑌰𑌂𑌵𑌾𑌨
𑌪𑌾𑌨𑌾𑌨𑌿𑌤𑍍𑌯𑌾𑌸 𑌭𑌵𑍇𑌤𑍍 ॥ ௰௯ ॥ 𑌹𑌾𑌤𑌾𑌨𑍍 𑌲𑍋𑌕𑌾𑌨𑍍 𑌸𑌂𑌪𑍍𑌰𑌾
𑌪𑍍𑌯𑌪𑌾𑌪𑌾𑌨𑍍 𑌨𑌪𑌾𑌤𑍍𑌤𑍇 𑌨𑌰𑌃 । 𑌶𑍍𑌰𑍀𑌕𑍂𑌡𑌾𑌲𑌯𑌨𑌾𑌯𑌕𑌸𑍍𑌯 𑌪𑌾
𑌦𑌕𑌾𑌯 𑌤𑌪𑌸𑍍𑌵𑌿𑌨𑍇 ॥ ௨௰ । 𑌦𑌨𑍍𑌤𑌯𑍍𑌯𑍂𑌰𑍍𑌧𑌸𑌂𑌯𑍁𑌕𑍍𑌤𑌂 𑌤𑌸𑍍𑌯 𑌶𑌂
𑌭𑍋𑌃 𑌪𑍁𑌰𑌸𑍍𑌥𑌿𑌤𑌃 । 𑌦𑍃𑌷𑍍𑌟𑍍𑌵𑌾 𑌦𑍃𑌷𑍍𑌟𑍍𑌵𑌾 𑌯𑌥𑌾𑌶𑌕𑍍𑌤𑌿 𑌭𑌕𑍍𑌤𑌿𑌶𑍍𑌰𑌦𑍍𑌧𑌾𑌸𑌮𑌨𑍍𑌵𑌿𑌤𑌃
॥ ௨௰௧ ॥ 𑌤𑌨𑌕𑍋𑌟𑌿𑌸𑌹𑌸𑍍𑌰𑌾𑌣𑌾𑌂 𑌦𑍍𑌵𑌿𑌜𑌾𑌨𑌾𑌂 𑌭𑍋𑌜𑌨𑌂 𑌭𑌵
𑌤𑍍 । 𑌪𑍍𑌰𑌾𑌪𑍍𑌨𑍋𑌤𑌿 𑌤𑍇𑌨 𑌪𑍁𑌣𑍍𑌯𑌾𑌨𑌿 𑌪𑍁𑌣𑍍𑌯𑌂 𑌶𑌿𑌵𑌪𑌾𑌰𑌾𑌯𑌣 ॥ ௨௰௨
𑌸𑌂𑌕𑍀𑌰𑍍𑌣𑍍𑌯𑌸𑌂𑌜𑍍𑌞𑌾𑌯𑌕𑌂 𑌪𑍍𑌰𑌾𑌪𑍍𑌯 𑌦𑍇𑌹𑌪𑌾𑌤𑌾𑌨𑍍𑌤𑍇 । 𑌗𑌂𑌗𑌾𑌸𑍍𑌨𑌾𑌨𑍇
𑌨 𑌯𑌤𑍍𑌪𑍁𑌣𑍍𑌯𑌂 𑌸𑌾𑌯𑍁𑌜𑍍𑌯𑌂 𑌤𑌸𑍍𑌯 𑌪𑌾𑌰𑌾𑌯𑌣𑌾𑌤𑌃 ॥ ௨௰௩ ॥ 𑌦𑍇𑌨
𑌦𑍇𑌨𑍇𑌨 𑌤𑌸𑍍𑌯 𑌸𑌾𑌯𑍁𑌜𑍍𑌯𑌂 𑌵𑌿𑌤𑍍𑌤𑌾𑌸𑌾𑌨𑍁𑌸𑌾𑌰𑌤𑌃 । 𑌪𑍍𑌰𑌯𑌾
𑌗𑍇 𑌚 𑌕𑌾𑌲𑌕𑍇 𑌤𑍀𑌰𑍍𑌥𑍇 𑌪𑌞𑍍𑌚𑌪𑌾𑌪𑌂 𑌪𑍍𑌰𑌣𑌶𑍍𑌯𑌤𑌿 ॥ ௨௰௪
𑌦𑍇𑌨𑌦𑍇𑌨𑍇𑌨 𑌤𑌸𑍍𑌯 𑌸𑌾𑌯𑍁𑌜𑍍𑌯𑌂 𑌵𑌿𑌤𑍍𑌤𑌾𑌸𑌾𑌨𑍁𑌸𑌾𑌰𑌤𑌃 ।
𑌸𑌂𑌪𑍂𑌰𑍍𑌣𑌾𑌨𑍍 𑌸𑍍𑌵𑌰𑍍𑌗𑌤𑌃 𑌪𑌾𑌤𑌾 𑌯𑌤𑍍𑌰 𑌪𑍍𑌰𑌵𑌰𑍍𑌤𑌤𑍇 । ௨௰௫ ।

[illegible] ॥ ४७ ॥ [illegible] ॥ ४८ ॥ [illegible] ॥ ४९ ॥ [illegible] ॥ ५० ॥ [illegible] ॥ ५१ ॥ [illegible] ॥ ५२ ॥ [illegible] ॥ ५३ ॥ [illegible] ॥ ५४ ॥ [illegible] ॥ ५५ ॥ [illegible] ॥ ५६ ॥ [illegible] ॥ ५७ ॥ [illegible] ॥ ५८ ॥ [illegible] ॥ ५९ ॥ [illegible]

𑌤𑍍𑌵𑌾𑌶𑌮𑍍𑌸𑍍𑌵𑌾𑌮𑌿 𑌕𑌾𑌰𑌂 𑌭𑌯𑌾𑌪𑌹𑌾 ॥ 𑌜𑌂𑌬𑍁𑌕𑌾𑌰𑌣𑍍𑌯𑌕𑍍𑌷𑍇𑌤𑍍𑌰
𑌤𑌤𑍍𑌤𑍍𑌵𑌤𑌤𑍍𑌤𑍍𑌵𑌜𑍍𑌞𑌾𑌃 𑌸𑌂𑌤𑌮𑌹𑌿 ॥ ௮ ॥ 𑌇𑌤𑍍𑌯𑌾𑌜𑍍𑌞𑌾𑌂 𑌶𑌾𑌂𑌭
𑌵𑍀𑌂 𑌶𑍍𑌰𑍁𑌤𑍍𑌵𑌾 𑌹𑍃𑌷𑍍𑌟𑌾 𑌦𑍇𑌵𑌦𑍇𑌵𑍇𑌨 𑌯𑌃 ॥ 𑌜𑌂𑌬𑍁𑌕𑌾𑌰𑌣𑍍𑌯
𑌮𑌾𑌹𑌾𑌤𑍍𑌮𑍍𑌯𑌂 𑌶𑍍𑌰𑍁𑌤𑍍𑌵𑌾 𑌶𑍍𑌰𑍁𑌤𑍍𑌵𑌾 𑌪𑌠𑍇𑌤𑍍𑌪𑌠𑍇𑌤𑍍 ॥ ௯ ॥ 𑌕𑌾𑌮𑍇𑌨𑍈𑌶𑍍𑌵𑌰𑍍𑌯
𑌨𑌾 𑌦𑍇𑌵𑌵𑍍𑌯𑌾𑌧𑌿𑌭𑌿𑌃 𑌪𑌰𑌿𑌵𑌾𑌰𑌿𑌤𑌃 ॥ 𑌪𑍍𑌰𑌾𑌣𑍇𑌽𑌪𑌿 𑌶𑌂𑌕𑌰𑌂
𑌸𑍍𑌮𑍃𑌤𑍍𑌵𑌾 𑌯𑌶𑍋 𑌲𑌭𑌤𑍇 𑌪𑍍𑌰𑍋𑌚𑍍𑌚𑍈𑌃 ॥ ௧௰ ॥

𑌶𑍍𑌰𑍀𑌸𑍂𑌤𑌃

𑌤𑌥𑍋𑌕𑍍𑌤𑌂 𑌕𑌥𑌿𑌤𑌂 𑌸𑌰𑍍𑌵𑌂 𑌜𑌂𑌬𑍁𑌕𑌾𑌰𑌣𑍍𑌯𑌵𑍈𑌭𑌵𑌮𑍍 ॥ 𑌶𑍍𑌰𑍁𑌤𑍍𑌵𑌾
𑌤𑌾𑌂 𑌪𑌤𑌾𑌂 𑌦𑍇𑌵 𑌸𑌰𑍍𑌵𑌪𑌾𑌪𑌪𑍍𑌰𑌣𑌾𑌶𑌨𑌮𑍍 ॥ ௧௧ ॥
𑌇𑌤𑍍𑌥𑌂 𑌵𑌿𑌪𑍍𑌰𑌾𑌃 𑌕𑌥𑍇𑌷𑍁 𑌕𑌥𑌿𑌤𑌂 𑌜𑌂𑌬𑍁𑌕𑌾𑌰𑌣𑍍𑌯 𑌪𑌾𑌪𑌘𑍍𑌨𑌾𑌦𑍇𑌵
𑌵𑌿𑌪𑍍𑌰𑌾𑌨𑍍𑌮𑍁𑌦𑍍𑌦𑌿𑌶𑍍𑌯 𑌪𑌠𑌮𑌾𑌤𑍍𑌮 𑌮𑌣𑍀𑌨𑍇𑌭𑍍𑌯𑌃 ॥ 𑌶𑍍𑌰𑍁𑌤𑍍𑌵𑌾𑌯𑌮𑌂
𑌤𑌿𑌜𑌪𑌠𑍇𑌨𑍍𑌦𑍇𑌵𑍈𑌸𑍍𑌪𑌤𑍍𑌪𑌦𑌸𑍍 𑌸𑍍𑌵𑌾𑌮𑌿𑌕𑌾𑌰𑌂 𑌕𑌾𑌲𑌾𑌨𑍍𑌤𑌂 𑌶𑍍𑌰𑍋
𑌤𑍍𑌰𑍇𑌣 𑌸𑌤𑌾 𑌸𑌰𑍍𑌵𑌤𑌿𑌥𑌿𑌷𑍍𑌵𑌪𑌿 𑌯𑌤𑍍𑌤𑍍𑌰𑌾𑌪𑌾𑌲𑌯𑌵 ॥ ௧௨ ॥

𑌇𑌤𑌿 𑌶𑍍𑌰𑍀𑌮𑌤𑍍𑌸𑍍𑌕𑌾𑌨𑍍𑌦𑍇 𑌮𑌹𑌾𑌪𑍁𑌰𑌾𑌣𑍇
𑌉𑌪𑌰𑌿𑌭𑌾𑌗𑍇 𑌸𑍍𑌥𑌲𑌪𑍁𑌰𑌾𑌣𑌸𑌂𑌹𑌿𑌤𑌾𑌯𑌾𑌂
𑌶𑍍𑌰𑍀𑌕𑌣𑍍𑌠𑌾𑌜𑌮𑍍𑌬𑍁𑌮𑌾𑌹𑌾𑌤𑍍𑌮𑍍𑌯𑍇
𑌪𑍍𑌰𑌥𑌮𑍋𑌽𑌧𑍍𑌯𑌾𑌯𑌃

𑌋𑌷𑌯𑌃 ॥ 𑌸𑌾𑌯𑌾𑌹𑍍𑌨𑌸𑍍𑌤𑌕𑌥𑌯𑌾 𑌪𑍍𑌰𑍋𑌕𑍍𑌤𑌂 𑌜𑌂𑌬𑍁𑌕𑌾𑌰𑌣𑍍𑌯
𑌵𑍈𑌭𑌵𑌮𑍍 । 𑌯𑌸𑍍𑌯 𑌶𑍍𑌰𑌵𑌣𑌮𑌾𑌤𑍍𑌰𑍇𑌣 𑌮𑍁𑌕𑍍𑌤𑌿𑌃 𑌕𑌰𑌤𑌲𑍇 𑌸𑍍𑌥𑌿𑌤𑌾
॥ ௧ ॥ 𑌤𑌤𑍍𑌸𑌾𑌨𑍍𑌨𑌾𑌧𑍍𑌯𑌂 𑌯𑌾𑌂𑌤𑌿 𑌪𑌾𑌪𑌾𑌨𑌿 𑌸𑌞𑍍𑌚𑌿𑌤𑌾𑌨𑍍𑌯𑌪𑌿
𑌪𑌾𑌪𑌾𑌨𑍍𑌯𑌪𑌿 𑌤𑌥𑌾 𑌕𑍍𑌰𑍂𑌰𑌾 𑌮𑍍𑌰𑌿𑌯𑌨𑍍𑌤𑍇 𑌮𑌾𑌨𑌵𑌾𑌃 ॥ ௨ ॥
𑌅𑌸𑍍𑌯 𑌸𑍍𑌥𑌾𑌨𑌸𑍍𑌯 𑌮𑌾𑌹𑌾𑌤𑍍𑌮𑍍𑌯𑌂 𑌶𑍍𑌰𑌵𑌣𑌾𑌨𑍍𑌮𑍁𑌕𑍍𑌤𑌿𑌦𑌂 𑌭𑌵𑌮𑍍 ॥ 𑌤
𑌸𑍍𑌮𑌾𑌤𑍍𑌸𑌰𑍍𑌵𑌂 𑌸𑌮𑌾𑌖𑍍𑌯𑌾𑌤𑌿 𑌵𑍍𑌯𑌾𑌸𑌶𑌿𑌷𑍍𑌯 𑌮𑌹𑌾𑌮𑌤𑍇 ॥ ௩ ॥
𑌶𑍍𑌰𑍀𑌕𑌣𑍍𑌠𑌾𑌜𑌮𑍍𑌬𑍁 𑌮𑌾𑌹𑌾𑌤𑍍𑌮𑍍𑌯𑌂 𑌪𑌠𑍇𑌨𑌾𑌪𑌠𑌿𑌤𑌂 𑌪𑌰 ॥ 𑌇𑌤𑌿𑌦𑍇𑌤
𑌦𑍇𑌶𑌾𑌤𑌿𑌦𑍇𑌤𑌾𑌮𑌨𑍍𑌤𑍍𑌰𑌕𑌾 𑌸𑌨𑍍𑌤𑌃 𑌪𑍍𑌰𑍌𑌢𑌾𑌣𑌿𑌕𑍋𑌤𑍍𑌤𑌮𑌾𑌃 ॥ ௪ ॥
𑌶𑍍𑌰𑍀𑌕𑌣𑍍𑌠𑌾𑌜𑌮𑍍𑌬𑍁 𑌮𑌾𑌹𑌾𑌤𑍍𑌮𑍍𑌯𑌂 𑌪𑌤𑍍𑌤𑍍𑌰𑍇𑌮𑍇𑌪𑍋𑌪𑌪𑌤𑍍𑌰𑍇𑌮 ॥

ஶ்ரீஸூத꞉

ஸாயம் ச ஸாயம் ச ப்ரஹ்மாவ்யாஜ்ஞா ஸமம்ஹிதா ஸாத்⁴யாஸாஹி
த꞉ ॥௫॥ ப்ரணவஸ்ய ப்ரக்ஷோ ஸவஸஹிஷ்ட ஸம்ப்ரகாரணம்ஹேமஹ
வம் । ஜநநம் தாப ஸஹஸ்ரேஷ்டாஷ்ட தமோஹிம் க்ஷீணவாஷ்ப நாம ।
॥௬॥ த்ரிஸப்தாவஸ ப்ரஹ்மாஸ்ய ஶ்ரவணே ஜாயதே தத்ஸித꞉ । த
ஸாரதஹம் ஸஹம் ஸமாரோ க்ஷயயா கரணா நியோ꞉ ॥௭॥ வதா
தி தஸ்ய ப்ரஹ்மாஸ்ய ஸம்கோமேவ நநவிஸ்ஸரஸ ॥ ஸஹாத்ரயம்
வஶம் வசிதய பராண்யம் யாணீஸதாரா꞉ ॥௮॥ ஸஹமேஹ
ஸஸீ தாப்ரஸ்ஹா வித்ரஸஹா த்ரியம் । ஹேஸயாட ஶரம்நா
நம்ஸ்ஸாம் ப்ரயாம் வஸதாம் தயா ॥௯॥ ஸஷா வித்ரஸஹா
நநநம் பாணாம் ப்ரக்ஷிதாயிநீ ॥ ஸஸ்யாம் வித்ரஸஹாயாம் த
வாஸிதாஸி ஶிவஸ்யேஷ꞉ ॥ ௰ ॥ ப்ரத்யம்தே ஸவஸ்வாமே
ஹிம் தஸ்ய ஸதஸ்யம் வதாப்ரஹ்மா ॥ ஸஹிம் நமோ த்ரம் வராரா வ்யக்தா
நிதிஹாஸம் வதாஸிவ꞉ ॥௧௧॥ த்ரிகாரஸ்ய ப்ரஹ்மாமா ஶம்
ணாயம் ஸாவயாநத꞉ ॥ வராரா வ்யஜாவதிரஹம்த்ரக்ஷ ஜத்ரி
ஹி விஶேஷத꞉ ॥௧௨॥ தஸ்ய க்ஷேத்ர ஸ்பர்ஶம்ஶஸ ரஜவ
வேமவநமவித்தா꞉ । தாஸாமேகாஸதீ நாஸேவ்யணம் வஹ்ய
நிஹாநநா ॥௧௩॥ தாதநா ஶம்ஹமேவ ஹ்ருஷ்ட꞉ ஸ ஸந்தாம்
மோகமேஹதவே । தயா ஸஹஸவிஶாதா விரகாரம்ப்ரநீஶ
ரா꞉॥௧௪॥ உவாஸவ்யக்திஸம்யக்தவேளமோஶ்ரா ஶேஷாநிவ।
தஸ்மிம் நவஸரே தக்ஷ ஸஸ்தம் த ப்ரஹ்மாஸவம் ॥௧௫॥ வ
காஶ ஸஹித ஸஹவேஷ்டே ஹேவேஸஹ வராமோஹமேஶ꞉ ।
ஶ்ரோநந வாஸீ ஸம்யக்ஷாம் ஸதீம் த்ரக்ஷா வஶத்ரவ ॥௧௬॥ அ
நேதம்மேநாஸஸேஹ தாம்ஸ வாஸாமேதவஶம் மத꞉ ।
க்ஷணேநாகணே கயாஶ்ரக்ஷா ஸதீதஸ்ய ஶமோஹாக்ஷஸவஷ ॥௧௭
ஶம்ஸாநநா வ்யக்திஷ்டாஸி மம்த ஶேவா வஶக்ருமே ॥ஸ்
ஸவீஹி꞉ வஸிவ்யதா யஜ்ஞவாடம் யயௌதக்ஷ ॥௧௮॥ விக்ர
வஶாநிதாமேதந க்ஷ்ணாஸ்ஹிம் வ்யாஸதக்ஷணாஸ॥ ஸதஸ்க்ஷா

[illegible]

[illegible]

[illegible]

ெஶா ஷய | யஜுஷ ஶ்ரேதிஷோது ஹதேக்ஷா மமநம் வ்யாவ தஜ
க்ஷணா: || ௰௨ | தம்த்³ருஷ்ட்வா ஸாவஸோநம் தம் வீரஸத்³ரும் வ்ய
தாவைவாந்து | ஶிரஸ்யுத்³தேஷு ஸஹஸாய மஹாம் தாஸ்ருஸவ்யஹ: |
௰௩ | வஸவ் நஷ்டாஸ்ய த்³ருஜா தக்ஷஸ்ய வரவேஷுநு ||
தஜா வ்யஸ்ய தி தாந்ஸ்ரூ ஶேஹஶா ஸக்ஷவக்ஷஸவூ: | ௰௪ ||
க்ருதாத்³வஸிதி விவ்யாத ஸமுஜாநம்ஜ விஶ்ரூஹ: | வஸவம் ந
ஷ்டா க்ருதோ ஜெஷவாம் ஶிவத்³ருஷ்ஷண தோஷித: || ௰௫ ||
திஷித்தஶக்ரஶம் க்ரமே ரஸவத்து ஸமந்வீயதாம் |
க்ருதாரம்நாஸ் ஶஶத்ம் க்ஷயாய ஸ்வஸ்ய பாயவாம் ||
மக்ஷா தேதஸ்ய ஹவ ந ஸவ்யக்தாந்தம் நவேஷயது | வ்யாஹா
ரேஷாந்து ஸமேஶேஷாக்ய க்ருபாதிஜ்ர வமேராமஸேந்து || ௰௬
ஸயாஸோ நவ்வஸோவாக்யேஶ தத்³வாவஹ | ஹவ்தாம்காயத்
ஶேஷாக்ஷம் ஶயாஜேரம் ஸம்பேரா தேஸோ || ௰௭ || ஶிவத்³ராஹ
ண தேதவ்தவ ஜ ததேதி நுஷோஹம் ஹஹபம் || ஶிவத்³ராஹாக்ஷ
வேரோஷோஷா நாத்ரவிஸத்³ரும் வத்³ராத்³ஹம் | ௰௮ || ஶிவ
த்³ராஹா நஹவோவம் ஶிவத்³ராஹம் ஶேஹஹஹயம் || ஶிவ
த்³ராஹாம் நிஜகர்யம் க்ஷயம்யாதி ஸபேராதஸோ: || ௨௰ || ஶி
வத்³ரா ஹிணோயுர் தாஹ ந்த்³ரஜாஸ்வேஸவவேக்ஷம் || நஹ
ந்த்³ருத்³திதாய வாவம் வ்யாவயா ராதஸ்மாஶப: | ௨௧ ||
யேத்தஷ்டம் தி ஶிவம் ஸாம்பம் ரோக்ஷக்ஷதாஜ்ஞ ஶேஷயம் | வதந்தி
தே த்³ரூபவம் வோமேரநரகேஹ்யதத்³ருஷ்டேத || ௨௨ | ஶிவம்
வா ஶிவஶாஸ்வா ஹமேஷாத்³ருஹேத விஶ்ரூஹாந்து || நிம்த³ம்திஶி
வஸக்தா நேந்த்³ரதேத யாந்தி யஶோதநாம் | ௨௩ | க்ஷஹேவிஷ்ணு
ஶக்ரஸ்ய ஸவவ வரமேஶ்வர: || தஸாத்³தம்ஶம்ஸரம் ஹோகேக்ஷா
நமேஷ வேதவைத³ஹ்ஷோது || ௨௪ | ஶிவத்³ராஹேண யக்ஷாக்ஷம்
ஜாதமேவம்ஶேஹஸுஹயம் || தவஸ்ரம்தி தஸ்ரோம்தேத்³ ஶிவஸா
நேநவவேராதஸோ: | ௨௫ | வஸவஸ்தக்ஷா ஜமதா³த்³ர்யா ஸவேத்
வ்யாம்ஜமயம் ஷிதாம் | விநயோவநதா³ஸவேத் வாயஶேஷம்

सूर्योपमम् ॥ ३६ ॥

देवा ऊचुः ॥

समस्त देवदेवेश त्वया सम्भवता वयम् । यदुक्तं भवता तथ्यमेवं न संशयः ॥ ३७ ॥ शिवस्थानानि च कानि सन्ति सर्वाणि भूतले । कस्मिन् स्थले तपश्चित्रविशेषेण भविष्यति ॥ ३८ ॥ विचार्य तत्सर्वमखिलं रक्षितव्याघ्रपाद प्रभुः । ऋषीणां च श्रुत्वा ब्रह्मलोकपितामहः ॥ ३९ ॥ क्षणं विचार्य ध्यात्वा मनसा मुक्तिदं शिवमीश्वरम् । यदेतद्वचनं कारण्यं देवर्षिगणसेवितम् ॥ ४० ॥ नद्यः सरांसि पुण्यानि स्थानानि किं न सेवितानि । दिव्यानि सर्वसम्भवाय मे हादेव दिव्यमयम् ॥ ४१ ॥ यत्र साक्षान्महादेवः पार्वतीसहितः प्रभुः । सान्निध्यं करोति नित्यं विश्वत्र रजताचले ॥ ४२ ॥ कल्पकोटि तदेव शिवक्षेत्रमिहावनाच्चये । तदेव विदितं पुण्यं तीर्थानां महोदये ॥ ४३ ॥ स्नानं सर्वं संसिद्ध्यर्थं तत्र कुर्यात् भविष्यति । यत्र लोकं तत्र तपसा सर्वेश पीतं क्रियादिभिः ॥ ४४ ॥ तस्य चैव सर्वं न भवति भयं न भविष्यति । एतत्सर्वं तपस्वाध्यायतो नरो न सदा प्रत्यक्षं निमेषेण च । तदेव न स्याच्चराचरयोः जन्मः श्रीकुटावने शिवे ॥

इति श्रीस्कान्दे महापुराणे उपरिभागे

स्थानवैभववर्णने

श्रीकुटावनमाहात्म्ये

द्वितीयोऽध्यायः

सर्वज्ञं कृपया सर्वं तत्कारण्यमेव भवम् ।

कथं श्रीकुटावनदेशं तिष्ठत्यत्र समागताः ।

कथं चक्र[illegible] सकलं कथं सकलं प्रभुः

த்ருதீயோऽத்⁴யாய꞉

க்ஷும் க்ருதவாந் ஶம்ஸத꞉ கயம் தேஷாம் நிவேஶகஸ்ய ॥ ௨

விஸ்தாய ச ஸவர்ணோ பக்ஷ்மா ரோமஹர்ஷணே தவாப । ஸம்ஹி

வர்த்தேஶ்ருத்ய கதாயா ஶ்ருவணேச்சா ந꞉ ॥ ௩ । ஸர்வேஷாம்

வதநம் ஶ்ருத்வா ஸூத꞉ பௌராணிகோத்தம꞉ ॥ கயாம் பா

வநீம் ந்ருணாம் வக்தும் ஸமுபசக்ரமே ॥ ௪ ।

ஸூத உவாச ।

விஸ்வாதாஸ்யே த்வயா ப்ருஷ்டம் ந ஸ்ருதா ஸம்வக்ஷ்யாமி தம் । த

பஶ்சாத் ஸம்ஹா போஷம் விப்ரகாஶ்யம் ஸர்வஶ꞉ ॥ ௫ । கே

சித் ப்ரணம்ய ந ஜாதா꞉ கேசித் வாதாஸநா꞉ பரே ।

ஸம்ப்ரவ்ருக்ஷே த்ருஷ்டா த்விஜாஶ்ரயா ஸம்வ்ருதா꞉ ॥ ௬ ।

ப்ரவம் வ்ருக்ஷ வ்ருக்ஷ ப்ரக்ரம்ய தேஷாம் ஸர்வாஶ்ரய பராபரா꞉

வேதாஸ்தம்ஸம் தபோ த்ருவ வ்ருக்ஷஸ்பர்ஶ ஸமாஶ்ரிதா꞉ ॥ ௭ ।

வ்ருக்ஷாணாம் க்ஷிதிம் ஸாஸ்த்ரது தத்ராதிஷ்ட ஶ்ருதி ததா꞉ ॥ த

ஸ்ய ஶாகாஸு நாநா ஸ வ்ருக்ஷே தா ஸமுத்பவா꞉ ॥ ௮ ॥

ஏவம் க்ருத்வா தபோ ஹேஷா காலேநைவ மஹாதபா மத꞉ ।

ஏவம் தப꞉ ப்ரவ்ருத்தாநாம் வ்ருக்ஷாணாம் ஸமாஶ்ரிதா꞉ ॥ ௯ ॥

ஶிவப்ரோக்தாம் கதாம் ந்ருணாம் ஸர்வாத்ம ஸர்வஸித்திதா । ஏவ

நிஶ்சித்ய தே ஸர்வே த்ருக்ஷ்யே வ்ருக்ஷே தத꞉ ॥ ௧௦ । த

பஶ்சாத் ஸம்ஹா போஷம் ஶ்ருஷ்டாய மஹாஜநா꞉ । தத

ஸ்ரோதாஸ்ய ஸர்வே ஸம்வக்ஷ்யாம் ப்ரஶ்ருதா꞉ ॥ ௧௧ । தஸ்ய

ஸ்யாதஸ்ய ஶாகாஸ்ருத்வாஸர்வே ஶ்ருத்வா ஶ்ரு திஷ்டா꞉ ॥

ருஷய꞉ ।

ஶாத்ருஹா விஷ்ணுஹா சைவ க்ருதவ்யோ மஹாமத꞉ ।

௧௨ । வஸ்து வாக்யம் தத்ர ஸர்வத்ர தாத்ர ஸம்ஶய꞉ ॥

பஶுபதேஷ꞉ ।

ஶைவீ வாண்யா ஶுத்தாத்மா காயத்ரீ ச தபஸ꞉ பா

ந ॥ ௧௩ ।வஸ்து தேஷு நிதம் தத்ர த பாதஜாதம் ஸர்வம்

வேத ।

ஶ்ரீஸ்கந்தபுராணஸாரஸங்க்ரஹ:

ஸாமவேத: |

ஊர்த்வோ ஸாம்ஸ ஸஹஸ்ரஶாகைர்வேத ஶிவ ஶ்ரோத்ரஹீ நராயண: ||
வேதஶாஸ்த்ர விஹீநஸ்ய வஸந்நத்ர விமுச்யதே | கரு |

அதர்வணவேத: |

நாஸ்திகோ பாம்ஸிகோ மூர்க: பாதகாநாவிமோக்ஷக: | ப
வகா விவிநாவாஸ் ஶுக்ர: ஸ்யாந்நாத்ர ஸம்ஶய: || கசு ||

வேதா: ||

ஸஹஸ்ரஶோ ஸாநாந்யேகாநி முக்தாநி மயி தயோ || ப
ஜ்யாநி தேவ தேவஸ்ய ஸூத்ர ஶதாநி விஶேஷத: || கா | தா
ந்யத்ர பம்பகாரண்யாம் ந்யும்பரோக்த ம ஸம்ஶய: | நப
கே பஞ்சாஶ நாநாம் விஜ்ஞாநம் பஞ்சகாய ந ஶ: | ஷ
ஶஜ்ஞயஷ்டா ஸ . ஶோதிஷ்ஹ ஸாய ந | நப்ருஷ்டி
யோ ஶத்ருர்: பாபஶோதாதீஷா ணை | க ந் ஶாப
ஶுக்ர: ஸ்யாத் பம்பகாரண்ய வாய ந | விஷ்ணு ஶ்ரோஷ்ப
பஶ்ராஹி ப்ரஹ்மஶ்ராஹி த்ரிவிஷ்: | | வா வி
த்ராபரமாயாந்த ஶுச்யதே நாத்ர ஸம்ஶய: | ஶ
ஶிவஶாஸ்த்ரேஷு ப்ராஹ்மணாவிஶோரதந: || உ ||

அஸ்யக:
த்ரயஸ்தாம் கரோதுஸ்தமே ப்ர | காமேபஞ்சாதந
ரோயாதே ஶரீரே ப்யக்ஷதாம் மதே || உக | கம் நம |
தி யஶ்சாஸ்த்ர ஸமாநீ பதிபவ்யம் | பஞ்சபஞ்சயோமே நம்ஸ்
க்பா தஞ்ஜீம் தீஷ்தி ஶங்கரம் || உஉ | கயா ந கபமர்தா
ஸவேர்ஷா ஶிஶ்ரோராவக்தவ்யஸம: | ஶிவஶ்ரோஹோ தஷோ
ஷஸ்ய தாமமேயம் வியம் தவ: | உக || தஸாது நாயாதிய
ஶுராதா ஸமுத்ஸம்த ஹிதே ரதம் || உச | ஏவம் விவிம்த்ய
திஷ்டீஸ்ஸ தேவேஷு ஶுசி பஞ்சமவா: | தேஷாம் தக்ஷிண
வாஸுதேஷ் நயநம்வாவ்யம்பத || உரு || நிஷ்டம் ஶோஹநம்
ஶூக்வா தேவா ஶாஸ்த்ரவசோஸத: | வஸகா ஶ்ரூத நஸஸ்தவே
ஶத்ராதிஷ்ரு ஶூத்ராத்ராதாம் | உசு | தஸ்ரீது நவஸதே ரஶம்ஸம:

[illegible] பாதி [illegible] ஸதாஜ்ஞயா ॥ ௨௯ ॥ ஸதாஜ்ஞயா
[illegible] । ரக்ஷிதவ்யம் த்வயா ஸர்வம்
ஜகத் ஸ்தாவரஜங்கமம் ॥ ௩௰ ॥ [illegible] ரக்ஷித
வ்யா ஶிவேஶ்வர । [illegible]
[illegible] ॥ ௩௧ ॥ [illegible] பரமேஶ்வர ।
[illegible] பரமேஶ்வர ॥ ௩௨ ॥ ஹி
ரண்யபாஹவே துப்யம் ஸேநாந்யே ச நமோ நம: । ஹி
[illegible] ஶங்கராய நமோ நம: ॥ ௩௩ ॥ [illegible]
[illegible] வாணிஜாய கக்ஷாணாம் பதயே நம: । தேவாநாம்
[illegible] ॥ ௩௪ ॥ ஹி
ரண்ய[illegible] । ப
[illegible] பரமேஶ்வரம் ॥ ௩௫ ॥ ப
[illegible] । யோ
[illegible] ॥ ௩௬ ॥
[illegible] ।
[illegible] ॥ ௩௭ ॥ [illegible]
[illegible] ॥ [illegible]
[illegible] ॥ ௩௮ ॥
[illegible]
[illegible] ॥ ௩௯ ॥ ப
[illegible] ॥ ப
[illegible] ॥
௪௰ ॥ [illegible] பரமேஶ்வர: । [illegible]
[illegible] ॥ ௪௧ ॥ [illegible]
[illegible] ॥ [illegible]
[illegible] ॥ ௪௨ ॥ [illegible]
[illegible]
[illegible] ॥ ௪௩ ॥ [illegible]

[illegible]

𑌶𑍍𑌰𑍀𑌰𑍁𑌦𑍍𑌰𑌾𑌧𑍍𑌯𑌾𑌯𑌭𑌾𑌷𑍍𑌯𑌮𑍍

[illegible] ॥ [illegible]

[illegible] ॥

[illegible]

[illegible]

𑌶𑍍𑌰𑍀𑌰𑍁𑌦𑍍𑌰𑌾𑌧𑍍𑌯𑌾𑌯𑌭𑌾𑌷𑍍𑌯𑌂 [illegible]

[illegible] ॥

[illegible]

[illegible]

[illegible]

[illegible]

॥ श्रीः ॥

तृतीया पाठावली.



अनन्तशयनस्थ-

राजकीयसंस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

त. गणपतिशास्त्रिणा

विरचिता.

शङ्करन् Sankara Iyer

(तृतीयं संस्करणम्)

अनन्तशयनस्थभास्करमुद्रालयाधिपतिना

के. नारायणय्यङ्गारित्यनेन स्वकीयमुद्रणालये

मुद्रयित्वा प्राकाश्यं प्रापिता.

१९१३ क्रिस्त्वब्दः.



मूल्यं ७ अणाकाः] [Price 7 annas.

PRINTED AT THE
"BHASKARA" PRESS,
TRIVANDRUM.

निवेदना.

एषा तृतीयापाठावलीत्युच्यते. द्वितीयां पाठावलीमधीतवतां बालानां सुखेन ग्रहणयोग्याः पाठा अस्यां योजिताः. ते च गद्यरूपाः प्रायेण भाषान्तरपाठपुस्तकेभ्य उपात्ताः, पद्यरूपास्तु भारतादिभ्यः सङ्कलिताः. अत्र मनुष्यपशुपक्षिणां चरितं, स्थावरस्य स्वभावः, लौकिकी नीतिरित्येतावान् विषयोऽनतिसङ्ग्रहेण बालहृदयग्राहिण्या रीत्या प्रतिपादिताः; अदीर्घाः समासा अर्थसंक्षेपणरीतिज्ञानाय कतिपये प्रयुक्ताः; प्रसिद्धपदेन प्रथमं निर्दिष्टस्यार्थस्य पर्यायपदैः पुनः परामर्शः पर्यायपदपरिचयार्थं क्वचित् क्वचित् कृतः. पुराणकाव्यादावप्रसिद्धस्यार्थस्य प्रतिपादनाय नवोल्लिखितान्यपि कानिचित् पदानि अटित्यर्थसमर्पणे समर्थान्येव प्रयुक्तानि.

न. गणपतिशास्त्री.

विषयानुक्रमः.

॥ श्रीः ॥

तृतीया पाठावली.

मनुष्यस्य देहः शिरश्च.

विधाता तावदस्मानसृजदिति यूयं जानीध्वे. यथा वयं वस्तुं गृहाण्युत्पादयामः, एवमीश्वरोऽस्मज्जीवात्मनो वासाय शरीरं निर्मितवान्.

आत्मन आयतनभूते शरीरे शिरः कायः पाणिपादमिति त्रयो मुख्यभागाः सन्ति. अष्टवितस्तिमात्रेऽस्मिन् देहे शिर एव प्राधान्यादुत्तमाङ्गमित्युच्यते. यथा तदात्मन इच्छयोन्नन्तुमवनन्तुं पार्श्वयोर्विवलितुञ्च पटु स्यात्, तथा तत् सन्निवेशितम्. प्रासादस्थ इव वातायनविवरेणास्मन्मुखावस्थितस्य नयनस्य द्वारेणात्मा समन्ताद् विद्यमानानि वस्तूनि पश्यति. शिरसो भागौ कपालं मुखञ्च. कपालमतिदृढविचित्रसन्धानैरष्टभिरस्थिभिर्निष्पादितम्. तदभङ्गुरत्वाय प्रवणाकारमनुपघाताय लोमशाभिस्त्वग्भिराच्छादितं च वर्तते.

कपालान्तर्मस्तिष्कं वर्त्तते. तदेव बुद्धेः स्थानं प्राणाधारेष्वन्यतमं च. मुखे नयनाभ्यां सह नासाऽऽस्यं

मानुष एक एव स्वभावतः शिर उन्नमय्य चरतीत्यतः स इहफलादुत्कृष्टममुत्रफलमर्जयितुमर्ह इति, अन्ये सर्वे जन्तवोऽधोमुखा एव सञ्चरन्तीत्यतस्त इहसुखमात्रायार्हा इति च शक्यमुत्प्रेक्षितुम्

महात्मानां लक्षणम्

सन्तो बालाः प्रातस्तरां प्रबुध्येरन्; शय्योत्थायम् ईश्वरं ध्यात्वा स्नानेन शुचयो भवेयुः, यतः शरीरशौचमारोग्यमुख्यकारणेष्वन्यतमम्. अनन्तरं ते धौतमंशुकं परिधाय यथाकुलाचारं जपित्वाधीतं पाठं सम्यगभ्यस्येयुः; अथ यथोपपन्नमन्नमभ्यवहृत्य प्रतिदिवसं यथाकालं पाठशालायां सन्निदधीरन्, न तु जातुचित् शिरोवेदनेति वा, उदरबाधेति वा, गृहे श्राद्धादिकमिति वा वृथा व्याजानुल्लिखन्तो गृह एव विश्राम्येयुः; कुत इति चेत — ते तादृश्यामवस्थायां जीविकाव्यापारेषु तथा व्याजोल्लेखनमशक्यमिति स्वयमेव जानीयुः. अभ्यस्तं पाठं तत्र सम्यग्विशोध्योपाध्यायस्योपदेशानेकाग्रमानसा गृह्णीयुः.

किञ्च ते पाठशालायामुपाध्यायस्य सच्छात्राणां वा वैमनस्यमल्पमप्यजनयन्तः सर्वदैव विनीता वर्तेरन्; स्वानि पुस्तकानि पांसुस्वेदादीनामनुषङ्गाद्रक्षेयुः; पुराणान्

पाठान् मुहुश्चिन्तयेयुः, तत्र सम्यगप्रतिभातान् विषयान् सच्छात्रं गुरुं वा पृष्ट्वावधारयेयुः.

दैनन्दिनाध्ययने वृत्ते गुरुणा दत्तायां गृहगमनाभ्यनुज्ञायां विद्यया सह कायबलस्याप्यवश्यार्जनीयतया ते समानवयस्कैर्बालैः साकं क्रीडेयुः. अव्यायामो हि जनो रोगी भवेत्; रोगिणश्च बलं हीयेत; अबलश्च महापण्डितोऽपि परस्यात्मनो वा नैषदप्युपकाराय कल्पेत.

एतच्च मुख्यं लक्षणं सतां बालानां—यत् ते मातापित्रोर्हितोपदेशवाक्यान्यादरेण शृण्वन्तः सर्वेषु कृत्येषु तयोर्मतमनुसरेयुः.

यस्तु स्वच्छन्दवृत्तिः पित्रोर्हृदयं दुनोति, स बालको दण्डनामवश्यं लभेत.

---

३. भूमिः स्थलम्.

अस्माभिरध्युष्यमाणा भूमिर्विपुला नारङ्गफलवन्निस्तलाकृतिश्च विद्यते. प्रायोऽस्याः ² भागौ जलमयौ, ⅓ भागः स्थलम्. यद्येवं भूमेरवस्थितिर्नाभविष्यत्, तदा मनुष्यभोग्यः सर्वोऽपि स्थलभागो बहोः कालात् प्रागेव भृशमुच्छुष्को मरुरभविष्यत्. भूमावुन्नताः पर्वता गिरिपादा निम्नदेशा आजयश्च सन्ति. पर्वतेषु प्रस्रवणानां

तच्छिखरेषु हिमघनानाञ्च भावात् तेभ्यो नगनिम्नगाः सिन्धवश्चोत्पद्य समन्तात् स्यन्दमानाः स्थलं कृष्यर्हं कुर्वन्ति. अनतिदन्तुरा भूमिराजिरित्युच्यते, समभूमिरपि च. उन्नतेऽवनते समे वा प्रायः सर्वस्मिन्नपि स्थले नानाविधा वृक्षाः पुष्पलताः सस्यानि तृणानि चोत्पद्य भूमिमलङ्कुर्वन्ति. उष्णदेशेषुच्छायाया अवश्यमपेक्षणात् छायावृक्षा बहुला जायन्ते, शीतकोष्णेषु तु न तथा. भूमेरतिशीतल-योर्दक्षिणोत्तरभागयोर्वृक्षा एव न प्ररोहन्ति. किन्तु कृशानि लशुनानि तृणानि च केवलम्. भूमेरूर्ध्वमूर्ध्वं शैत्यस्य अन्तरन्तरूष्मणश्च क्रमेणाधिक्यमवलक्ष्यते. भूमेरुपरिक-पालं क्रोशपञ्चशतीमात्रमिति. तदन्तरा गर्भे बहुप्रकारा लोहादयः पदार्थाः क्वथिता द्रवीभूय प्रवहन्तीति च पण्डिता अभ्युह्य वर्णयन्ति.

४ निर्बन्धः

कुतश्चिद् ग्रामाद् ग्रामान्तरं गच्छन् पान्थः कश्चिद् द्रामिलः कस्यापि सरस्तीरे स्थितस्य तरोरेककस्य मूले स्वीयमश्वं बद्ध्वा जलाभ्यर्णे पाथेयमभ्यवहरन्नासाञ्चक्रे. तदा कश्चन पथिको यवनस्तत्र विश्रमार्थमवतीर्य स्वीयमप्यश्वं तत्र वृक्षे बन्धुं तदन्तिकमुपससार. तथाभूतं तमालोक्य स भुञ्जानो द्रामिल उच्चैःकारमाचचक्षे—'ममाश्वो

बलवानदान्तश्च ; दुर्बलं तवाश्वं मा तेन साकं भान्त्सीः' इति. यवनस्तु 'तत्रैव बध्नीयाम्' इति सनिर्बन्धस्तं बद्ध्वा तत्रैव तीरे नातिनिकटोपविष्टो भोक्तुमारेभे. ततः क्षणान्मिथ आरब्धकलहं तदश्वयुगलं यावत् तत्स्वामिनौ द्रुततरमागत्य विनिवारयतस्तावद् द्रामिलाश्वो यवनाश्वं निर्दशनैः पादाघातैश्च प्रमीतं चकार. अथ कुपितो यवनो हठाद् द्रामिलमाकर्षन् प्राड्विवाकमुपगम्य 'ममाश्व एतदश्वेन हतः; तदनेन तन्मूल्यं दाप्यम्' इति प्रार्थयत. ततः 'किमत्रोत्तरं वदसि' इति प्राड्विवाकेन बहुकृत्वः पृष्टोऽपि द्रामिलः किमप्यब्रुवन् मूक इव स्थितः. तदा प्राड्विवाको यवनं जगाद— 'मूकः खल्वसौ, किमनेन कुर्याम्' इति. पुनर्यवनोऽब्रवीत्— 'आर्यमिश्र ! कुहकोऽयं, न तु मूकः यतो मय्यश्वबन्धनाय वृक्षमूलमुपसरति "तत्र त्वदश्वं मदश्वेन सह मा भान्त्सीर्मा भान्त्सीः" इत्युच्चैरुद्घोषति स्म' इति. प्राड्विवाकस्तद्वाक्यं श्रुत्वा प्रहस्य 'तर्हि त्वदश्वमूल्यमनेन दापयितुं न कश्चिद् न्यायोऽस्ति' इत्युक्त्वा यवनं विसर्जयामास.

वञ्चको भृत्यः

कोऽपि धनिको महता मूल्येन क्रीतमेकं मरकतरत्नं स्वभृत्यस्य हस्ते समर्प्य 'रत्नमिदं मम गृहिण्याः करं प्रापय' इत्युक्त्वा तं प्राहिणोत्. स भृत्यो यथा[illegible]

७. विज्ञानफलम्.

'ज्ञानं सर्वार्थसाधनम्' इति वाक्यं विद्वन्मुखात् कोऽपि राजा निशम्य तस्य यथार्थतां परीक्षितुकामः स्वपुत्रयोर्द्वयोः कनीयांसं शास्त्राध्ययनाय सदाचार्यस्यान्तेऽवासयत्. ज्येष्ठाय च कालेकाले प्रचुरं धनमात्रं ददानोऽवर्तत. क्रमेण कनीयान् विद्यायां सदाचारे च परिनिष्ठितोऽभवत्. ज्येष्ठस्त्वनुक्षणमुपैधमाने धने मदमानभरितो बभूव. तयोर्यौवनदशामधिरूढयोः कुतोऽपि हेतोर्दवीयान् विदेशो गन्तव्य आसीत्. पूर्वजः सञ्चितं स्वधनमखिलं गृहीत्वा तमभि प्रतस्थे. अनुजः पुनर्विद्यामेव विदेशे सहायं मन्यमानः स्तोकमपि धनमनादाय तमन्वगच्छत्. प्रयाणके क्वचिद्रात्रौ चौरेषु धनपेटिकां लुण्टितुमुद्युञ्जानेषु दैवात् तत्स्वामी प्रबुद्ध. ततस्ते तामलुण्टित्वैव पलायन्त. अथापि तदा प्रभृति त्यक्तनिद्रं दिवानिशं धनरक्षणार्थे खिद्यमानं भ्रातरं दृष्ट्वानुजेनापि तत्र साहाय्यं कृतमासीत्. ईप्सितं च देशं तयोरासादितवतोर्ज्येष्ठः कनिष्ठाद् वियुज्य विवेकशून्यतया वृथाविनियुक्तसर्वद्रव्योऽधमर्णीभूयान्ते कारानिरोधं प्रपेदे. कनिष्ठस्तु तत्रत्यं राजकीयं विद्वत्समाजमाश्रित्य तत्संवासरसिकोऽवर्तिष्ट. श्रुत्वा चास्य गुणोत्कर्षं तद्देशाधिप एनमाहूय स्वान्तिके वासयाम्बभूव; सुप्रीतश्चास्मै कन्यामात्मनः सम्प्रददे; सदारं चैनं प्रभूतधनपरिवारं कृत्वा स्वदेशं प्रति प्रास्थापयत्.

इत्थम्भूतमेनं प्रत्यागतं वात्सल्यात् पिता भृशमभ्यनन्दत्. काले स कियतिचिद् व्यतीते ज्ञानसत्यनीतिभिर्धैर्यदयादिभिश्च महागुणैः शोभमानं राजपदार्हमेनं मन्यमानः स्वराज्येऽभ्यषिञ्चत्. अथ प्राप्तराज्योऽयं विज्ञाय चरमुखाज्ज्येष्ठवृत्तान्तं भृशदुःखितस्तूर्णमेव तमृणाद् विमोच्य स्वपुरमानिनाय. एतेन—

"अशेषाभ्युदयोत्पादनिदानत्वान्न केवलम् ।
इतरानपहार्यत्वादपि विद्योत्तमं धनम् ॥"

इत्ययमर्थो निर्णीतः.

अश्वो गर्दभश्च.

मृगा नाम नानाजातीयाः. तत्र केचिदारण्याः केचिज्जानपदाः. तेषु केचिन्मनुष्याणां भृशमुपकाराय भवन्ति. अश्वा हि तीक्ष्णबुद्धयो महनीया मृगाः. वन्याश्वा गर्दभेभ्योऽपि निकृष्टरूपाः. उभये चैते एष्याखण्डमध्ये बहुलाः सन्ति. अश्वाः स्वं स्वामिनं सम्यग् विजानन्ति; तस्य कैङ्कर्यं निर्व्याजमाचरन्ति; तद्वचनतात्पर्यं, प्रग्रहेण जानुभ्यां चरणाभ्यां च तेन क्रियमाणाः संज्ञाश्च विदित्वा तदनुसारेण वर्तन्ते. जवनास्ते निमेषद्वयेनार्धक्रोशं गच्छन्ति. पारसीकदेशोत्पन्नास्ते उत्तमा इति प्रसिद्धाः. तान्

पारसीकाः कुटुम्बानीव पुष्णन्ति. वृषभा इवाश्वाः शकटान् हलानि च कर्षन्ति; मनुष्यांस्ततोऽपि गुरुतरान् भारांश्च वहन्ति. गर्दभा अप्येवम्.

ग्रामगर्दभा अल्पाकृतयो गतौ बुद्धौ च मन्दाः. सहनतया निसर्गतो दान्ततया च ते न गण्यन्ते, न च रक्ष्यन्ते. तान् भारतीया मार्गपरिसरेषु, ग्रामबाह्यदेशेषु चाभ्यवहारगवेषणार्थं विसर्जयन्ति; तेषां पृष्ठेषु महान्तं भारमारोपयन्ति; तद्वशाच्च तान् स्खलतो दण्डप्रहारैर्वि- द्रावयन्ति. पुनररण्ये देशविशेषे च समुन्नता दृढदेहबन्धा बलवन्तो गर्दभाः सन्ति. पुरा प्रभवस्तान् वाहनीकरणेन रथ्यीकरणेन चोपायुञ्जत. अद्यत्वेऽपि ईजिप्त, स्पेयिन, अमेरिकादिदेशेषु जना गर्दभानत्यर्थमाद्रियन्ते. तत्र गर्द- भानां पादा न स्खलन्ति. अश्वापेक्षया तेषां तीक्ष्णतरा बुद्धिः; आयुश्च दीर्घतरम्.

---

९. मूर्खा भृत्याः.

पुरा दक्षिणापथे बहुवित्तपरिजनः कश्चिद् धनिक आसीत्. स कदाचित् स्वशिबिकावाहिनो गवार्थे तृणा- नयनायादिदेश. तेऽवदन्—'वयं शिबिकावहनं विना नान्यत् कर्म कुर्याम' इति. स पुनरपि कचिद्दिने नष्टस्य गोवत्सस्यान्वेषणाय तानादिक्षत्. तदापि ते 'वयं शिबि-

कावाहिनो न गोपालकाः' इति वदन्तः स्वाम्याज्ञामत्यवर्तन्त. ततस्तेषां सद्बुद्धिमुत्पादयितुमिच्छुर्धनिकः शिबिकानयनाय तानाज्ञापयत्; उपस्थापितां शिबिकामधिरुह्य मध्याह्ने तैरुह्यमानो गोवत्सान्वेषणाय प्रस्थितः कण्टकाकीर्णासु ग्रामबाह्यस्थलीषु शिबिकावाहांस्ततइतो गमयन् खेदयामास. ते चिरमुग्रातपे भारवहनाच्चङ्क्रमणाच्चोपहतजानुपादा 'इतः परं चलितुं न शक्नुमः' इत्यवसन्नगात्रा आचक्रन्दुः. स्वामी तान् निर्भर्त्स्य 'शिबिकावहनं युष्माकं नियोगः. अतो मा स्म तिष्ठत. गच्छत शीघ्रम्' इति चोदयन्नतीव श्रमयाञ्चकार. तदाप्रभृति लब्धविवेकास्ते न जातुचित् स्वाम्याज्ञामुदलङ्घयन्.

---

१०. अपत्यविवादः

गृह एकस्मिन्नेकापत्ये द्वे स्त्रियाववसताम्. कश्चन रात्रौ तयोरेकस्या अपत्यं मृतमभूत्. तदादाय तन्मातान्यस्याः स्वपत्याः पार्श्वे निभृतं निधाय तदीयमपत्यं स्वयमपाहरत्. प्रभाते च ते 'जीवदपत्यं मदीयं मदीयम्' इति विवदमाने राजानमासेदतुः. स च साक्ष्यभावाद् निर्णयोपायं मनसिकृत्य वधाधिकृतमाहूय 'जीवतः शिशोश्छिन्नस्यैकमर्धमेकस्या अपरमर्धमन्यस्यै च दीयताम्' इत्यादिष्टवान्. तच्छ्रुत्वा तयोरेका 'न्याय्योऽयं निर्णयः. छि-

द्यतां शिशुः' इत्याह स्म. अन्या तु वेपमानावयवा 'राजन्! शिशुरेष तस्या एव दीयताम्; सर्वथा मैनं मारयत' इति प्रार्थितवती. ततश्चेयमेवापत्यवत्सला शिशोर्मातेति निश्चिन्वंस्तस्यै स शिशुं समर्पयितुमादिशत्; प्रत्यर्थिनीं च ताडयित्वा कारागृहे निवेशयामास.

---

११. (क) उपकारो न निष्फलः.

कदाचित् प्रातः कश्चन बालो गृहीतपाथेयो दिनान्तात् प्रागेव प्रतिनिवर्तितुं कृतनिश्चयो ग्रामान्तरं प्रस्थितः. मार्गे कोऽपि श्वा गच्छन्तं तमुत्पुच्छयमानः प्रत्यासदत्. श्वा क्षुत्पीडित इत्याकारेण विदित्वासौ बालः कृपार्द्रमना आत्मनोऽन्नहानिमगणयन् पाथेयात् कबळमेकं तस्मायार्पयत्. ततः किञ्चिद् दूरमतिक्रान्तोऽयं जरठं कञ्चिदश्वं मार्गपतितमालोक्य तस्य बुभुक्षातुरतया स्पन्दितुमपि शक्त्यभावं विज्ञायेत्थमचिन्तयत्—'यद्यहमस्य तृणाहरणार्थे कांश्चित् क्षणानुपयुञ्जीय, तदा स्वग्रामाय प्रतिनिवर्तनात् प्राक् सूर्योऽस्तं गच्छेत्. चौरप्रचुरश्चायं पन्थाः. तथापि मृगरक्षणमेव परमो धर्मः' इति. ततइतस्तृणान्याहृत्य चासौ तस्याग्रे व्यकिरत्. तेषां चर्वणादश्व उपशान्तक्लमः शनैरुत्थाय चलितुं प्रवृत्तः. ततः किञ्चिद् दूरं गतः सरसि तिष्ठन्तमितिकर्तव्यतामूढमिव लक्ष्यमाणं क-

श्चित्पुरुषमवलोक्य 'भोः! किं तत्र करोषि?' इत्यपृच्छत्. 'भद्र! अहमन्धः; प्रमादात् सरसि पतित इतश्चलितुं बिभेमि' इति स प्रत्युवाच.

बालको 'हन्तैवं मम समयो हीयते. अन्धश्चायं नोपेक्षणीयः' इति विचिन्त्य अवनतपूर्वकायः करं प्रसारयामास. तमवलम्ब्यान्धः पन्थानं प्रतिपन्नः 'कारुणिक! मत्प्राणत्राणकारिन्! न ते दुःखं भविष्यति' इत्याशिषा बालमभिननन्द; अकथयच्च—'भद्र! इतो मदर्थे कालं मा हार्षीः. अहं कथं कथमपि स्खलित्वा स्खलित्वा गृहमासादयेयम्' इति. ततस्तदा दिनान्तस्य प्रत्यासन्नत्वाद् विघ्नापहृतस्य समयस्य प्रत्यापत्तये महान्तं वेगमाश्रित्य धावति बालेऽन्यः प्रत्यूह आपतितः. पङ्गुर्हि कश्चित् पर्पेण चरन् 'प्रभो! ईशस्त्वामभिरक्षतु. युद्धे नळिकभिन्नपादः पङ्गूभूतो दीनोऽहम्. क्षुन्मामतीव पीडयति. यत्किञ्चिदभ्यवहाराय देहि' इति बालमयाचत. बालः पाथेयभाण्डस्थं भुक्तशिष्टं सर्वं तस्मै समर्प्य द्विगुणवेगं धावन् दिनावसाने ग्रामान्तरं प्रापत्; तत्र च कार्यं निर्वर्त्य स्वगृहं प्रत्यागच्छन् कतिपयैः क्षणैः परितः प्रसृत्वरे तमसि भ्रष्टवर्त्मा किमपि वनं प्रविश्य बभ्राम.

---

१२. (ख) उपकारो न निष्फलः.

वने तस्मिन् स बालो यत्नेनान्विष्यन्नपि मार्गमनुपलभमानः क्वचन शिलातले शयितः 'अहो बत ममेदृशी भवितव्यता' इति साक्रन्दमरोदीत्. तदा प्रातर्वितीर्णाहारः स श्वा कमप्यल्पकं भक्ष्यपूलं ग्रन्थौ सन्दश्य यदृच्छयापतंस्तदध्वन्यनुसारेण तदन्तिकमुपससार; तदग्रे च तं भारं चिक्षेप. बालस्तं श्लथीकृत्य तत्स्थं भक्ष्यजातमभ्यवजहार; 'अहो शुनेऽपि कृत उपकारो न व्यर्थो जात' इत्यभिधाय तदङ्गं च प्रीत्या परामर्श. ततः किञ्चिदिव शान्ते श्रमे सरणिगवेषणायै पुनरुद्यतस्य ततइतश्चरतस्तस्य पादौ तीक्ष्णकण्टकक्षतावभूताम्. तद्व्यथया गन्तुमशक्तस्तत्क्षणप्रसृते चन्द्रिकाप्रकाशे दिवासम्भावितमश्वं तत्र तृणानि भक्षयन्तं दृष्ट्वा तत्समीपमगमत्. ततः करतलपरामर्शैस्तमुपलाल्य यावदयमारुरुक्षामदर्शयत्, तावदश्वः स्वपृष्ठे तमारोप्य समीचीनं पन्थानमवाहितः प्रापयांचकार. बालो 'यद्यहं प्रागिममश्वं नारक्षिष्यं, ध्रुवं तत्र कान्तारे महाक्लेशमन्वभविष्यम्. दिष्ट्या सुकृतमकरवम्. न हि तत् फलमनुत्पाद्य विरमति' इति तुतोष.

ततो गच्छतस्तस्य द्वौ चौरावागत्य वस्त्राणि चोरयितुमारभेताम्. किन्तु पूर्वोपकृते शुनि तत्क्षण एव प्रधाविताभिगते स्वपादौ दन्दश्यमाने, 'इतस्ते पापास्तिष्ठन्ति,

शीघ्रमागच्छत, तान् निहन्मः' इत्युच्चस्वरायां च वाचि श्रूयमाणयां तौ चौरौ पलायिषाताम्. किमिदमिति च पश्चाद्दत्तदृष्टिः स बालो दिवाभुक्तस्वान्नशेषं तं पङ्गुमात्मनैव तटाकादुत्तारितस्य तस्यान्धस्य स्कन्धेऽधिरुह्यागच्छन्तमपश्यत्. तं च स पङ्गुर्जगाद—'तात! क्वचन मार्गद्रुममूले शयानावावां "कश्चिदेकाकी जनो गच्छति, तं प्रहृत्य मुष्णीवः, आयाहि" इति कामपि वाचमश्रृणुव. ततस्त्वामेवैकाकिनं प्रत्यागच्छन्तं सम्भावयन्तौ मदुपदिश्यमानमार्गे मां स्कन्धेन वहत्यन्धे द्वावपीहागत्य चौरत्रासनामुद्घोषणामकार्ष्व. सेयं दैवात् तवोपकारायाभूदिति महानावयोः प्रमोदः' इति. श्रुत्वा चैतद् बालो भृशमतुषत्; तदाप्रभृति च मनुष्ये मृगेऽन्यस्मिन् वा प्राणिन्यार्ते दृष्टे नियमेनोपकारपरो बभूव.

---

१२. सत्पुत्राः

शिशिलिद्वीपे एतनाभिधानः कश्चिदग्निपर्वतोऽस्ति. स स्वभावात् शिखरेभ्योऽग्निं द्रुतशिलाद्रवांश्च कदाचिदुद्वमेत्. शिलाद्रवाश्च प्रच्युत्य पर्वतप्रान्तदेशेषु स्यन्देरन्. पुरा कदाचित् तान् बहुलमुद्गिरति तस्मिन् गिरौ तत्परिसरग्रामेभ्यो जनाः स्वस्वधनेषु प्रशस्तान्यादाय प्राणपरित्राणार्थमन्यत्राधावन्. तैः सह स्वकीयधनानि गृहीत्वा

गच्छन्तौ द्वौ भ्रातरौ जराजर्जरतया सहसा सहचरितुमक्षमं पितरं मातरं चा वेक्ष्य 'आवां प्रसूय पुष्टवद्भ्यां मातापितृभ्यां श्रेष्ठं न किञ्चिद्धनं लोकेऽस्ति' इति मिथः कृतविमर्शौ सर्वस्वपरित्यागेनापि मातापितृरक्षणमेव परमं धर्मं निरचिनुताम्.

ततश्च शिरःस्थं सर्वं प्रशस्तधनभाण्डजातं दूरे निरस्य ज्येष्ठः पितरमन्यो मातरं च पृष्ठे समारोप्य वहन्तौ भयशून्यं स्थलं प्रापयाञ्चक्रतुः। ताभ्यां च मातरपितरौ वहद्भ्यां यया वीथ्या प्रचलितं, तस्यास्तदाप्रभृति 'सत्पुत्रमार्ग' इति नाम प्रसिद्धमभूत्.

---

१४. जम्बुको, द्राक्षा च.

कदाचित् कश्चिज्जम्बुक आहारार्थमटाट्यमानः क्वचिद् द्राक्षालतायां लम्बमानं पीवरफलजालं मनोरमं वृन्तमेकमपश्यत्; उन्नम्योन्नम्य च तद् वृन्तमुच्चेतुं यावच्छक्ति प्रयत्नमकरोत्; तथाप्युन्नतदेशस्थतया तद् ग्रहीतुं न शशाक. एवमात्मोद्यमं विफलमवधार्य 'धिग्धिगम्लमेवेदं द्राक्षाफलम्; यदीच्छेयं, किमहमिदमनायासेन नोच्चिनुयाम्?' इति उपांशु जल्पन् सावज्ञ इव स जगाम. एतेन लिप्सिते पदार्थे तदलाभनिश्चयानन्तरमनिच्छाया। अभिनयनमुपहसनीयमिति फलति.

१५. शुनको बकश्च.

कश्चिदजपोतं हत्वा सगर्धं भक्षयतः कस्यचित् शुनकस्य कण्ठनाले अस्थिशकलमेकमलगत्. स तत् स्वयमुद्धर्तुं कथञ्चिदप्यशक्नुवन् बकं कञ्चिदुपगम्य 'यदि त्वं मद्गलविवरलग्नमस्थिखण्डं दयया समुद्धरेः, तर्ह्यवश्यमनुरूपं ते पारितोषिकं दद्याम्' इति प्रह्वः प्रार्थयत. बकश्च 'तथा' इत्यभिधाय, दीर्घां स्वग्रीवां व्यात्ते तदास्ये प्रसार्य चञ्च्वग्रेण शनैस्तदस्थिखण्डं बहिर्निस्सारयामास. ततः 'क्व तत् त्वया प्रतिश्रुतं पारितोषिकम्' इति पृच्छन्तं तं बकम् 'अरे मूढ! मद्दन्तान्तरालोपनतं तव शिरो झगित्यदशता मया यदुपेक्षितं, तत् किमनुरूपं ते न पारितोषिकम्?' इति स उक्तवान्. एतेन क्षुद्रेषु प्रत्युपकारप्रत्याशा न कार्येति सिध्यति.

१६. उदरम् अवयवान्तराणि च.

कदाचिदवयवाः सर्वे सम्भूय 'कुक्षिं पूरयितुमस्मासु श्रद्धयानुवेलं प्रयस्यत्सु फलमेव केवलमस्मत्प्रयासस्यानुभवन् स्वयमयं तूष्णीमास्ते' इत्युपजातासूयाः कुक्षिणा सहाकलहायन्त. ततः 'अद्यारभ्य कुक्षिं न वहेव' इति पादयोः, 'आस्ये नान्नमर्पयेव' इति करयोः, 'अन्नमादाय न गिरेयम्' इत्यास्ये च वदत्सु, दन्ता 'नान्नादिकं मृद्-

कुर्याम' इत्यब्रुवन्. 'अन्नं नान्तरवतारयेयम्' इति कण्ठनालमकथयत्. एवं मिथः कृतसंविदः सर्वेऽवयवा दिनद्वयं निर्व्यापाराः स्थिताः. तृतीये दिवसे कुक्षावाहारानर्पणात् प्राप्तकार्श्ययातनाः सानुतापाः सद्यः स्वस्वकर्मसु यथापूर्वं व्यापरितुमारेभिरे. इत्थञ्च सर्वासु जातिषु कश्चित् प्रधानं कृत्वा केश्चित् तदुपासना कर्तव्यैवात्महितायेति फलति.

१७. नासा चास्यं च.

मुखस्यैकदेशभूतया नासया गन्धं गृह्णीमः. सास्मत्सुखविरोधिनो वस्तुनः सत्तामागादागमनं च निवेदयति; अचारोरभ्यवहारस्य कबलनं नानुमन्यते. एतदर्थमेवास्यस्य ऋजुरेखोर्ध्वभागे सा भगवता संश्लेषिता. तद्द्वारा श्वसिमो वयम्; प्राणाश्च श्वसितेन ध्रियन्ते. मृदुलमेकमस्थि नासानालदण्डो भूत्वा नासारन्ध्रे विभजते. तत्र विद्यमानानि लोमानि परागादेरन्तःप्रवेशं वारयन्ति. पन्थाः कश्चिन्नेत्राभ्यां नासामुपतिष्ठते; तेन नयनयोरश्रु मुञ्चतोर्नासिका निष्यन्दिनी भवति. एवं नासाया आस्यान्तस्य च द्वारमस्ति.

अस्माकं व्याहरणे भोजने च करणमास्यम्. ओष्ठौ दन्तान् पालयतः. अत एतौ दन्तवासश्शब्देनोच्येते.

आहारं च तौ तेषु लघूकुर्वत्सु बहिरवपाताद्रक्षतः. उच्चारणे च केषाञ्चिद्वर्णानां तावनुकूलौ भवतः. दन्ता ऊर्ध्वपङ्क्तावधरपङ्क्तौ च षोडशशो द्वात्रिंशत् सन्ति. राजदन्तौ विशालौ सतलौ चारू च. ताभ्यां वयं दशामः. तदनन्तरं स्थिताः श्वरदसदृशा निशिताग्रा रदना अभ्यवहार्यखण्डने, पार्यन्तिका दन्ताः सतलत्वात् सुखजीर्ण्यानुगुण्येनाभ्यवहारमृदूकरणे चोपयुज्यन्ते.

आस्वाद्यस्य रसमास्योर्ध्वभागेन संयुक्ता जिह्वा वेदयते. वर्णविशेषान् प्रति तयोरुत्पत्तिस्थानतापि वर्तते.

मनुष्यभिन्नाः प्राणिनः स्वाभिप्रायमुच्चावचैर्ध्वनिभिराविष्कुर्वन्ति; भाषणं तु तेषामशक्यम्. मनुष्यः खल्वेकः स्वाशयं वाचा प्रकाशयितुं शक्तः.

---

१८. जडसहवासः परमानर्थः.

नानारूपाणि दर्शनीयानि नगरे सन्तीति श्रुतपूर्वी कश्चिज्जडस्तानि द्रष्टुकामो दूरात् स्वग्रामात् किञ्चित् स्वस्यालाध्युषितं नगरं जगाम; तत्र स्यालगृहे रात्रौ सर्वेषु भुञ्जानेषु प्रदीप्रमजिरे कमपि दीपविशेषं ददर्श; विस्मितश्च स्यालं पप्रच्छ 'किमिदम्' इति. नागरिकोऽस्य जडिमानं मनसोपहसन्नुवाद 'स एष दुष्प्रापः सूर्यशाबको नाम सांयात्रिकैर्दवीयसः समुद्रद्वीपादिहानीत' इति. स भ्रान्तो

यथाजातः 'ईदृशं वस्त्वस्मद्ग्रामस्था वीक्षमाणा विस्मयेरन्' इति मत्वा दीपलुण्टनायावसरप्रतीक्षी स्थितः. भुक्त्यनन्तरं च सर्वेषु स्वस्वकर्मणि व्यासजत्सु स ग्राम्यः 'स्वग्रामं प्रति प्रस्थानसमये नेष्यामी'ति कृतनिश्चयस्तं दीपमन्याविदितं गृहीत्वा तस्य गृहस्य पटलान्तराले निलीनयामास. क्षणेन तत्र सन्दीप्तोऽग्निः पटलं गृहं तद्गतं धनं च निर्ददाह. तत्र शान्तप्राये ज्वलने गृहस्वामिन्यौपवेशिकेषु च दग्धावशिष्टं विचिन्वानेषु ग्राम्योऽपि अन्वेषणव्यग्रस्तत इतो भस्मकूटं परिवर्तयन्नुल्लोलयंश्च चचार. अन्यैर्विचये समापितेऽपि त्यक्त्वा त्यक्त्वा लभ्यमानमन्वेषणानुवर्तनेन श्राम्यन्तं तमपरे जगदुः—'भद्र! किं नाम भवानतिचिरमन्विष्यन्नेवं क्लिश्यते?' इति. स बभाण—'गृहेऽग्निसंदीपनात् पूर्वं सूर्यशावको मया गृहपटले निहितः. सोऽयमिदानीं गवेष्यमाणो न क्वापि लभ्यते' इति. तच्छ्रुत्वा जनास्तं सन्ताड्य सद्य एव नगरान्निष्कासयामासुः. किन्त्वेतावतापि स मूर्ख आत्मसन्ताडनकारणं न विदितवान्; न वा नागरिको नष्टं द्रव्यं प्रतिलब्धवान्.

---

१९. निष्कुटः केदारं नारिकेळः तालश्च.

वृतिभिर्भित्तिभिर्वा कृतपरिरक्षं, प्ररोपितौषधि गृहपरिसरस्थलं निष्कुट इत्युच्यते; वृतिभित्तिशून्यं सीमा-

सेतुपरिवेष्टितं नियतजलोपपत्तिकं स्थलं केदारमिति. तत्र निष्कुटे शाकोपयोगिन्य ओषधिलताः फलदायिनो वृक्षाः पुष्पप्रदा वल्लयश्च संवर्ध्यन्ते. केदारे गोधूमादीनि शूकधान्यानि शालयश्च फलन्ति. अनियतजलोपपत्तिके बहिःस्थले माषमुख्यानि शमीधान्यानि नीलीकार्पासादिकं च प्ररोहन्ति. कूपात् सरसश्च निष्कुटे जलमानीयते. अवृष्टौ जलाशयान्नद्याश्च नीरं कुल्याद्वारा केदारं गमयन्ति कृषिकाः. अविच्छेदेन कृषिकरणात् केदारस्य सारो हीयत इति कृत्वा तत्सम्पत्त्यर्थं तत्र गोमयादि दोहदं निवेशयन्ति.

एतद्देशप्ररोहिषु स्थावरेषु मुख्यो नालिकेरः. तस्याङ्गमङ्गं सप्रयोजनं दृश्यते. तस्य मूलभागेनावपनं पत्रैर्गृहपटलमावरणवृतिः पेटी च क्रियते. अपरिणतफलान्तर्गतं जलमुष्णसमयेषु पीतं स्वादुहितं भवति; परिणतं फलं खाद्यते. तैलयन्त्रनिष्पीडिताच्च तस्मात् स्नेहोऽवतार्यते. नारिकेळतैलं यूरोपखण्डे दीपवर्त्तिनिर्मितौ बहुलमुपयुज्यते. फलत्वक्तृणैर्दाम महारज्जुश्च निर्मीयेते. आस्तरणमपि तया ऊयते; फलकपालं पात्रस्थाने प्रतिनिधीयते; तेन चार्धितेन दर्वी निष्पाद्यते; पल्लवकाण्डाद्रसश्च्योतति; तञ्च सन्ताप्य मद्यमापादयन्ति; भूक्लेदञ्च केरद्रुमो नित्यमपेक्षते.

तालद्रुमस्य तु जलावसेचनं नावश्यकम्. सस्या न्तरप्ररोहणायोग्ये सिकतिले स्थले सोऽतिशयेन वर्धते अस्योपयोगः केरवद् वेद्यः.

---

२०. उद्यमः.

उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः ।
षडेते यत्र वर्तन्ते तत्र दैवं प्रसीदति ॥ १ ॥
उद्यमेनैव सिध्यन्ति कार्याणि न मनोरथैः ।
हस्ते सुप्तप्रबुद्धस्य न ह्यायाति धनं स्वयम् ॥ २ ॥
यत् पूर्वजन्मविहितं कर्म तद् दैवमुच्यते ।
न तत् पुरुषकारेण विना सिध्यति जातुचित् ॥ ३ ॥
उद्योगिनः करालम्बं करोति कमलालया ।
तद्भिन्नस्य करालम्बं करोति कमलाग्रजा ॥ ४ ॥
आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ॥ ५ ॥
सम्पदा सुस्थिरम्मन्यो भवति स्वल्पयापि यः ।
कृतकृत्यो विधिर्मन्ये न वर्धयति तस्य ताम् ॥ ६ ॥
उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
दैवं प्रमाणमिति कापुरुषा वदन्ति ।
दैवं विहाय कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥ ७ ॥

---

२१. सत्यम्

अमेरिकाखण्डे संसृष्टदेशाभिधानस्य देशविशेषस्याधिपत्यमिदम्प्रथमं प्रतिष्ठापितवन्तं सुगृहीतनामानं (जार्ज) वासिन्तननामानं महाशयं प्रति काचित् कथास्ति. स किल बाल्ये कदाचित् स्वलब्धेन स्वल्पेन पारितोषिकधनेन खड्गमेकं चिक्राय. तेन खड्गेन गर्वायमाणः पितुरुद्याने ततइत ओषधिवृक्षशाखानां लवनचापलं सलीलमाचरन् पित्रातिस्नेहात् संवर्ध्यमानामजानन् बालबदरीमेकां छित्वापातयत्. तत्पिता समयान्तरे तत्र सञ्चरन् बालबदर्यास्तां दशां ददर्श; क्रुद्धश्च कर्मकरानाहूय 'मत्प्रियतमेऽस्मिन् वृक्षे केनेदं साहसमाचरितम्' इति विभावनां कुर्वन् स्थितः. तदा बालो वासिन्तन आत्मकृतं दौष्ट्यमबुध्यमानः खड्गपाणिस्तत्रागतः. दृष्ट्वा तं पितान्वयुङ्क्त— 'अपि जानासि पुत्र! मम द्रव्यकोटेरभ्यधिकमिमं वृक्षं क एवमवस्थमकरोत्' इति. स बालस्तु निश्शङ्कमूचिवान्— 'तात! न जाने तस्मिन् वृक्षे तादृशं तव प्रेमाणम्. अहमेव तं वृक्षमच्छिनदम्' इति. ततः कीदृशमयमपराधिनि दण्डं प्रणेष्यतीति चिन्ताव्याकुलेषु परिजनेषु सद्यः प्रशान्तकोपः पिता 'वरमेवंविधान् शतं वृक्षान्नाशयन्मम पुत्रोऽस्तु, न तु मिथ्यावादी' इति जल्पन् पुत्रमुपसृत्य पृष्ठे परामृशन्नभिननन्द.

---

२२. पृथिवी जलं च.

भूमौ महदपां धाम महार्णव इति कीर्त्यते, अल्पस्तु जलस्य राशिर्जलाशय इति. महार्णवस्य न सर्वत्रैकरूपं गाम्भीर्यम्. यथा स्थलं शैलराजिभिर्गर्तैश्च व्यतिकरितं बहुरूपं भवति, तथैव महार्णवः. अयं हि क्वचिदुत्तानः क्वचिन्निम्नः क्वचिच्चागाधः. अस्य जलमेकान्तलवणम्. यदि तत् तादृशं न भवेत्, शुक्तं पूतिगन्धि दुष्टं भूत्वाल्पेनानेहसा जीवराशिं निबर्हयेत्. यद्यपि महार्णवे जलं मनुष्या न पिबन्ति, तथाप्यात्मनीनं लवणं तत उत्पादयन्ति. लवणं खल्वाहारस्य रसनीयतां देहसौख्यं च जनयति. पानार्हपयसो नद्या जलाधारस्य कुल्यायाः सरसश्चाभावे जना भूमेरन्तर्ग्रावदुत्सदर्शनं खननेन कूपं निष्पाद्य ततो जलमुद्धृत्योपयुञ्जते. पेयेन जलेन प्रत्यग्रनिर्मलेन भाव्यम्. पेयजलशुद्धिविषये परिगृहीतश्रद्धाश्चेद्वयम्, अद्धा बहूनां हिंस्ररोगाणां विषया न भवेम.

महासमुद्रेषु प्रवाळकीटा नाम यादोविशेषाः स्वदेहात् प्रादुर्भवतो विलक्षणान् पदार्थानल्पशः संगृह्याधस्तलात्प्रभृति चयनं कुर्वाणा नवान् गिरिसन्तानसन्निवेशानुत्पादयन्ति. आ च जलोपरितलादुत्थितेष्वेतेषु पर्वतेषु वीचीमालाभिघातात् ततः प्रच्युता मृदस्तरङ्गोपनीतास्तृणपर्णादिव्यतिकीर्णा मृदश्च स्थलतां प्रतिपद्यन्ते. एषु

स्थलेषु पक्षिविष्ठाभिः सह बीजानि पतन्ति. ततस्तृणेष्वोषधिषु वनस्पतिषु च प्ररुह्य प्रवृद्धेषु तानि स्थलानि मनुष्यावासार्हा द्वीपा भवन्ति. एषु कतिपये तत्काले मनुष्यैरध्युष्यन्ते. मानुषानधिष्ठिताश्च द्वीपाः सन्ति.

---

२३. श्वा मार्जारश्च. (क)

श्वा रक्षिवत् स्वामिनो गृहं चौराणां दुर्जनानां वा प्रवेशाद्रक्षति. शुनो ज्ञानं विमर्शनशक्तिः स्वामिनि भक्तिः कृतज्ञता चेत्येते गुणाः सन्ति. स प्रियमित्रतुल्यो गणयितुं शक्यते. स पोषकस्य ध्वनिं दर्शनादिकाश्च चेष्टा वेत्ति. आघ्राणवेदने तस्यासाधारणः पटिमा. तमाघ्राणान्मृगानुपलभमानं दृष्ट्वा मनुष्यान्वेषणेऽपि तस्य चोदना पुरातनैराचरिता बभूव. सर्वं कर्म तेन शिक्षयितुं शक्यते. यूरोपखण्डे कचिदुत्तुङ्गायां गिरिश्रेण्यां पथिषु सान्द्रपतितं हिमं शिलावद् घनीभवेत. तत्र पान्थेषु कदाचिन्निमग्नेषु तानाघ्राणादुपलभ्य तदुपरि संहतं हिमं नखैरुत्खाय निरस्य तदत्याहितं भषणेनावेदयितुं समर्थां काञ्चित् कुक्कुरजातिं तत्रत्या जनाः संवर्धयन्ति. अजान् मार्गभ्रंशादपायाच्च त्रातुं कौलेयकानां नियोजनं जाबालानां साम्प्रदायिकम्. काश्चिदेव भषकजातय ईदृशेषु कर्मसु कुशला भवन्ति

स्काटलण्डदेशाभिजनः कश्चित् स्वीयं शुनकं प्रत्येवं वर्णयामास। यथा—'मदीयः सारमेयो मम बहूनुपकारान् कृतवान्. स मया दीयमानं नियोगं दुस्साधमपि नानोपायैः साधितवान्. गाढान्धकारे क्वचिन्निशीथे सप्त शतान्यजडिम्भानामकाण्ड उपजातक्षोभाणि प्रद्रुत्य प्रत्यासन्नस्याद्रेः सानौ ततइतो व्यशीर्यन्त. अहं मत्सहचरश्च यावच्छक्ति कृतप्रयत्नावपि नैव तानि क्वचिन्नियन्तुमशकाव. "हन्त गतगताः सर्वेऽजपोताः" इति मम प्रलपितं श्रुत्वा मद्रूषको मन्ये सद्य एव ततः प्रस्थित इति; अन्धतमसे तस्मिंस्तमन्तिके स्थितमस्थितं वा नावामज्ञासिष्व. ततोऽन्वेषणवशादानिशावसानमतिदूरमटित्वा कञ्चिदप्यजपोतमनुपलभ्य निर्विद्यमानावुदिते सूर्ये गिरिप्रस्थात् प्रतिनिवृत्तावभूव "यथावृत्तं स्वामिने निवेदयावः" इति.

---

२४. श्वा मार्जारश्च. (ख)

प्रत्यायान्तौ च कुत्राप्यद्रिद्रोण्यां सङ्घीभूतानजपोतांस्तस्या मुखे तिष्ठन्तं समन्ताद् दीयमानदृष्टिं प्रतीक्षमाणमिव नौ दृश्यमानं तं श्वानं चाद्राक्ष्व. "भ्रष्टेषु डिम्भेषु नूनमेते कतिपये सम्भूयधाविनः शुनावरुद्धास्तिष्ठन्ति" इति मत्वा तानुपसृत्य गणितवन्त्यामावाभ्यामविकला सा सप्तशती दृष्टा "कथं पुनरयं श्वा कार्त्स्न्येन विशीर्णान्

मेषार्भकानस्मिन्नर्धरात्रे समूहितवान्, कथं वा प्रभातं याव-द्रक्षितवान्" इति चिन्तयतोर्यत्सत्यमावयोर्विस्मयो जातः. अनेनैकेन शुना साधितं कर्म न खलु शक्यमस्मत्पल्लीभवैरजाजीवैर्मिलितैरपि सर्वैः कथञ्चिन्निर्वर्तयितुम्' इति.

मार्जारोऽस्माकं क्षुद्रोपद्रवावहान् मूषिकादीन् जन्तून् हिनस्ति. अयमावासस्थले परिचिते रज्यति न तु जने. अपिचैषच्छद्मवान् क्रूरशीलश्च. अयमतिचिरं कारित-संस्तवोऽपि प्रियैराहारैराराध्यमानोऽपि गृहे सहसंवर्धिनो मनोरमान् शकुनीन् रन्ध्रेषु प्रहृत्य भक्षयेत्. न तावज्जाहुकेन जलमिष्यते. क्रुध्येच्चेदयं, शूत्कृत्य तीक्ष्णैर्नखैर्गाढं विदारयेत्; यदि त्वेष तुष्येत्, नखान् सङ्कोच्यान्तराकर्षेत्; तदानीं च तस्य पदानि राजपट्टवन्मृदुलानि दृश्येरन्. अस्य शुनश्च शाश्वतो विरोधो लोके प्रसिद्धः.

---

२५ गौः महिषी अजा च

ग्राम्येषु पशुषु मानुषोपयोगी कश्चिज्जन्तुर्गौर्नाम. गोः क्षीराद्दधि तक्रं नवनीतं दुग्धघनश्च जायन्ते; गोचर्म मृदूकृतं तुरङ्गोपकरणायोपानदादये च कल्पते; विषाणेन च तक्षणसंस्कृतेन निर्मीयते पात्रं सम्पुटकः कङ्कतं त्सरुरन्यानि च नानोपकरणानि; खुरोऽग्निपक्वो वज्रलेपो भवति; अस्थीनि चेङ्गालितानि क्षेत्राणामुत्कृष्टो दोहदः. गौः

स्वभावादहिंस्रा मनुष्यवश्या च. इयं हरिणादिवद्रोमन्थं वर्तयति. एषा हि यावदपेक्षं पलालादिकमभ्यवहारं प्रथममखण्डितमेव निगिरति. स च चतुर्षु तदीयेष्वाहाराशयेषु प्रथमाशयद्वारेण द्वितीयाशयं प्राप्य स्थितः कैश्चित् क्षणैः सरसतामुपयाति. पश्चादनया सुखासीनया तथाभूतोऽभ्यवहार आस्ये प्रत्यानीय यथावदवखण्ड्य निगीर्णः क्रमात् तृतीयं चतुर्थं चाहाराशयं गत्वा जीर्यति. गवा च समानप्रयोजना महिषी; तथापि गौरिव न चारुरूपा न च शान्तस्वभावा. महिषा हलं शकटं च कर्षन्ति. प्रायो लुलाया न दर्शनेन, न श्रवणेन, किन्त्वाघ्राणेनैवार्थं विदित्वा गच्छन्ति. अत एव ते धावनसमये नियमेन ऋजून्नमितनासिका दृश्यन्ते विषाणं च माहिषं सारवत्तमम्. तत्र श्लक्ष्णीकरणं सम्यक् फलति.

एडकः शान्तात्मा भीरुश्च. छगलस्त्वतिधीरः; खरखिलेषु गण्डशैलेषु भीषणेषु च गिरिशृङ्गेष्वपर्यस्तोऽस्खलितश्च प्लुतानि कुरुते. मेषलोमभिरुच्चावचाः कम्बळाः सन्तन्यन्ते. मेषलोममयाः कश्मीरकम्बला गुणतोऽर्घतश्चोन्नता लोके गण्यन्ते. तुभाक्षीरं गोक्षीरान्मेदस्वितरं दर्शनीयतरं च. पुष्टिदत्वाद् भेषजत्वाच्च तन्मन्दाग्नीनां पथ्यमभ्यवहार्यं भवति

---

२६. ऋतवः

उत्तराहि भारते यूरोपे उदगमेरिकायां दक्षिणद्वीपेषु च प्रत्यब्दमृतवश्चत्वारः. ते च वसन्तो ग्रीष्मो हेमन्तः प्रावृडिति चोच्यन्ते. दक्षिणभारतस्य प्राग्भागेषु ऋतवः प्रावृट् शरद् हेमन्तः शिशिरो वसन्तो ग्रीष्म इति षट्. तत्राद्यः सिंहकन्ययोर्मासयोर्युगलमुच्यते, द्वितीयस्तुलावृश्चिकयोः, तृतीयो धनुर्मकरयोः, चतुर्थः कुम्भमीनयोः, पञ्चमो मेषवृषभयोः, षष्ठो मिथुनकुळीरयोः. एषु वसन्तो द्रामिलनां हृद्यः कालः. अत्र पक्षिणः समोदं खेलन्तः कुलायनिर्माणमारभेरन्. वनस्पतयश्च किसलयिताः प्ररूढदलवितानाः कोरकिता भूत्वा प्रफुल्लैः पुष्पैर्विराजेरन् क्रमेण पत्रेषु प्रसूनदलेषु च म्लायंम्लायं च्यवमानेषु फलकलिकाः प्रादुर्भूय शलाटूभूता ऊष्माभिघातात् क्रमेण परिणमन्तः फलतामृच्छन्ति. अत्र पक्षिणो मधुरं गायन्ति. नखलु तपर्तौ पक्षिणो न गायन्ति; किन्तु वृक्षशाखादिषु निलीना एव तदा ध्वनिं कुर्वन्ति. अत्रैव कालेऽण्डानि विहगाः प्रसूय तेभ्यः शावकान् प्रादुर्भाव्य पुष्णन्ति. आङ्गलेयानां सुखावहः समयो हेमन्तः. तदानीं पुष्पलताः समृद्धपुष्पा भवन्ति. शालिकणिशानि च पचेलिमैः सुवर्णसवर्णैः फलैराचितानि लवित्वा धान्यं सञ्चिन्वन्ति कृषिकाः.

वर्षासु तरुषु कुसुमानि न वर्तेरन्; तद्वदेव शाकुन्ताः, मृगाः खल्वपि भूतलक्लेदात् क्लिश्येरन् भूमेर्दक्षि

गोत्तरदेशेषु सरस्सु शीतवशाज्जलं शिलावद् घनीभवेत्. तत्र च बाला लोहमयं पादुकाविशेषं धृत्वा स्खलितप्रधावितं कुर्वन्तः क्रीडेयुः.

---

२७. कदली आम्रः तिन्त्रिणी वटः कार्पासः.

कदली चाम्रश्च फलदेषु तरुषु प्रशस्तौ. कदली एष्याखण्डे आफिरिकाखण्डे अमेरिकाखण्डे च प्ररोहति. उत्तमे कदलीप्रसव एकस्मिन् शतद्वयाधिकानि फलानि स्युः. अमेरिकाखण्डे केषुचिज्जनपदेषु जना मोचाशलाटुभ्यः शोषितेभ्यः सक्तून् सम्पाद्य तैरपूपं श्राणां च राधयित्वोपयुञ्जते. मोचासमानः क्षिप्रफलो वृक्षो न विद्यते.

दक्षिणभारते चूतः स्तोकार्घतया कट्फलखदिरस्थाने प्रतिनिधीयते. चूतेन हि वलीकानि गोपानस्यः कवाटानि पेटिका अन्यानि चोपकरणानि निर्मीयन्ते.

चिञ्चातरुरत्यन्तं सारवान्; यन्त्रनिर्माणे स बहुलमुपयुज्यते. तत्फलेन व्यञ्जनं रसश्च निष्पाद्यते. ईतिसमये दरिद्रा जनास्तत्फलानि बहुधा पक्त्वा भक्षयन्ति.

वटद्रुमः प्ररूढविततताभिः शाखाभिः, स्थूणोपमाभिः शाखाधारिणीभिः शिफाभिश्च द्रुमान्तराण्यतिशेते केचिन्न्यग्रोधा अतिदूरप्रसृतेन शाखापरिणाहेन बहुपरिवा

रस्य राज्ञो विश्रमणक्षमां विपुलां छायां वितरन्ति. अदृढावयवत्वाद्वटो गृहाङ्गदारुस्थाने नोपयुज्यते. तस्य क्षीरेण दन्तवेदना निवर्त्यते, कुररीग्रहणार्थो लेपश्च सम्पाद्यते. तस्य पत्राणि सन्धाय भोजनामत्रतां नीयन्ते.

कार्पासतूलतन्तुभिर्नानाप्रकाराणि वस्त्राणि क्रियन्ते. सिकतिले कृष्णमृत्तिके च स्थले कार्पासस्य कृषिः सम्यक् फलति. स च वल्लारि, कडप्पा, गोदावरी, मधुरा, तिरुनेल्वेलि, कोयम्पुत्तूर्, सेलम्, इत्येतेषु मण्डलेषु भावितो बहुश इङ्ग्लाण्डदेशं प्रति प्रेष्यते. अमेरिकाफिरिकाखण्डयोरप्ययं प्ररूढो भवति. कार्पासस्तम्बात् फलोच्चयनसमय एव तूलस्तदावरणान्निष्कृष्योच्चेतव्यः. अन्यथा आवरणं खण्डशस्त्रुटित्वा तूले संलग्नं ततो विभक्तुं न पार्येत. अल्पेऽवकाशे पिचूनां मानं यथा सम्पद्येत, तथा तान् यन्त्रेऽर्पयित्वा घनीकृत्य साधितं तनुं तद्भारं महानावि समारोपयन्ति.

---

२८. देवदर्शिनौ.

द्वौ वैधेयौ देवं दिदृक्षमाणौ कञ्चिद् देवालयं गतौ तत्रैको देवप्रतिकृतिमवलोक्य सहचरमाचचक्षे—'भ्रातः शिला खल्वेषा दृश्यते. किमेनामीश्वर इति सर्वे व्यपदि

शन्ति' इति. तद्वचनमालयपरिचारकाः श्रुत्वा देवोऽनेन 'शिले'ति निन्दित इति तं ताडयामासुः. ततो गते बहुतिथे काले स जातु तेन सहचरेण साकं कस्यचिद् मित्रस्य गृहे भुञ्जान आसाञ्चक्रे. तदा सहचरो जगाद—'धिगिदं भोजनम्; अन्ने शिला ह्युपलभ्यत' इति. प्रागनुभूतप्रहारः स तथावादिनं सहचरं मुखे चपेटया सद्यो दृढं प्रहृत्य 'अरे मूढ! किं त्वमीश्वरं शिलेत्यधिक्षिपसि? एवमुक्तवता मया पुरानुभूतो दण्डः किं त्वया विस्मृतः? अन्न ईश्वरशाबकोऽस्तीति ब्रूहि' इत्युवाच.

२५. विद्यायामुद्योगः

विद्यायाः सिद्धिमिच्छता निरन्तरमभ्यासः कर्तव्यः. तत्र कदाचिद् व्यग्रतामवलम्ब्य कदाचिदालस्यपरिग्रहेण कञ्चित्कालं विषयमेकमभ्यस्य तं विहाय कञ्चित्कालं विषयान्तरस्य परिशीलनेन च न किञ्चित् प्रयोजनं स्यात्. अतिमन्दोऽपि कश्चित् 'पिपीलिकासर्पणाच्छिलापि निम्नीभवेद्' इति लोकवादानुसारेण यदि प्रसन्नचित्तः प्रत्यहमल्पशोऽपि वा श्रद्धयाधीयीत, कथमपि स पण्डितो भवेदेव. यस्त्वात्मानं बुद्धिशालिनं मन्यमानः कदाचिदेवाधीते, नासौ सिद्धिं प्राप्नोति. अत्रोदाहरणं शशकूर्मीया काचन कथास्ति. कश्चित् कूर्मः केनापि शशेन साकं

'पश्यावस्तावत् सखे! इतः प्रदेशात् समं प्रचलितयोरावयोः कतरः प्रथममसुकं स्थानं प्राप्य पुनरिमं प्रदेशं प्राप्नोति' इति ग्लहं परिपाणितवान्. प्रस्थितयोस्तयोः पूर्वं शशकः सवेगं प्रधावितः पृष्ठतोऽतिदूरे शनैरागच्छन्तं कमठं वीक्ष्य 'क्षणमत्र विश्रमिष्यामि; कमठेऽभ्यर्णमागते पुनर्विद्रोष्यामि' इति विचिन्त्य मार्गतरुच्छायायां क्षणं विश्रान्तः. तथैव पथि धावनविश्रमौ पुनःपुनराचरन् क्वचन विश्रमपर्याये गाढं स सुप्तोऽभवत्. कच्छपस्त्वविच्छिन्नं चलन्नुद्दिष्टं स्थलं प्राप्य शशस्य प्रबोधात् प्राक् प्रस्थानदेशं प्रत्यागतो ग्लहं निर्जिगाय. तस्माज्जयः सर्वदा वेगवतामेवेति वा बलवतामेवेति वा न मन्तव्यम्.

---

३०. अन्धानां गजदर्शनम्.

अन्धाः कतिपये समेताः क्वचिदागत्योपविष्टाः. तत्र केषाञ्चिन्निषादिना सह सम्भाषणं श्रुत्वा 'गजः कीदृग्'. इति जिज्ञासमाना गजस्य स्वान्तिकानयनायाधोरणं प्रार्थयन्त. यथाप्रार्थनं च कृतवति हस्तिपक उत्थितेषु च प्रज्ञाचक्षुःष्वेकः कुम्भिनः पादमन्यः करमपरः कर्णं परः पुच्छं च गृहीत्वा सम्यगभिममृशुः. अथ ते गजो ज्ञात इति परितुष्टाः स्वीयं स्थानं पुनरागताः स्वं स्वं गजदर्शनं वर्णयितुमारेभिरे तत्र पादाभिमर्शी गजमुलूखलाकारमवदत्,

करस्पर्शी मुसलाकृतिं, कर्णग्राही शूर्पसन्निवेशं, पुच्छलग्नश्च मार्जनीसरूपम्. एवं ते स्वस्वविज्ञानमेव भङ्गिभेदैः स्थापयन्त आप्तवाक्यान्यप्रमाणयन्तो विप्रलापेनैव कृत्स्नमायुरतिवाहयामासुः. एतेन—

मूर्खो विमृश्यवाच्येऽर्थे क्वापि पक्षे दुरास्थया ।
स्वपक्षवादनिर्बन्धं विजहाति न जातुचित् ॥

इतीयं नीतिः स्फुटा भवति.

---

३१. सर्वानुरोधोद्यमः

एकः स्थविरः सपुत्रो ग्राम्यं कञ्चिदश्वकिशोरं विक्रेतुं पण्यवीथीं गमयन् प्रचलितः. तं वीक्ष्य पथिकः कोऽप्यभाषत—'बुद्धिरिक्तः खल्वयं वृद्धः, योऽश्वं निर्भारं गमयन बालं पुत्रं पादचारेण क्लेशयति' इति. श्रुततद्वाक्यः पित तनयं वाजिपृष्ठे समारोप्य स्वयं तत्पार्श्वलग्नश्चचाल. तत स यावत् स्तोकमन्तरं न लङ्घितवान्, तावदपरस्य मार्ग गामिनो 'रे बालक! दुर्बुद्धे! इयज्जराक्रान्ते वृद्धे पद्भ्य सञ्चरमाणे कथं त्वमश्वारूढो यासि' इति पुत्रं प्रत्याक्रोश श्रुत्वा पुत्रमवरोप्य स्वयमश्वमारुह्य किञ्चिद्दूरमतीयाय ततोऽन्यः समागम्य 'अहो साधु, पश्यत, निष्करुण ए दशमी स्वयं हयस्य पृष्ठे सुखासीनो बालकं पद्भ्यां चारयति

इत्युच्चैर्जुघोष. वाचानया व्यथितमनाः पिता पुत्रमप्यश्व. पृष्ठे समारोप्य चचार. ततः कतिपयपदगमनात् प्राक् चतुर्थः कश्चिदभिगम्य कथितवान्—‘नराणामनुचितमेतन्नृशंसं कर्म, यदेकस्य बालस्याश्वस्य पृष्ठे बलिनौ द्वौ पुरुषावासाते. अनयोर्भरेण ह्यश्वस्य पृष्ठास्थि भज्येत. वरमाभ्यामश्वो यद्युह्येत. न त्वश्वेनानयोर्वहनं युक्तम्’ इति. तत उपजातलज्जौ पितापुत्रावश्वादवतेरतुः; तस्य च पादान् रज्ज्वा संश्लिष्टबद्धान् कृत्वा तदन्तराले मुसलमेकं प्रवेश्य पुरः पश्चाच्च तदग्रे स्कन्धेनोहतुः. यावच्च तथा तौ कस्यापि संक्रमस्योपरि गच्छतः, तावत् सहस्ततालकलकलं तदीयं वामकर्मावहसन्तः पुरोभागिनः केचित् सम्भूय तावनुजग्मुः. क्षुभितश्च तेनाश्वो मुहुरारब्धेन पादविधूननेनच्छिन्नचरणरज्जुर्मुसलात् प्रच्युत्य लोठंलोठं नद्यां भ्रष्टो निममज्ज. ‘अहोबत लोकस्य भिन्नरुचितां विस्मृत्य सर्वजनप्रीणनाय कृतैर्यत्नैर्मया नैकोऽपि जनः प्रीणितः, अश्वश्चैवं मदीयो नष्ट’ इति प्रलपन् गृहं स स्थविरः प्रतिजगाम.

---

३२. सामान्यनीतिः

शुभं वा यदिवा पापं द्वेष्यं वा यदिवा प्रियम् ।
अपृष्टस्तस्य तद् ब्रूयाद्यस्य नेच्छेत् पराभवम् ॥ १ ॥

मिथ्योपेतानि कर्माणि सिद्धिमन्त्यपि वर्जयेत् ।
सदुपायानि कर्माणि कुर्वीतासिद्धिमन्त्यपि ॥ २ ॥

यत्तावद् ग्रसितुं शक्यं ग्रस्तं परिणमेच्च यत् ।
हितं च परिणामे यत् तदाद्यं भूतिमिच्छता ॥ ३ ॥

किन्नु मे स्यादिदं कृत्वा किन्नु मे स्यादकुर्वतः ।
इति कर्माणि सञ्चिन्त्य कुर्याद्वा पुरुषो नवा ॥ ४ ॥

ऋजुः पश्यति यः सर्वं चक्षुषा प्रपिबन्निव ।
आसीनमपि तूष्णीकमनुरज्यन्ति तं जनाः ॥ ५ ॥

न वृद्धिर्बहुमन्तव्या या वृद्धिः क्षयमावहेत् ।
क्षयोऽपि बहुमन्तव्यो यः क्षयो वृद्धिमावहेत् ॥ ६ ॥

गाढं गुणवती विद्या न मुदे विनयं विना ।
महत्सु विनयोपेता मूर्खतापि मुदे भवेत् ॥ ७ ॥

यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् ।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ॥ ८ ॥

समाहृतगुणस्यापि साधुर्नाप्नोति तुल्यताम् ।
सच्छिद्रस्य मृणालस्य चापस्य कुटिलस्य च ॥ ९ ॥

ऐकगुण्यमनीहायामभावः कर्मणां फलम् ।
अथ द्वैगुण्यमीहायां फलं भवति वा न वा ॥ १० ॥

रोगी चिरप्रवासी परान्नभोजी परावसथशायी ।
यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः ॥ ११ ॥

नियतैः पदैर्निषेव्यं स्खलितेऽनर्थावहं समाश्रयति ।
सम्भवदन्यगतिः कः सङ्क्रमकाष्ठं दुरीशं च ॥ १२ ॥

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमुपैति पश्चात् ।
दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानाम् ॥

विना गोरसं को रसो भोजनानां
विना गोरसं को रसो भूपतीनाम् ।
विना गोरसं को रसः कामिनीनां
विना गोरसं को रसः पण्डितानाम् ॥ १४ ॥

---

३३. चक्षुः

अस्माकं नयनं गवाक्षसममिति, तद्द्वारेणात्मा बाह्यं दृश्यजातं पश्यतीति चोक्तमधस्तात् आकृतावल्पमपि चक्षुरतिमहान्ति द्रव्याणि गृह्णाति. यथा पटे मूर्तिराक्रियते, तथा पुरः स्थितः पदार्थो दृश्याख्ये सर्वान्तरे धवलसिराजाल आक्रियमाणः साक्षात्कृतो भवति. चक्षुराधारस्यास्थिगोलस्य रक्षायै धनुराकृतिर्भ्रूरुपरि सन्निवेशिता. भ्रूलोमानि क्रमप्रवणतया ललाटस्वेदजलं यथा दृष्टिं न प्रविशेत्, तथा नेत्रान्तोपान्ततस्तद् दूरीकुर्वन्ति. पक्ष्मणी च नयनस्य कवचतां प्रतिपद्योद्वेगजनकस्य प्रकाशस्यात्याक्रमणं परिहरती सुषुप्तौ रक्षितुमस्मास्वशक्तेषु जातेषु दृशं रक्षतः अपिच ते दृशं प्रविष्टानि रजांस्येकत्रोपसमा-

धातुमान्तरजलेन चक्षुरुपर्यावरणं निस्संशोषमार्द्रयितुं च पुनःपुनर्निर्मिषतः. यूरोपेऽमेरिकायां च स्पर्शवेदनविधया-न्धैर्वाचयितुं यथा शक्येरन्, तथाक्षराण्युत्थास्नूनि पत्रे सन्निवेश्य पुस्तकं सज्जीक्रियते.

परमकारुणिको भगवान् एकस्येन्द्रियस्योपघात इन्द्रियान्तरे पाटवातिशयमादधाति; अन्धानां हि श्रोत्रे-न्द्रियं त्वगिन्द्रियं चातिसूक्ष्मे; बधिरस्य तु चक्षुरिन्द्रियं तथा. एवं जनस्य तत्तद्गुणवैकल्येऽन्यान्यगुणपौष्कल्यं दृश्यते.

---

३४. निमित्तम्.

पाटलिपुत्राभिधाने कस्मिन्नगरे राजा कश्चिदासीत्. स जातु प्रातः प्रबुध्य जालमार्गेण मुखं प्रसार्य बहिर्दत्त-दृष्टिः कश्चिदापणावपतितानां भक्ष्यशकलानामुच्चयने व्यग्रं शूद्रकुमारकमपश्यत्. पुनर्जालाद् मुखं प्रतिसंहरतस्तस्य जालद्वारोपरिदारुणः संघट्टनेन व्रणिताद् मूर्ध्नो रक्तं बहु जगाल. ततः क्रुद्धो राजा 'अद्य प्रातरस्य दुर्भगस्य मुखे प्रथमदृष्टिपातादेव रक्तदर्शनरूपमिदममङ्गलं मे जातम्. एवमन्येषामप्यनर्थो जायेत. अतः शूद्रकुमारकस्यास्य शिरश्छिद्यताम्' इत्यादिदेश. ततो वधाधिकृताः 'त्वन्मुख-दर्शनाद्राज्ञः शिरसि क्षतं जातमिति त्वच्छीर्षच्छेदादेश-

स्तेन विहितः. तस्माद्देहि वध्यस्थानम्' इति तं कुमारमाचकृषुः. स तान् प्रार्थयत—'प्रसीदन्तु भवन्तो वधात् प्राङ् मां राजान्तिकं प्रापयितुम्; वाक्यमेकं तस्याग्रे वक्तव्यमस्ति' इति. तथेति तैर्नृपाग्रे नीतश्च स तमन्वयुङ्क्त—'महाराज! प्रातर्मन्मुखदर्शनेन देवस्य देहात् किञ्चिद्रक्तमात्रमपेतम्. मम तु देवमुखदर्शनेन शीर्षच्छेदान्ता खलु विपदुपनता. तत्र न्याय्यं कतमं देवो निर्णयमुत्पश्यति' इति. तच्छ्रुत्वा व्रीडितो राजा तं विसर्जयितुमाज्ञप्तवान्.

सुप्तोत्थितस्य प्रथमं काकयुग्मावलोकनं तस्मिन् दिने शुभावहमिति केनापि निमित्तवेदिना कश्चिदुपदिष्टः स्वस्य किङ्करं 'प्रातर्द्वौ वायसौ सहावस्थितावुपलभ्य सद्यो मां प्रबोधय' इत्यादिश्य रात्रौ सुष्वाप. ततः प्रभाते किङ्करस्तथाभूतौ बलिभुजौ पश्यंस्त्वरिततरं स्वामिनं प्रबोधयामास. किन्त्वागतस्य स्वामिनो दृष्टिपातात् प्रागेव तयोरन्यतर उड्डीय गतः. स्वामिना तु 'रे मूढ! अन्यतरोड्डयनात् पूर्वमेव मां किमिति नाहूतवानसि' इति साधिक्षेपं ताड्यमानो भृत्योऽब्रवीत्—'मिलितं काकद्वयं दृष्टवता मया तावदिदमिदानीं फलमनुभूतम्. नखलु जाने स्वामी चेत् तदद्रक्ष्यत्, कीदृशं फलमन्वभविष्यत्' इति. अथ भर्ता प्रत्युत्तरमप्रतिपद्यमानस्तूष्णीं गृहाभ्यन्तरं विवेश.

३५. क्षमा. (क)

ततः कम्पनरेन्द्रस्य भटैर्भुजबलोत्कटैः ।
पलायत पराभूता द्रमिडेन्द्रवरूथिनी ॥ ६२ ॥

उल्लङ्घ्योल्लङ्घ्य धावद्भिर्भीत्या भ्रंशितमायुधम् ।
प्रायः प्रथनसंन्यासे शपथः कैश्चिदादधे ॥ ६३ ॥

हतानुकारिणः केचित् क्षितौ निपतितास्ततः ।
क्रोष्टुर्भयेन धावन्तः कर्णाटान् पर्यहासयन् ॥ ६४ ॥

विक्षिप्तु विस्मृतैश्चर्मफलकैर्निर्मितप्लवाः ।
मृषैव केचिदतरन् मृगतृष्णातरङ्गिणीः ॥ ६५ ॥

छायामेवात्मनः केचिद् धावन्तो भीतिभाविताः ।
अरातिशङ्कया कष्टं दष्टाङ्गुलि ववन्दिरे ॥ ६६ ॥

अथ तस्य पुरीमेव नीत्वा शिबिरतां नृपः ।
अचलं राजगम्भीरमरुन्ध द्विषदाश्रितम् ॥ ६७ ॥

तद्दुन्दुभिप्रतिध्वानमुखरैः कन्दरामुखैः ।
भयादमन्दमाक्रन्दमकार्षीदिव पर्वतः ॥ ६८ ॥

प्रवाताभिमुखाधूतैः पताकापाणिपल्लवैः ।
आरोहणाय राजेन्द्रमाजुह्वावेव भूधरः ॥ ६९ ॥

अथ प्रववृते युद्धं सैन्ययोरुभयोरपि ।
पतदुत्पतदस्त्रांशुज्वलितोर्वीनभस्स्थलम् ॥ ७० ॥

भ्रश्यत्तालफलाकारैः प्राकाराद् बाणपातितैः ।
रणश्रीकन्दुकभ्रान्तिर्विदधे वीरमूर्धभिः ॥ ७१ ॥

अग्रे निपेतुर्नृपतेर्ग्रावाणो यन्त्रविच्युताः ।
दुर्गेणातरक्षामार्थं दूताः संप्रेषिता इव ॥ ७२ ॥

धानुष्कमुक्तबाणाग्निज्वलितोर्ध्वगृहावलिः ।
विजयारात्रिकं तस्य मूर्ध्नाद्रिरधारयत् ॥ ७३ ॥

विन्यस्तकुन्तनिश्रेणीश्रे[illegible] ।
आक्रान्तसालशृङ्गाग्रैर[illegible] ॥ ७४ ॥

अथोद्भटभटक्ष्वेडागलितभ्[illegible] ।
निहतासन्नदीमज्ज[illegible] ॥ ७५ ॥

.... ।
अलब्धनि[illegible]मं दुर्गमासादि[illegible] ॥ ७६ ॥

(कुम्भकम्)

निर्जगाम निजागाराच्च[illegible] ।
कृपाणपाणिर्लक्ष्मीका[illegible]जिह्वा[illegible] इव [illegible] ॥ ७७ ।

अहंपूर्विकया वीरै[illegible] ।
प्रत्यग्रहीन्महीपालश्चम्पं [illegible] इव [illegible] ॥ ७८ ॥

तौ निकुञ्चितपूर्वाङ्गौ [illegible] ।
उचितस्थानकाधारता[illegible]विव क्षणम् ॥ ७९ ॥

कक्ष्याविभक्तवपुषाश्चारी[illegible]रतोरसा ।
पश्यद्भिः सौष्ठवं देवैरनिमेषत्वमादृतम् ॥ ८० ॥

अन्तर्बिम्बितचम्पेन्द्रा कम्पेन्द्रस्यासिपुत्रिका ।
अप्सरोभ्यः पतिं दातुमन्तर्वत्नी किलाभवत् ॥ ८१ ॥

अथ वञ्चित[तत्]खड्गप्रहारः कम्पभूपतिः ।
अकरोदसिना चम्पममरेन्द्रपुरातिथिम् ॥ ८२ ॥

इत्थं सङ्गरमूर्ध्नि चम्पनृपतिं नीत्वा कथाशेषतां
श्रीमान् कम्पनृपेश्वरो जनयितुः संप्राप्तवाञ्छासनम् ।
काञ्चीन्यस्तजयप्रशस्तिरमिथस्संकीर्णवर्णाश्रमं
नीत्या नित्यनिरत्ययर्द्धिरशिषत् तुण्डीरभूमण्डलम् ॥ ८१ ॥

इति [श्रीगङ्गादेव्या विरचिते मधुराविजय-
नाम्नि वीर*]कम्परायचरिते
चतुर्थः सर्गः ।

अथ पञ्चमः सर्गः ।

अथ स तत्र महीतलमण्डने मरतकाह्वयभाजि महापुरे ।
विरचितस्थितिरप्रतिशासनं जगदशेषमरक्षदनाकुलम् ॥ १ ॥

अखिलापहमाश्रितनन्दनं सुमनसां मनसः प्रियदायिनम् ।
वसुमतीमवतीर्णमिवापरं हरिममंसत तं सततं प्रजाः ॥ २ ॥

प्रथितशक्तिरवाप्तफलोदय प्रगुणयन् पणबन्धमुखान् गुणान् ।
निपुणधीर्निरपायमुपायवित् प्रभुरभुङ्क्त नवां नयसंपदम् ॥ ३ ॥

असुहृदां सुहृदामिव मण्डलेष्वजनि तेन न किञ्चिदलक्षितम् ।
प्रहितचारगणेन विवस्वता प्रसृतदीधितिना भुवनेष्विव ॥ ४ ॥

करपरिग्रहमाचरति प्रभौ मृदुतरं मुदितप्रकृतिर्मही ।
विविधसस्यविशेषनिरन्तरा पुलकितेव भृशं समलक्ष्यत ॥ ५ ॥

द्रढिमशालिनि भोगमनोहरे कटकधारिणि दानगुणो[र्जिते*] ।
नृपतिदोष्णि निवासमुपेत्य भूरलघयत् प्रथमास्पदगौरवम् ॥ ६ ॥

नरपतेः प्रतिहारमहीं मुहुर्विजयदन्तिमदोदकपङ्किलाम् ।
क्षितिभुजां भुजभूषणघट्टनप्रसृमरो मणिरेणुरशोषयत् ॥ ७ ॥

अहरहर्नृपतेः पदपीठिकातटसमुल्लिखितैरलिकस्थलैः ।
पुनरिवार्पितभाग्यमयाक्षरै रजनि वैरमुचामवनीभुजाम् ॥ ८ ॥

मगधमालवसे(म?वु)णसिंहलद्रमिलकेरलगौ(ल?ड)मुखैर्नृपैः ।
अवसरार्थिपरैरनुवासरं रुरुधिरे प्रतिहारभुवः प्रभोः ॥ ९ ॥

परिसरद्वयचामरधारिणीकनककङ्कणशिञ्जितनिस्वनः ।
अशमयन्नृपतेर्बिरुदावलीमुखरमागधमण्डलवैखरीम् ॥ १० ॥

चतुरचङ्क्रमचारुसरस्वतीचरणनूपुरशिञ्जितमञ्जुलैः ।
भृशमरज्यत कम्पमहीपतिः सदसि सत्कविसूक्तिसुधारसैः ॥ ११ ॥

तरलिताङ्गुलिताडितवल्लकीनिरततानिरन्तरितैः स्वरैः ।
जगुरमुष्य जगत्प्रथितं यशो गमकभङ्गितरङ्गितमङ्गनाः ॥ १२ ॥

उचिततालमुदञ्चितविभ्रमं चतुरचारिचमत्कृतसौष्ठवम् ।
मुहुरसाववरोधमृगीदृशां मुखरसोज्ज्वलमैक्षत नर्तनम् ॥ १३ ॥

हततरक्षु परिक्षतसैरिभं मृदितरङ्कु निषूदितसूकरम् ।
गलपितखड्गि गृहीतमतङ्गजं वनमसौ मृगयासु मुहुर्व्यधात् ॥ १४ ॥

अथ सुगन्धिहिमान् व्यजनानिलान् मृगदृशः कृतचन्दनचर्चिकाः ।
शशिमतीश्च निशाः प्रियतां नयन् नरपतेरुदभूद् ऋतुरूष्मलः ॥ १५ ॥

विकचपाटलगन्धिसमीरणैः सलिलकेलिपरायणयौवतैः ।
रजनिदैर्घ्यहरैरधिकोल्लसद्रविमहोभिरहोभिरभूयत ॥ १६ ॥

नियतिनिर्मितदक्षिणदिग्वधूविरहतापनिवारणवाञ्छया ।
अहिमभानुरहन्यहनि ध्रुवं हरितमाप हिमाचलशीतलाम् ॥ १७ ॥

परुषतापविशेषपरिस्खलद्रथतुरङ्गममन्दगताविव ।
महिमभाजि रथाङ्गखगाविहाम्बरमा[हत दै?]र्घ्यवतीं दशाम् ॥ १८ ॥

सरसचन्दनधारिषु मौक्तिकत्रिसरनिर्झरहारिषु सुभ्रुवाम् ।
कुचतटेषु निदाघनिपीडितो धृतिमधात् कुसुमायुधकुञ्जरः ॥ १९ ॥

सलिलकेलिकुतूहलकुन्तलीकुचतटाहतिजातभयैरिव ।
अपसृतैरजनि प्रतिवासरं नृपतिगेहविहारसरोजलैः ॥ २० ॥

प्रचुरघर्मपयःकणजालिकागुणितमौक्तिकमण्डनशालिभिः ।
नवशिरीषवतंसमनोहरैः सुवदना वदनैस्तममोदयन् ॥ २१ ॥

दिनविरामविकस्वरमल्लिकाकुसुमसौरभहारिषु सुभ्रुवाम् ।
कचभरेषु निवेशयतो मुखं नरपतेर्न वितृष्णमभून्मनः ॥ २२ ॥

हिमगृहेषु निरन्तरशीकरप्रकरदर्शिततारकपङ्क्तिषु ।
दिवसतापमहापयदायतं वरवधूसहितो वसुधाधिपः ॥ २३ ॥

अथ दलन्निचुलद्रुममञ्जरीनिचयदर्शितचामरविभ्रमः ।
कृतनुतिः किल चातकयाचकैर्नृपतिमन्वगमज्जलदागमः ॥ २४ ॥

तत इतो विहरत्तटिदङ्गनाललितलास्यहरिन्मणिमण्डपैः ।
पटुमृदङ्गरवोपमगर्जितैर्निबिडमाविरभूयत वारिदैः ॥ २५ ॥

स्फुटतटित्तपनीयगुणोज्ज्वलैः पृथुपयःकणमौक्तिकसन्निभिः ।
अलिकदम्बकसच्छविभिर्दिशामसितकञ्चुलिकायितमम्बुदैः ॥ २६ ॥

हरितलोहितपाण्डुरराजत त्रिदशराजशरासनलेखिका ।
मरतकोपलविद्रुममौक्तिकैर्विरचिता रशनेव नभश्श्रियः ॥ २७ ॥

रुधिरबिन्दुनिभच्छविरभ्यगात् क्षितितले हरिगोपपरम्परा ।
घमघरट्टपरस्परघट्टनक्षरदिरम्मदवह्निकणावलिम् ॥ २८ ॥

पटुपुरःपवनाधिगतभ्रमा जलमुचः करकोपलकैतवात् ।
सलिलराशिपयस्सहभूश्रियामुदवमन्निव मौक्तिकसंहतिम् ॥ २९ ॥

अभिमते सति वारिधरोदये मधुरषड्जमनोहरगीतिभिः ।
गिरितटीषु मुहुः परिमण्डलीकृतकलापमनर्ति शिखण्डिभिः ॥ ३० ॥

पटुतटिद्गणकोणहताः पुरो रतिपतेः पटहा इव दिव्यकाः ।
निशमिताः स्फुटसाहसमध्वगैर्जलधरा वियदध्वनि दध्वनुः ॥ ३१ ॥

दलितकन्दलमुच्छ्वसदर्जुनं स्फुटकदम्बमुदञ्चितकैतकम् ।
मुदितचातकमुन्मुखबर्हिणं कतिचिदास दिनानि वनान्तरम् ॥ ३२ ॥

करतलैरिव गन्धवहैर्घनाः प्रहितकैतकपांसुविभूतयः ।
स्तनितहुंकृतिभिर्निरकासयन् नृपतियावतमानमहाग्रहम् ॥ ३३ ॥

चलितबर्हिणचन्द्रकचित्रितैः सुरभिगन्धिशिलामदशालिभिः ।
विकचनीपवनैर्नृपतेर्मनो मुहुरहारि विहारमहीधरैः ॥ ३४ ॥

तमहरन्नहरत्ययमालतीकुसुमदन्तुरकुन्तलकान्तयः ।
परिहितागरुधूपितवाससः सुतनवो मृगनाभिसुगन्धयः ॥ ३५ ॥

मणिमयानि गृहाणि समीरणाः कुटजकैतकसौरभवाहिनः ।
मदकलाश्च गिरः प्रचलाकिनां क्षितिपतेः स्मरदीपकतां ययुः ॥ ३६ ॥

नववधूपरिरम्भणदोहलान्यनुपदं निनदैः प्रतिपादयन् ।
अलभत क्षणदासु घनागमो नरपतेः किल नर्मसुहृत्पदम् ॥ ३७ ॥

तदनु पद्मवनीपरिहासकस्त्रिदशनाथशरासनतस्करः ।
भुजगभुङ्मुखमुद्रणमौरिकः समुदभूत् समयो जलदात्ययः ॥ ३८ ॥

विधुतकाशसटाभरभासुरः प्रकटितोरुजपारुणलोचनः ।
व्यघटयद् घनदन्तिघटाः स्फुरद्रविमुखः शरदागमकेसरी ॥ ३९ ॥

अवितथं रजनीदिवसाधिपौ मधुरिपोर्नयने इति भाषितम् ।
स्फुटममुष्य यतः स्वपनात्ययादजनि तादृशमुन्मिषितं तयोः ॥ ४० ॥

कलशजस्य मुनेरुदयाज्जहुः कलुषतां सलिलानि महौजसः ।
सदुपदेशवशादिव शासितुस्तनुभृतां हृदयानि दयानिधेः ॥ ४१ ॥

विशदशारदनीरदशारितं वियदलक्ष्यत वीततडिद्गणम् ।
प्रकटफेनकदम्बककर्बुरं जलमिवाम्बुनिधेर्गतविद्रुमम् ॥ ४२ ॥

नियतमम्बुदशाणनिघर्षणादतिमहस्कमहस्करमण्डलम् ।
अजनि वर्षवियोगेऽपि वार्षिकैर्जलधरैः परिधौतमिवोज्ज्वलम् ॥ ४३ ॥

जलदकालकलिस्फुरितां शनैः कलुषतां प्रशमय्य कृशाः पुनः ।
घटयन्ति स्म शरत् तटिनीसखीरुपनतैः कलहंसविलासिभिः ॥ ४४ ॥

मरालिकाकरमञ्जरदिन्दिराचरणहंसकनिक्वणमन्थरः ।
मदनमङ्गलतूर्यरवोऽभवन्मदकलः कलहंसकुलध्वनिः ॥ ४५ ॥

विकचाम्बुविलोचनमात्मनो मुखमवेक्षितुमात्तकुतूहला ।
नियतमभ्रनिचोलकहारिणः शरदकारि दर्पनिदर्पणम् ॥ ४६ ॥

विलसदुत्पललोचनशालिनीः स्फुरितचन्द्रमुखीः कुमुदस्मिताः ।
नरपतिः स्फुटतारकहारिणीर्निरविशद् दयिता इव यामिनीः ॥ ४७ ॥

परिणतक्षुपरिच्युतमौक्तिकग्रथितहारमनोहरमूर्तिभिः ।
विशदमस्य यशो नृपतेः कलं कलमगोपवधूभिरगीयत ॥ ४८ ॥

दलदयुग्मदलोदरसौरभप्रसरपक्ष्मलिता वनवायवः ।
मुहुरधःकृतयन्तृनिवारणानकुषत क्षितिभृन्मदवारणान् ॥ ४९ ॥

वनभुवः परितः पवनेरितैर्नवजपाकुसुमैः कृतदीपिकाः ।
प्रथममेव नृपस्य निदेशतो विजयिनस्तुरगान् निरराजयन् ॥ ५० ॥

अथ नृपस्य समुत्सुकचेतसो [मदन*]केलिकलासु विलासिनः ।
प्रियमिवा[चरितुं*]समुपागमत् प्रणदयन्(?) क्षणदास्तुहिनागमः ॥५१॥

हिमभरैर्विहतः कमलाकरो मृदितकान्तिरभून्मृगलाञ्छनः ।
वदनमेव नरेन्द्रनतभ्रुवामभजत श्रियमप्रतिशासनाम् ॥ ५२ ॥

पुलककञ्चुकितैः कुचमण्डलैः स्फुरितसीत्कृतिभिश्च मुखेन्दुभिः ।
अविरतं स्मरतन्त्रमिवान्वभूदवनिपालविलासवतीजनः ॥ ५३ ॥

विकचकुन्दकलापपरिष्क्रियाविरचितालकजालकविभ्रमम् ।
असमयेऽपि समौक्तिकमण्डनं प्रभुरमंस्त निजं प्रमदाजनम् ॥ ५४ ॥

बहलकुङ्कुमपङ्कविलेपनप्रसृमरोष्मपयोधरमण्डलैः ।
अरमताविरतं रमणीजनैरगरुगन्धिषु गर्भगृहेषु सः ॥ ५५ ॥

इति सुखान्युचितानि हिमागमे समनुभूय मनोभवसन्निभः ।
शिशिरयामवतीष्वपि रागवान् रमयितुं रमणीकदयुङ्क्त सः ॥ ५६ ॥

शबलितान्यलिकागरुबिन्दुभिश्चलदृशां रतिविभ्रमसूचकैः ।
नवलवङ्गतरुप्रसवास्तृतान्यभजतानुनिशं शयितानि सः ॥ ५७ ॥

परिलसन्नवलोध्ररजोभरच्छुरणपाण्डरगण्डतलैर्मुखैः ।
मृगमदद्रवचारुविशेषकैर्मृगदृशां नृपतेरहरन् मनः ॥ ५८ ॥

अपदिशञ्छिशिरानिलमञ्जकैः पुलकितैर्नृपतेः सविधं गतः ।
मदनसंभृतघर्मपयःकणैर्भृशमलज्जत मुग्धवधूजनः ॥ ५९ ॥

द्विगुणयन्नधरव्रणवेदनां कृतकचग्रहणैः परिचुम्बनैः ।
कपटरोषकषायितलोचनं निभृतहासमवैक्ष्यत यौवतैः ॥ ६० ॥

विकलकञ्चुकलक्ष्यन(व?ख)व्रणं विगतमौक्तिकहारमनोहरम् ।
तरुणिमोष्मनखंपचमङ्गनास्तनयुगं हिमहारि बिभोरभूत् ॥ ६१ ॥

उपहरन् कुसुमानि महीरुहां किसलयैः कलिताञ्जलिबन्धनः ।
मधुरकोकिलकूजितभाषितो मधुरथैनमुपासितुमासदत् ॥ ६२ ॥

मधुसुगन्धि रजः सहकारजं मलयशैलसमीरणमान्त्रिकाः ।
प्रणयरोषपराङ्मुखमानिनीहृदयसंवननार्थमिवाकिरन् ॥ ६३ ॥

उपवनेष्वगमन्नुपमेयतां स्फुटरुचो नवकिंशुककुट्मलाः ।
मथितपान्थमृगक्षतजारुणैर्मदनकेसरिणः कुटिलैर्नखैः ॥ ६४ ॥

चटुलषट्पदकज्जलपातिनी विरुरुचे नवचम्पकमञ्जरी ।
प्रकटितेव हिमागमश्रिया स्मरमहोत्सवदीपपरम्परा ॥ ६५ ॥

मधुनि मुग्धदृशां मुखसंस्तवात् तदनुषङ्गितया बकुलेषु च ।
मरुति चैतदनुक्षण[सौहृ*]दात् समुचितोऽजनि सौरभसङ्क्रमः ॥ ६६ ॥

क्वणितनूपुरकुन्तलकामिनीचरणपङ्कजसङ्गवशादिव ।
मुखरभृङ्गमशोकमहीरुहस्तदनुरूपमधारयत पल्लवम् ॥ ६७ ॥

वरवधूपरिरम्भरसोल्लसल्ललितकुट्मलकण्टकिताकृतिः ।
कुरवकः कुसुमेषुमचेतनेष्वपि विशृङ्खलवृत्तिमसूचयत् ॥ ६८ ॥

पथिक [सार्थ*]पराक्रमणोत्सुकप्रसवकार्मुककाहत्यनिस्वनः ।
मधुरपञ्चमरागरसाञ्चितो जगदरञ्जयदन्यभृतध्वनिः ॥ ६९ ॥

अधिगताभिनवार्तवसम्पदः स्तबकसंजनितस्तनविभ्रमाः ।
भ्रमरकामुकसंवननक्षमा वनलता ललितां दधिरे दशाम् ॥ ७० ॥

सुतनवः फलकेषु मधूत्सवे रतिपतिं परिलेखितुमुद्यताः ।
हृदयगोचरतामनिशं गतं हरिहरात्मजमेव समालिखन् ॥ ७१ ॥

[म*]दनवैरनि(भा?भं)निभृतं पुरः क्षितिपतिं कृतचन्दनचर्चिकाः ।
अधिकघर्मपयोभिरवागमन् मृगदृशो विकसत्पुलकैः करैः ॥ ७२ ॥

मुखरकङ्कणमाकुलमेखलं चलितहारलतं ललितालकम् ।
अधिगतश्रममस्य वधूजनो रतिविशेषमशिक्षत डोलया ॥ ७३ ॥

उचितरागविशेषमनोहरे रतिपतेरुपगानविधौ स्त्रियः ।
नृपतिगोत्रकृतस्खलना ययुः प्रियसखीसविधेषु विलक्षताम् ॥ ७४ ॥

क्षितिपतिं किल कुङ्कुममुष्टिना समभिताडयितुं प्रियमादधौ ।
सपदि घर्मपयःप्रसरेण तं विगलितं न विवेद वधूजनः ॥ ७५ ॥

इति समुपचिताभिश्चातुरीभिर्विशेषान्
ऋतुषु समुपलभ्यान् निर्विशन् निर्विशङ्कम् ।
सुतनुभिरवियोगोत्कण्ठिताभिस्तृतीयं
व्यतनुत पुरुषार्थं कम्पराजः कृतार्थम् ॥ ७६ ॥

इति [श्रीगङ्गादेव्या विरचिते मधुराविजय-
नाम्नि वीर]कम्पराय चरिते
पञ्चमः सर्गः ।

अथ षष्ठः सर्गः ।

अथ वरतनुभिः समं कदाचिद् विरचयितुं कुसुमापचायलीलाम् ।
प्रमदवनमगत्यकामिनीभिर्हरिरिव नन्दनमासदन्नरेन्द्रः ॥ १ ॥

मुखरितमणिमेखलाकलापाः प्रचलितमन्वचलंस्तमायताक्ष्यः ।
उपवनलतिका इवोपगीतभ्रमरकुला मलयाद्रिगन्धवाहम् ॥ २ ॥

परिवहदनुरागपूरकल्पैः पदगलितैरथ यावकैर्वधूनाम् ।
सरणिररुणतामतीव नीता समजनि नूतनपल्लवास्तृतेव ॥ ३ ॥

विविधविलसितैर्विलासिनीनामसितसितारुणकान्तिभिः कटाक्षैः ।
कुवलयकुमुदारविन्दमालाखचितमिवामलमम्बरं बभासे ॥ ४ ॥

अजनयदवनीश्वरस्य चेतस्यसितदृशां मणिनूपुरप्रणादः ।
सहपरिचलितप्रसूनकेतोरवनमदैक्षवचापघोषशङ्काम् ॥ ५ ॥

अवनिपतिमनुप्रतस्थुषीणां हरिणदृशामितरेतरप्रसक्ताः ।
मधुरसमधुरा गिरस्तदानीं बहुविधभङ्गितरङ्गिता बभूवुः ॥ ६ ॥

वरतनु! परतः प्रयाहि मन्दं हरिणदृशां पुरतः प्रयायिनीनाम् ।
पथि गतिरयशीर्णहारमुक्तामणिगणशर्करिले पदं न कुर्याः ॥ ७ ॥

नलिनमुखि! न बोधय प्रसुप्तानिह मणिनूपुरशिञ्जितेन हंसान् ।
द्रुतगमनविघातमाचरेयुर्नियतममी तव पादपद्मलग्नाः ॥ ८ ॥

करनखरमरीचिमञ्जरीभिर्हृतहृदयो जलशङ्कया कुरङ्गः ।
अनुपतति विलोकयैकवारं सखि! नियतं स निवर्तते विलक्षः ॥ ९ ॥

शशिमुखि! शशिकान्तकुट्टिमेषु स्खलनभिया न पदात् पदं प्रयासि ।
इयमिह वदनानुबिम्बराजिस्तव न पुनर्नवपङ्कजोपहारः ॥ १० ॥

किमिति मृदुपदं प्रयासि मुग्धे! ननु कितवः सह याति कामिनीभिः ।
नवकुसुमरजोन्धकारबन्धैरभिसरणार्हमिदं वनं दिवापि ॥ ११ ॥

अथ विदितमियं द्रुता गतिस्ते मुखमवलोकयितुं निवृत्य भर्तुः ।
न किमलमपराङ्गमेव तावद् दयिततमस्य मृगीदृशां मनांसि ॥ १२ ॥

स्तनजघनभरं तवालि! जाने तदपि गतिस्त्वरया त्वया विधेया ।
न कलयसि निरन्तरं निषेव्या युवतिजनैर्बहु* .... ॥ १३ ॥

....पतन्ति ।
मदनसुभटवारणास्त्रशङ्कां मनसि चकार चकोरलोचनानाम् ॥ ५५ ॥

करयुगकलितप्लवः प्रियाणां परिचलितोरुनितम्बमण्डलानाम् ।
........नच्छलादकार्षीत् सुरतगुरुः पुरुगायितोपदेशम् ॥ ५६ ॥

---

*तालपत्रादर्शे इत ऊर्ध्वं ४१ श्लोका न दृश्यन्ते ।

अवनिपतिरसि(श्व?क्त) दीर्घिकाया मुखकमलं सलिलेन साभिलाषम् ।
किमपि समधिकार्द्रपक्ष्मलेखं वदनमभूदरुणेक्षणं परस्याः ॥ ५७ ॥

प्रणयिनि सलिलापवारितेन स्पृशति करेण सलीलमूरुमूलम् ।
प्रकटितशफराभिघातभी(तं?ति)र्मिषति जनेऽप्यमुमालिलिङ्ग काचित् ॥ ५८ ॥

सलिलहृतिभियापवृत्तगात्र्याः प्रचलितवेण्यपराङ्गकं परस्याः ।
धरणिपतिरमंस्त मीनकेतोः फलकमुपाहितखड्गवल्लरीकम् ॥ ५९ ॥

चरणविलुठितो विलङ्घितोरुः परिगतनीविरवाप्तनाभिचक्रः ।
स्तनतटलुलितः क्रमेण तासां मुखशशिबिम्बमचुम्बदम्बुपूरः ॥ ६० ॥

विशदनखपदं वपुः सपत्न्या....नव पश्यति निर्निमेषमस्मिन् ।
व्यधित विहृतिकैतवेन काचित् प्रहितजला परिमीलिताक्षमेनम् ॥ ६१ ॥

विशदमधरमक्ष्यनञ्जनाभं विगतललाम वितन्वती ललाटम् ।
रतिरिव जलकेलिरङ्गनानामवनिपतेः स्पृहणीयतामयासीत् ॥ ६२ ॥

परिमुषितपटीरलेपनेष्व[प्य*]विरललग्नसरोजकेसरेषु ।
कुचकलशतटेषु कुन्तलीनां नखरपदानि न लक्षितान्यभूवन् ॥ ६३ ॥

विहृतिरयपरिच्युतान् वतंसानसितदृशामनुदद् बहिः प्रवाहः ।
नहि जडिमसमन्वितोऽपि कोऽपि श्रुतिविषयात् पतितैः करोति मैत्रीम् ॥

अपि दयिततमेन वारिताभिर्गृहसरसो विजहे न वारि ताभिः ।
परिलुलितललामचर्चिकाभिर्विहृतिरसान्महिलामचर्चिकाभिः ॥ ६५ ॥

अथ विहरणखेदमन्थराभिः सह निरगात् सरसो नृपः प्रियाभिः ।
कलशजलनिधेरिवाप्सरोभिर्विबुधतरुर्मथनश्रमालसाभिः ॥ ६६ ॥

स्फुटनखरदनाङ्कमङ्गनानां परिलगदार्द्रदुकूलदर्शितोरु ।
वपुरनुकलमैक्षत क्षितीशो जलकणदन्तुरदीर्घकुन्तलाग्रम् ॥ ६७ ॥

चिकुरनियमनेषु कामिनीनामभिनववस्त्रपरिग्रहान्तरेषु ।
अभिमतपददर्शनैरयत्नैरतिमदनं स्वममंस्त कम्पराजः ॥ ६८ ॥

ततः सैरन्ध्रीभिः कृतसमुचिताकल्परचनः
पुरन्ध्रीभिः सार्धं समधिगतशुद्धान्तवसतिः ।
त्रयीगीतं तेजस्त्रिपुरहरमाराध्य विधिवद्
यथार्हैर्व्यापारैर्नरपतिरहश्शेषमनयत् ॥ ३९ ॥

इति श्रीगङ्गादेव्या विरचिते मधुराविजय-
नाम्नि वीर* कम्परायचरिते
षष्ठः सर्गः ।

अथ सप्तमः सर्गः ।

अथ कम्पनरेन्द्रसुभ्रुवां मुखपद्मान्यनुहार्य पङ्कजैः ।
अपराधभियेव भानुमानपरक्ष्माधरकन्दरामगात् ॥ १ ॥

परिचूषितदीप्तिरम्बुजैः पुनरूष्माणमिवाप्तुमौर्वतः ।
स्यवलिगतवाहनो रविः पयसां राशिमवाप पश्चिमम ॥ २ ॥

अपसर्पणसंभ्रमच्युतं दिनलक्ष्म्यास्तपनीयकुण्डलम् ।
रविमण्डलमाशशङ्किरे वरुणान्तःपुरवामलोचनाः ॥ ३ ॥

तरणेररुणीकृताः करैर्वरुणस्त्रैणकपोलभित्तयः ।
मदलोहिनिकामुपावहन् मदिरास्वादनमन्तराप्यहो ॥ ४ ॥

कमलोदरसंभृतं करैर्मधु पीत्वा रविरुज्झिताम्बरः ।
स्पृशति स्म दिशं प्रचेतसो न मदः कस्य विकारकारणम् ॥ ५ ॥

प्रथमां हरितं प्रभाकरो विरहय्यात्मनि तापमाप यम् ।
अपरामुपगम्य तं जहौ हृदयं कः खलु वेत्ति रागिणाम् ॥ ६ ॥

परलोकपथं प्रपेदुषः पुनरावृत्तिमपेक्ष्य भास्वतः ।
मुकुलीभवदम्बुजच्छलादकरोदञ्जलिबन्धमब्जिनी ॥ ७ ॥

प्रतिबिम्बपरम्पराम्बुधौ पवनोद्धूततरङ्गसङ्गिनी ।
नभसोऽवतरिष्यतो रवेर्मणिसोपानधियं व्यभावयत् ॥ ८ ॥

चरमाम्बुधिवीचिचुम्बितप्रतिबिम्बाश्रयि मण्डलं रवेः ।
दिवसान्तनटस्य धूर्जटेर्विदधे काञ्चनतालविभ्रमम् ॥ ९ ॥

चलचञ्चुपतद्बिसाङ्कुरैर्दिननाथार्पितदीनदृष्टिभिः ।
रजनीविरहव्यथातुरैरथ चक्राह्वयुगैरभूयत ॥ १० ॥

उदधौ पतितस्य भास्वतः कतिभिश्चित् किरणैः खवर्तिभिः ।
उदपाद्यत कालकुञ्जरोद्दलिताहर्द्रुमशाखिकाभ्रमः ॥ ११ ॥

पतयालुपतङ्गमण्डलक्षरदंशूत्कररञ्जिताकृतिः ।
मधुकैटभरक्तलोहितामुदधिः प्राप पुरातनीं दशाम् ॥ १२ ॥

गतदीप्ति गभस्तिमालिनो विलुठ[द्] वीचिषु बिम्ब*[म]म्बुधेः ।
शफराः फलखण्डशङ्कया रसनाभिर्लिलिहुर्मुहुर्मुहुः ॥ १३ ॥

स्खलितातपलेशमायतैर्विटपिच्छायशतैर्वृतं जगत् ।
भयविद्रवदर्कसैनिकं तिमिरैः क्रान्तमिवैक्ष्यत क्षणम् ॥ १४ ॥

प्रवसन् दिवसात्यये न्यधादुभयेषूभयमुष्णदीधितिः ।
हृदयेषु वियोगियोषितां परितापं त्विषमोषधीषु च ॥ १५ ॥

खगमेकमवेक्ष्य तादृशं पतितं विष्णुपदातिलङ्घनात् ।
निभृतं चकिता इवाखिलास्तरुनीडेषु विलिल्यिरे खगाः ॥ १६ ॥

घटमानदलाररीपुटं नलिनं मन्दिरमिन्दिरास्पदम् ।
परिपालयति स्म निक्कणन् परितो यामिकवन्मधुव्रतः ॥ १७ ॥

अधिपङ्कजकोशमादधे बहिरालीनमधुव्रतच्छलात् ।
मधुसौरभरक्षणोत्सुका दिनलक्ष्मीरिव लक्ष्म जातुषम् ॥ १८ ॥

दिनवेषमपास्य यामिनीवपुषा कालनटस्य नृत्यतः ।
ददृशे जगता पितृप्रसूर्दिवि नेपथ्यपटीव पाटला ॥ १९ ॥

रविरथ्यखुरोत्थितापरक्षितिभृद्गैरिकरेणुशोणया ।
क्षणमेकमकारि सन्ध्यया वरुणाशारुणकञ्चुकभ्रमः ॥ २० ॥

वियति व्यरुचन् पयोधराः स्फुटसन्ध्यापरिपाटलत्विषः ।
अनिरावतरद्विभावरीपदलाक्षापटलानुकारिणः ॥ २१ ॥

नवपल्लवकोमलच्छविर्दिवि सान्ध्यो ददृशे महोभरः ।
(विनि?रवि)पातरयात समुत्थितश्चरमाब्धेरिव विद्रुमोत्करः ॥ २२ ॥

उदियाय ततो दिगङ्गनाश्रवणाकल्पतमालपल्लवः ।
रजनीमुखपत्रलेखिकारचनारङ्कुमदस्तमोङ्कुरः ॥ २३ ॥

किमु धूमभरः प्रशाम्यतो द्युमणिग्रावगतस्य तेजसः ।
प्रससार दिशस्तमोमिषात् किमु नीलत्कमलालिसञ्चयः ॥ २४ ॥

हलिहेतिदलत्कलिन्दजालहरीकन्दलकालिमद्रुहः ।
परितस्तरुरम्बरस्थलीं परितः स्थूलतमास्तमोभराः ॥ २५ ॥

नयनानि जनस्य तत्क्षणान्निरुणद्धि स्म निरन्तरं तमः ।
रविदीपभृताभ्रकर्परच्युतकालाञ्जनपुञ्जमेचकम् ॥ २६ ॥

तदमंसत मांसलं तमस्तनुतारागणबिन्दुजालकम् ।
दिवसात्ययचण्डताण्डवच्युतमीशस्य गजाजिनं जनाः ॥ २७ ॥

तिमि..........रोपमैस्तरलाभैरुदभावि तारकैः ।
परुषातपतापितात्मनो गगनस्येव निदाघबिन्दुभिः ॥ २८ ॥

अवपत् किमु कालकर्षकस्तिमिराम्भःकलुषे नभस्तले ।
विमलामुडुबीजमण्डलीं नवचन्द्रातपसस्यसिद्धये ॥ २९ ॥

अहरत्ययरागपल्लवस्तमसा कन्दलितो नभस्तरुः ।
सृजति स्म निरन्तरं हरिद्विटपैस्तारककोरकावलिम् ॥ ३० ॥

अगमन्नभिसारिकाः प्रियाननुरागाञ्जनरञ्जितक्षणाः ।
अभिनत्तिमिरेऽपि ताः पुनः श्वसितेनैव सुगन्धिना जनः ॥ ३१ ॥

जननीमुपलभ्य यामिनीमधिकस्नेहदशाभिवर्धिताः ।
दिवसस्य लयं प्रपेदुषो गृहदीपा मुहुरर्भका इव ॥ ३२ ॥

उडुपुष्पकरम्बितं तमःकचभारं दधती निशीथिनी ।
अचिरादियमन्वपालयत् कुमुदस्मेरमुखी निशाकरम् ॥ ३३ ॥

तदनु क्षणदागमोल्लसत्कलशाम्भोनिधिवीचिराचिषः ।
व्यरुचन् कतिचित् कराङ्कुराः शशिनः शातमखे दिशामुखे ॥ ३४ ॥

तरलालसतारकं मुखं कलयन्ती शरकाण्डपाण्डरम् ।
विगलत्तिमिराम्बरा बभौ हरिदैन्द्री हरिणाङ्कगर्भिणी ॥ ३५ ॥

अथ किञ्चिददृश्यतैन्दवं वपुरार्द्रोदयरागलोहितम् ।
बलशासनदिग्विलासिनीमुखसिन्दूरललामकोमलम् ॥ ३६ ॥

परिपिण्डितयावकारुणं प्रचकाशे हिमरश्मिमण्डलम् ।
रचितं नवरक्तसन्ध्यकैर्विजयच्छत्रमिवात्मजन्मनः ॥ ३७ ॥

परुषेऽपि तथा प्रभानिधौ विधुरं लोकमिने परेयुषि ।
उदशिश्वसदादतैःकरैरथ राजा मृदुभिर्नवोदयः ॥ ३८ ॥

अथ कम्पनृपोऽपि कृत्यवित् कृतसन्ध्यासमयोचितक्रियः ।
अवदत् सविधे स्थितां प्रियां भुवि गङ्गेत्यभिनन्दिताह्वयाम् ॥ ३९ ॥

कमलाक्षि! कटाक्ष्यतामयं समयो वर्णनया रसार्द्रया ।
जन एष वचस्तवामृतं श्रवसा पाययितुं कुतूहली ॥ ४० ॥

इति सा दयितेन भाषिता दरनम्रं दधती मुखाम्बुजम् ।
वदति स्म शनैः शुचिस्मिता सरसोदारपदां सरस्वतीम् ॥ ४१ ॥

स्वदमानसुगन्धिमारुतः प्रसरत्कोमलचन्द्रिकोदयः ।
नृपचन्द्र! निरीक्ष्यतामयं [समयः*] पोषितपुष्पसायकः ॥ ४२ ॥

परिरभ्य दृढं चिरागतः प्रथमाशामुदृशा निशापतिः ।
[श्लथयत्यय*]मंशुभिः खैस्तिमिरश्रेणिमयीं प्रवेणिकाम् ॥ ४३ ॥

प्रथमाचलमौलिमुच्चकैरधिरुह्याम्बरपात्रसम्भृताम् ।
अयमंशुमृणालिकामुखैस्तिमिरं चूषयतीव चन्द्रमाः ॥ ४४ ॥

अलिनीलमयस्तमोमयं प्रविलाप्योदयरागवह्निना ।
कलयत्ययमोषधीश्वरः कलधौतं शुचि कौमुदीमिषात् ॥ ४५ ॥

शशिमण्डलशङ्खपेटकादवकृष्य क्षपया समर्पितम् ।
कुमुदच्छवि कौमुदीमयं दधती क्षौममभाद् दिगङ्गना ॥ ४६ ॥

हरितं परिरभ्य वासवीं हरिणाङ्कः करपातलीलया ।
स्पृशति प्रणयात् कुमुद्वतीं बत! विश्वासपदं न कामिनः ॥ ४७ ॥

मुहुरामृशदेव पद्मिनीमपि रागी क्षणदाकरः करैः ।
यदमुं प्रति नैयमुन्मुखी प्रभवत्यत्र पतिव्रतागुणः ॥ ४८ ॥

अनुदर्शमनुप्रवेशतस्तपनाच्छक्तिमवाप तापिनीम् ।
नियतं हिमदीधितिर्यतः क्षमते तापयितुं वियोगिनः ॥ ४९ ॥

अलिविभ्रममन्तरेति यन्न विधोस्तन्मृगलक्ष्म किन्त्वयम् ।
पुरजिद्रथचक्रतार्जितो बहलः कज्जललेपकालिमा ॥ ५० ॥

मघवन्मणिभङ्गमेचकः शशिनि श्यामलिमा चकास्ति यः ।
जनयत्ययमङ्कपालिकाप्रणयालीनानिशीथिनीधियम् ॥ ५१ ॥

कलयामि कलङ्ककैतवान्नियतं धारयते....... ।*

[इति श्रीगङ्गादेव्या विरचिते मधुराविजय-
नाम्नि वीरकम्परायचरिते
सप्तमः सर्गः ।*]

अथाष्टमः सर्गः ।

.... ।
...............................व्याघ्रपुरीति सा यथाथम् ॥

अधिरङ्गमवाप्तयोगनिद्रं हरिमुद्वेजयतीति जातभीतिः ।
पतितं मुहुरिष्टकानिकायं फणचक्रेण निवारयत्यहीन्द्रः ॥

........नुघूर्णदूर्णनाभं वनवेतण्डविमर्दिनीमवस्थाम् ।
विरतान्यपरिच्छदप्रपञ्चो भजते हन्त ! गजप्रमाथिनाथः ॥

घुणजग्धकवाटसम्पुटानि स्फुटदूर्वाङ्कुरसन्धिमण्डपानि ।
श्लथगर्भगृहाणि वीक्ष्य दूये भृशमन्यान्यपि देवताकुलानि ॥

---

* इतः परमुपविंशपद्यनिवेशपर्याप्तं पत्रं तालपत्रादर्शे न लिखितम् । 'व्याघ्रपुरी' त्यादीनां एतन्मध्यवर्तिनामसमग्राणामस्तित्वमेव संभाव्यते ।

मुखराणि पुरा मृदङ्गघोषैरभितो देवकुलानि यान्यभूवन् ।
तुमुलानि भवन्ति फेरवाणां निनदैस्तानि भयङ्करैरिदानीम् ॥

अतिलङ्घ्य चिरन्तनीं स्वसीमामपदेष्वर्पितजीवनप्रवृत्तिः ।
मुहुरुत्पथगामिनी तुलुष्कानधुना ह्यनुकरोति सह्यकन्या ॥

सतताध्वरधूमसौरभैः प्राङ्निगमोद्घोषणवद्भिरग्रहारैः ।
अधुनाजनि विस्रमांसगन्धैरधिकक्षीबतुलुष्कसिंहनादैः ॥

मधुरोपवनं निरीक्ष्य दूये बहुशः खण्डितनालिकेरषण्डम् ।
परितो नृकरोटिकोटिहारप्रचलच्छूलपरम्परापरीतम् ॥

रमणीयतरो बभूव यस्मिन् रमणीनां मणिनूपुरप्रणादः ।
द्विजशृङ्खलिकाखलाक्रियाभिः कुरुते राजपथः स्वकर्णशूलम् ॥

परितस्तततन्तुवायतन्तुव्यतिषङ्गाज्जनितानि जालकानि ।
पुरगोपुरसालभञ्जिकानां दधते चीनपटावगुण्ठनत्वम् ॥

हिमचन्दनवारिसेकशीतान्यभवन् यानि गृहाङ्गणानि राज्ञाम् ।
हृदयं मम खेदयन्ति तानि द्विजबन्दीनयनाम्बुदूषितानि ॥

न तथा कटुभूत्कृताद्यथा मे हृदि जीर्णोपवनेषु घूकलोकात् ।
परिशीलितपारसीकवाग्भ्यो यवनानां भवने यथा शुकेभ्यः ॥

स्तनचन्दनपाण्डु ताम्रपर्ण्यास्तरुणीनामभवत् पुरा यदम्भः ।
तदसृग्भिरुपैति शोणिमानं निहतानामभितो गवां नृशंसैः ॥

स्रुवते न यथापुरं वसूनि क्षितयो वर्षति पूर्ववन्न शक्रः ।
शमनोऽपि जनं नयत्यकाण्डे विषयेऽस्मिन् यवनैर्हतावशिष्टम् ॥

श्वसितानिलशोषिताधराणि श्लथशीर्णायतचूर्णकुन्तलानि ।
बहुबाष्पपरिप्लुतेक्षणानि द्रमिडानां वदनानि वीक्ष्य दूये ॥

श्रुतिरस्तमिता नयः प्रलीनो विरता धर्मकथा च्युतं चरित्रम् ।
सुकृतं गतमाभिजात्यमस्तं किमिवान्यत् कलिरेक एव धन्यः ॥

इति सा निखिलं निवेद्य राज्ञे यवनानां जनगर्हितं चरित्रम् ।
अतिभीषणमात्मनः प्रभावात् कमपि प्रादुरभावयत् कृपाणम् ॥

अथ तं कलधौतकोशतः सा क[illegible]रुच्चखान खड्गम् ।
अचिरोज्झितकञ्चुकानुबन्धस्फुटकालोरगभोगसाम्यभाजम् ॥

क्षयकालकरालरुद्रकालीगलकालागरुकर्दमायमा[illegible]नः ।
महसां प्रसरैरदीपहार्यं किमपि ध्वान्तमिव प्रकाशयन्तम् ॥

प्रतिबिम्बितदीपकान्तिमन्तः स्फुटतापिञ्छतरुप्रसूननीलम् ।
नवमम्बुधरं विडम्बयन्तं जठरोज्जृम्भितविद्युत्प्रकाशम् ॥

तमरातिनराधिनाथनारीनयनाम्भःकणपातहेतुभूतम् ।
प्रभुरुन्मिषितस्वरोषवह्नेरधिकोद्दाममममंस्त धूमदण्डम् ॥

(कलापकम् ।)

प्रणयागतचोलपाण्ड्यलक्ष्मीश्रवणेन्दीवरमालिकायमानम् ।
विरचय्य पुरः कृपाणमेषा पुनरप्याह पुरन्दराभमेनम् ॥

नरनाथ! पुरा कृपाणमेनं विरचय्याखिलदेवतायुधांशैः ।
उपदीकृतवान् पिनाकपाणेर्दनुजानां विजयाय विश्वकर्मा ॥

अमुमुग्रतपःकृतप्रसादः प्रददौ पाण्ड्यनृपाय सोऽपि देवः ।
यमुपेत्य चिरेण तस्य वंश्याः पृथिवीमप्रतिशासनामशासन् ॥

अथ कालवशेन पाण्ड्यवंश्यान् गतवीर्यानवधार्य कुम्भजन्मा
मनुजेश्वर! मण्डलाग्रमेनं भवते प्रेषितवान् महाभुजाय ॥

अमुना युधि दुःसहं महः स्यात् तव नैसर्गिकसाहसप्रवृत्तेः ।
ध्रुवमूष्मणि दारुणो दवाग्निः किमुतोच्चण्डसमीरसंस्तवेन ॥

अधिसङ्गरमस्य च प्रभावाद् भविता ते न कदापि सत्त्वसादः ।
असितोमरचक्रचापमुख्यैर्द्विषदस्त्रैर्वपुषो न चाभिषङ्गः ॥

अमुमास्त्रकरालरश्मिपालीरचितालीकतटिच्छटाविलासम् ।
ध्रुवतस्तव चेष्टितुं पुरस्तान्न कृतान्तोऽपि भवत्यलं किमन्यैः ॥

अमुनाशु विशस्य दक्षिणस्यां मधुरायां पुरि कंसवन्नृशंसम् ।
यवनाधिपतिं बलोत्तरस्त्वं विदधीथाः स्फुटमच्युतावतारम् ॥

अनिदंप्रथमो हि धार्यतेऽसौ भवतान्यैर्गनसाप्यधारणीयः ।
भुवनत्रयरक्षणैकदीक्षाविधिशंसी कटकः (पद्माऽकरा)म्बुजेन ॥

चलवेणिभिरुल्बणास्मश्रुभिर्विपुलश्मश्रुभिरात्तसिंहनादैः ।
विकटभ्रुकुटीकरालफालैस्त्वरमाणस्तु गगान (?)तुलुष्कशीर्षैः ॥

ग्रसतु प्रथनाह्वये दिनादौ प्रथमानो भवतः प्रतापसूर्यः ।
मधुपानमदप्रदोपरूढं यवनीनां स्मितचन्द्रिकाविकासम् ॥

अविनीतिदवानलानुबन्धादधिकोन्मीलदधर्मघर्मजातम् ।
निहताहितलोहिताम्बुवर्षैर्नृप ! निर्वापय तापमुर्वरायाः ॥

परिपन्थिकबन्धकन्धरान्तःस्रुतरक्तासवपूरपारणाभिः ।
कटपूतनभूतयातुधानानभितस्तर्पयतात् तवैष खड्गः ॥

दुरितैकपरं तुलुष्कनाथं द्रुतमुत्खाय जगत्त्रयैकशल्यम् ।
प्रतिरोपय रामसेतुमध्ये विजयस्तम्भशतानि बाहुशालिन् ! ॥

त्वयि नाथ ! नियन्तृतां प्रपन्ने धृतवेगा स्थिरसेतुबन्धनेन ।
प्रथयत्वनुकूलयानलीलामचिरेणैव कवेरजाकरेणुः ॥

[इति श्रीगङ्गादेव्या विरचिते मधुराविजय-
नाम्नि वीरकम्परायचरिते
अष्टमः सर्गः ।*]

इतः परं दश पत्राणि तालपत्रादर्शाद् विभ्रष्टानि ।

*............फलकेन केचित् प्रत्यर्थिनां वञ्चितबाणवर्षाः ।
अलक्ष्यपातं युगपत् कृपाणैः कृत्ताखिलाङ्घ्रीस्तुरगा....म् ॥

आसञ्जिताः कङ्कमुखैर्विमुच्य ....भुवनेषु पङ्क्तिः ।
आराच्चरन्त्या विरराज मृत्योरुत्तम्भिता तोरणमालिकेव ॥

कृत्ताः शशाङ्कार्धमुखैः पृषत्कैर्धनुष्मतां हस्तिकहस्तकाण्डाः ।
रक्तह्रदेषु न्यपतन् भुजङ्गाः पारीक्षितस्येव मखानलेषु ॥

मुक्ताफलैर्वीरकृपाणलेखाविभिन्नगन्धद्विपकुम्भमुक्तैः ।
रक्तारुणैस्तत्क्षणघट्टनोत्थस्फुलिङ्गजातमतिर्वितेने ॥

यावत् कृपाणेन विपाट्य कुम्भं निवर्तते सत्वरमश्ववारः ।
तावद् गृहीत्वास्य तुरङ्गमङ्घ्र्यामास्फालयामास गजस्तमुर्व्याम् ॥

निशाचराः केचन कुञ्जराणां कुम्भस्थलान्निस्सृतमास्रपूरम् ।
निष्ठ्यूतमुक्तामणयः सहर्षं चुचूषुरुत्पुष्करनालदण्डैः ॥

जिघत्सयान्तः पतगैः प्रविष्टैः प्रस्पन्दमानं कुणपं द्विपस्य ।
समीपमासाद्य सजीवबुद्ध्या व्यसुं सतृष्णोऽपि जहौ सृगालः ॥

चक्रैर्निकृत्तानि शिरांसि यावदाधोरणानां न पतन्त्यधस्तात् ।
अक्लिष्टशोभान्यवतंसहेतोस्तावत् प्रतीष्टानि निशाचरीभिः ॥

करेण कश्चित् पदयोर्गृहीत्वा क्षिप्तं दवीयो वियति द्विपेन्द्रः ।
पतन्तमाच्छिन्नकृपाणयष्टिः प्रत्यैच्छदुच्चैर्दशनद्वयेन ॥

क्षिप्तो गजेनोर्ध्वमसिद्वितीयः स्कन्धे निपत्यास्य पुरस्तरस्वी ।
निपात्य चाधोरणमभ्यमित्रं गजाधिरोहः स्वयमेव जज्ञे ॥

द्विषा सरोषेण पृषत्कवर्षैर्निषूदितः कोऽप्यमरत्वमेत्य ।
चकार तस्योपरि पुष्पवर्षं सहर्षमुद्घोषितचाटुवादः ॥

---

* इतः पूर्वं शताधिकश्लोकविच्छेदसंभावनया सर्गसङ्ख्या न निश्चेतुं शक्या ।

कुन्तेन कश्चिद् द्विषता विभिन्नस्तथैव संश्लेषममुष्य यातः ।
भिन्दन्नुरस्तेन चमत्कृतोऽभूद् गुणेषु को मत्सरमादधाति ॥

चिराय कौचित् कलहायमानावन्योन्यकौक्षेयककृत्तशीर्षौ ।
विमुक्तदेहौ तदनुक्षणेन ससौहृदौ दिव्यपुरीमयाताम् ॥

सङ्ग्रामवन्यामभितश्चरन्तो दर्पोद्धताः केचन राजसिंहाः ।
प्रत्यर्थिनां पार्थिवकुञ्जराणां शिरांस्यभिन्दन्नखरैः[खराग्रैः* ॥]

.... ।
...स्तस्य विरोधियोधान् दृष्ट्वा जहासेव पलायमानान् ॥

एकप्रहारेण सकङ्कटानामाधोरणानां करिणां च देहैः ।
द्विधा विभिन्नैरभितो दिवेक्तुमीषत्करास्तस्य विमर्दमार्गाः ॥

कुम्भेषु भिन्दन् नृपतिर्द्विपेन्द्रान् मुक्ताफलैः शर्करिलान्तराभिः ।
प्रावर्तयद् रक्ततरङ्गिणीभिः परश्शताः संयति ताम्रपर्णीः ॥

तेन द्विपास्तोमरिणा विभिन्नाः कुंभस्थलैरुज्झितमौक्तिकौघैः ।
क्रौञ्चस्य जह्रुर्गुहशक्तिघातप्रकीर्णहंसप्रकरस्य शोभाम् ॥

रंहस्विनः स्वाभिमुखान् क्षितीन्द्रो मृगान् नखाग्रेण यथा तरक्षुः ।
प्रसह्य वक्षस्सु युधि प्रवीरान् क्षुण्णानकार्षीच्छुरिकामुखेन ॥

शूरस्तथा प्राहृत मुद्गरेण शिरस्त्रवन्ति द्विषतां शिरांसि ।
यथा विनिर्यन्नयनानि तानि मङ्क्षु न्यमाङ्क्षुः स्वशरीर एव ॥

[तस्मि*]न्निति व्यापृतहेतिजाते परापतन्त्यः परिपन्थिसेनाः ।
कल्पक्षयोदर्चिषि हव्यवाहे महाम्बुधेराप इवाशु ने[शुः*] ॥

न जामदग्न्येन न राघवेण तथा न भीमेन न चार्जुनेन ।
आपादितस्तेन यथा समीके हर्षो महर्षेः कलहप्रियस्य ॥

इतः परं पत्रद्वयं निर्लेखं दृश्यते ।

ततस्तुलुष्कान् युधि [कान्दिशी*]कानालोक्य विष्फारितघोरशार्ङ्गः ।
कम्पक्षितीन्द्रं यवनाधिराजः प्रत्यग्रहीद् वृत्र इवामरेन्द्रम् ॥

तं वीरपाणाधिकपाटलाक्षं ललाटलक्ष्यभ्रुकुटीकरालम् ।
मदस्य रोषस्य च देहबन्धं संभेदमाशङ्कत वीरवर्गः ॥

निरायता तस्य तुरङ्गवेगा वेणिर्मणिश्रेणिमती चकाशे ।
अमर्षवह्नेर्ज्वलनोन्मुखस्य धूमच्छटेव स्फुरितस्फुलिङ्गा ॥

आस्फाल्यमानस्य च तेन गाढं शार्ङ्गस्य मौर्वीनिनदश्चकार ।
चिरात् परित्यज्य तमुच्चलन्त्या जयश्रियो नूपुरघोषशङ्काम् ॥

पराक्रमाधःकृतचोलपाण्ड्यं वल्लालसम्पल्लतिकाकुठारम् ।
रणोन्मुखं कम्पनृपोऽभ्यनन्दीद् वीरः सुरत्राणमदभ्रशौर्यः ॥

आकर्णमाकृष्टशरासनौ तौ मिथः किरन्तौ विशिखानसङ्ख्यान् ।
वीरौ स्वबाहुद्रविणानुरूपमायोधनं मानधनौ व्यधाताम् ॥

बाणा निरस्ता यवनेन तस्मिन्नपाङ्गपाता इव वीरलक्ष्म्याः ।
कम्पेश्वरेणाप्यभिपारसीकं शराः कटाक्षा इव कालरात्रेः ॥

स केरलप्राणमरुद्भुजङ्गान् वन्यावनीन्द्रद्रुमदाववह्नीन् ।
अन्धान्धकारक्षयतिग्मभासो बाणानमुञ्चद् यवने नरेन्द्रः ॥

क्षतानि यान्यस्य शरैः शरीरे चकार वीरस्य तुलुष्कवीरः ।
वितेनिरे तानि नखाङ्कशङ्कां जयश्रियो भोगसमुत्सुकायाः ॥

उदग्रमग्रे यवनाधिभर्तुः साक्षात्कलेर्मौलिमिवाशुगेन ।
स मङ्क्षु सार्धं जयकाङ्क्षितेन ध्वाङ्क्षध्वजं ध्वंसयति स्म धन्वी ॥

अमर्षितस्याथ पृषत्कवर्षं विमुञ्चतो विद्विषतः शरेण ।
स कार्मुकज्यामलुनात् तुलुष्कराज्यश्रियो मङ्गलसूत्रकल्पाम् ॥

विहाय शार्ङ्गं धनुरिद्धरोषस्तुलुष्क[वीरस्त*]रवारिमुग्रम् ।
तुरङ्गपर्याणनिबद्धवर्ध्राविलम्बि(भिःनं) सत्वरमुज्जहार ॥

अथाग्रहीत् कम्पनृपस्तमेव कौक्षेयकं काल[करालरूपम् ।
त्या*]पादनार्थं यवनेश्वरस्य यः प्रेषितः प्राक् कलशोद्भवेन ॥

विषच्छटाधूम्ररुचिर्नृपस्य कराग्रभूता करवाललेखा ।
[जिह्वेव रेजे*] यवनाधिराजप्राणानिलान् जिग्रसिषोर्भुजाहेः ॥

स वञ्चयंस्तत्तरवारिधारां धाराविशेषप्रवणौपवाह्यः ।
अशातयत्तस्य शिरो निमेषा[र्देन*]न कर्णाटकुलप्रदीपः ॥

अज्ञातसेवोचितचाटुवादं तुलुष्कसाम्राज्यकृताभिषेकम् ।
दिवौकसामप्यकृतप्रणामं भूमौ सुरत्राणशिरः पपात ॥

च्युतेऽपि शीर्षे चलिताश्ववल्गानियन्त्रणव्यापृतवामपाणिम् ।
प्रतिप्रहारप्रसृतान्यहस्तं वीरः कबन्धं द्विषतोऽभ्यनन्दीत् ॥

मानोन्नते कम्पनृपस्य मौलौ पपात दिव्यद्रुमपुष्पवृष्टिः ।
स्वयंवराभ्युत्सुकराजलक्ष्मीविमुक्तमुक्ताक्षतजालकल्पा ॥

प्रशान्तदावेव वनान्तलक्ष्मीर्गतोपरागा गगनस्थलीव ।
कलिन्दजा मर्दितकालियेव दिग् दक्षिणासीत् क्षतपारसीका ॥

हतावशिष्टानथ वैरियोधान् संरक्ष्य पादप्रण*........ ।
.... ॥

[इति श्रीगङ्गादेव्या विरचितं मधुराविजयं
नाम वीरकम्परायचरितं
समाप्तम् ।*]
शिवं भूयात् ।



* इयानेन तालपत्रादर्थः समुपलब्धः ।

EXTRACTS FROM SELECT OPINIONS.

The Modern Review (March, 1917):—"In the extant Sanskrit anthologies the name of female poets and their selected verses are found not to a small extent, but we could not come across any complete work written by a poetess. We are, however, extremely glad to note and our sincere thanks are due to Pandits Harihara Sastri and Srinivasa Sastri that they have been able to bring to light a volume which may be regarded complete, though in fact not so, owing to the gaps left out by the scribe in the manuscript—the only manuscript from which it has been printed.

Its authoress, Gangadevi, was the queen of Kampana or Kampa, one of the kings of Vijayanagara (1367 A. D). The subject of her present work is the life of her royal consort with special reference to the conquest of Madhura (Madura) then under the flag of the Muhammadan rule. Hence the Kavya is termed Madhura-vijaya or Virakamparayacharita. The book thus throws a flood of light upon the history of that time in the Deccan. The historical importance of the work has been shown in an ably written introduction by Mr. T. A. Gopinatha Rao M. A., who is not unknown to the readers of the Modern Review.

As to the poetical merit of the work the poetess has exhibited her so much poetic talents in every direction that it deserves to be classed among the writings of Mahakavis (the great poets in Sanskrit literature).

It is written in strict conformity to the rules of a Mahakavya laid down in Sanskrit Rhetoric, and as the learned editors have pointed out, our poetess "writes in Vaidarbhi style, and her thoughts flow with ease and simplicity. Her diction is beautiful and charming and her similis are grand and drawn direct from nature." Indeed a new chapter will be added to Sanskrit literature by the discovery of this work, and India may be proud not only of her one Gangadevi, the sacred river Ganges, but also of another Gangadevi, the poetess of Madhura-vijayam."

VIDHUSEKHARA BHATTACHARYA.

—:0:—

The United India & Native States (11th June-1917):—"This charming poem published from Travancore gives the go-by to the old charge that Sanskrit has not produced Women poets. The discovery of the work is important not only as a reminder of female achievement in Sanskrit literature, but as a source of fresh first hand light on the early history of the Vijayanagara Empire."

The Hindu Madras (1st May 19[illegible]):—"A most valuable and pleasing work of a Hindu poetess whose talents have been surpassed but by few of our poets."

R. Narasimhacharya M. A., Director, Archaeological Researches, Mysore (11-1[illegible]-[illegible]16):— The book contains several welcome items of information which add to our present knowledge of the Vijayanagara History."

செந்தமிழ் ([illegible]):—' [illegible] சுலோகங்கெல்லாம் [illegible] பனவாக விளங்குகின்றன. [illegible] துஷ்பமும் [illegible] வர் [illegible] வாலது.

இக்காவியத்தினால் தேவியாருடைய கல்வித்திறமை [illegible]வதல்லாம் [illegible] முதலிய பல குணங்களுடைய [illegible] சரித்திராராய்ச்சிக்கு [illegible] தெரியவருகின்றன. தேவியார் பேதையர் என்னும் பெண்மக்களுள் ஒருவராயிருப்பினும் அவர் [illegible]டைந்த வைதுஷ்யத்தை அவம் போக்காது விநியோகஞ்செய்திருப்பதைச் சற்று யோசித்துப் பார்த்தால் சாதாரணமாக பெண்கல்வியின் அருமையையும் அதை உபயோகிக்கும் முறையையும் அதனலாகும் பயன்களையும் எல்லோருமறிந்துகொள்வதற்கேற்றதொரு படிமைப்புப்போல் விளங்கும்படி குலமகட்குத் தெய்வம் கொழுநன் என்ற கொள்கையுடையராய் வீரப்ரதாபாதி குணவிசேஷங்களை விஷயமாகக்கொண்டு பர்த்ருகீர்த்தனம் பண்ணித் தம் பர்த்தாவுக்கு இம்மையில் இன்பமும் புகழும் உண்டாக்கி "மண்புலவர்பாடும் புகழுடையோர் விசும்பின் வலவனேவாவான வூர்தியெய்துப" என்றபடி மறுமையிலுத்தமலோகப்ராப்தியுண்டாகச்செய்துகொண்ட புத்திசாதுர்யம் நன்கு புலப்படத்தக்கது."

Copies can be had of:—

G. HARIHARA SASTRI


Pandit, Sanskrit Publication Department

TRIVANDRUM.

श्रीः

वाल्मीकिरामायणान्तरार्थदीपिका

श्रीभागवतपौराणिकाख्यात्तुरैशांस्त्रिप्रणीता



तदीयव्ययेनैव मुद्रापणपूर्वकं प्रकटीकृता



विज्ञानचिन्तामणिमुद्राशाला

पट्टाम्पि

ए-रामशर्मणा मुद्रापिता

१९०३

मूल्यं कलाष्टकं ८

शुद्धिपत्रिका

भागः	पंक्तिः	अशुद्धिः	शुद्धिः
९	१५	गरुणा	गुरुणा
१४	१३	देहमवा	देहमेवा
१५	७	ब्रह्मण्ड	ब्रह्माण्ड
१६	५	कशला	कुशला
१८	१०	कम	काम
२०	१९	शोशब्द	गोशब्द
२६	४	ब्रह्मसा	ब्रह्मरसा
२७	२०	केय्यात	केय्या तस्मिन्नेवन्यस्तौ त
४९	४	यज्यत	युज्यत
,,	११	आनयेत्	आनाय्य
५०	३	भाग्यव	भाग्यवा
५३	७	किन्त	किन्तु
,,	१६	हादर	होदर
५७	३	केष	केषा
,,	५	णनजो	णानुजो
६०	५	धन	धनु
६४	१७	ब्रह्मण	ब्राह्मण

शुद्धपत्रिका।

भागः	पंक्तिः	अशुद्धिः	शुद्धिः
६९	१	त्वयाच्य	त्वयांच्य
,,	६	पशवो- भुवन।	पशवो मनुष्याः वार्धमा- त्रिश्वा भुवन।
,,	११	स्वात्मप्ये	स्वात्माप्ये
७१	१२	त्यत्रसन्देहः	त्यत्र न सन्देहः
७३	१	स्यर्हेत	स्यार्हेन
७४	१२	प्यनदृत्य	प्यनादृत्य

श्रीरामो जयतु

वाल्मीकिरामायणान्तरार्थदीपिका

श्रीभागवतपौराणिकाख्याचार्य-

शास्त्रिप्रणीता

अस्याः कृतेर्महद्भिर्दत्तान्यनुमोदनानि

१-अयि पौराणिकमौले! सम्यगवालोकि दीपिका सेयम्। दूरीकरोति चेतस्तमोधुना किञ्च मोदमावहति। अहो भागवतपौराणिका भवदीयकृतावस्यां श्रीमद्वाल्मीकिरामायणान्तरार्थदीपिकायां भवद्भिरुपपादिता आन्तरार्थाः प्रमाणयुक्त्यनुभवरमणीया एव दरीदृश्यन्ते। बाह्यार्थेषु तु प्रायशः क्वचित् क्वचिल्लेशतस्सन्ति हि विरोधाः। सर्वेषामपि तेषां परिहारार्थमिमे आन्तरार्था अवश्योपयुक्ताश्चेति मन्यामहे। प्राचीनाचार्यैरप्रपाञ्चितानां पुराणग्रन्थेष्वदृष्टानामप्येतेषामान्तरार्थानां सम्यगवलोकनावसरे प्रकृतग्रन्थप्रणेतृणां तत्रभवतां समीक्ष्य निरंकुशप्रसरां कुशाग्रबुद्धिं वयमत्यन्तमनुमोदामहे। यद्यपीयं रामायणान्तरार्थदीपिका सहृदयहृदयाह्लादकारिणी दृश्यते। तथापि "सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः।" एतद्वचनानुरोधेन द्वैतविशिष्टाद्वैतमतनिराकरणप्रवृत्ततया ईषत्कळंकसंगतापीति प्रतिभाति। कळंकोप्ययमेतद्ग्रन्थकर्तृषु नानुबध्यत इति प्रकृतग्रन्थप्रतिपादितं विषयमुद्दिश्य किञ्चिदप्युपन्यस्तुमधुना न वयमभिप्रैमः। अपि तु रामायणक्षीरवारिधिपूरमखिलमालोड्य तत्सारभूतममृतमान्तरार्थमाविष्कुर्वतश्श्रीमद्भागवतपौरा-

णिकान् अय्यात्तुरैशास्त्रिणस्तत्रभवतस्सांप्रतं सप्रमोदमिह व-
यमभिनन्दामः । अत्रायं श्लोकः ।

श्रीमद्रामकथांबुराशिमथनेनासाद्य खेदापहं
सारार्थामृतमर्प्पयन् स विबुधश्रेण्यै सकौतूहलम्
जीयादाशशिसूरतारकमयं पौराणिकाग्रेसरः
शास्त्री प्रौढकुशाग्रबुद्धिमहितस्सेयं मदभ्यर्थना ॥

१०७८ मकर २३ मांङ्काव } मानविक्रमकविराजकुमारः

२—वाल्मीकिरामायणान्तरार्थदीपिकापुस्तकेस्मिन् श्रीभागवतपौराणिकेनाय्यात्तुरैशास्त्रिणा प्रतिपादितान्तरार्थाः प्रमाणयुक्त्यनुभवालंकृता एव शोभन्ते । पूर्वैरार्यैरनुक्तत्वात् प्राचीनेषु ग्रन्थेष्वदृष्टत्वाच्च चित्तमोदमलभमाना अपि वय-मस्य सूक्ष्मार्थग्रहणपटीयसीं बुद्धिमनुमोदामहे ।

कटत्तनाट्टकृष्णवर्ममहाराजाः

३—अद्वैतमतावलम्बिनामस्माकं पुराणेषु तत्र तत्र स्थूलदृष्ट्या दृश्यमानान् दोषकणान् निजमनीषाविशेषेण निर्मूलयितुमुद्यतानां प्रायेण प्राचीनाचार्यवर्यैरप्रपञ्चितानप्या-न्तरार्थानज्ञजनानुग्रहबुद्ध्या बहिः प्रकाशयतां श्रीभागवत-पौराणिकाय्यात्तुरैशास्त्रिणां समुद्यममिमं को वा नाभिनन्देत् ।

अत्रायं श्लोकः

श्रीमद्भागवतार्थवक्तृबुधराजाय्यात्तुरैशास्त्रिणा
श्रीवाल्मीकिमहामुनीन्द्ररचितं रामायणांभोनिधिम् ।

मेधामन्दरभूधरेण नितरां निर्मथ्य निष्पादितं
गूढार्थामृतमद्य हृद्यमधिकं सन्तः पिबन्त्वादरात् ॥
उदयवर्मभैमिभूयुवराजः

४—तन्त्रीपौराणिकालोकमहानलभयादिदम् ❀ ।
सततं रक्षतु श्रीमत्सीतासुकृतमञ्जरी ॥
कोपि सहृदयः

❀ इदं । आन्तरार्थदीपिकापुस्तकम्

५—विद्वन्मौलिविराजमानमकुटालङ्कारचिन्तामणि-
रसद्वाल्मीकिमुखाब्जनिस्सृतमधु श्रीरामगीतां पिबन् ।
हृद्यन्ततत्परमार्थतत्त्वममृतं सत्सु प्रदानेच्छया
गद्यं योरचयत् स भूसुरवरो लोके विजेजीयते ॥ १ ॥
श्रीभागवतपौराणिकाय्यात्तुरमनीषिणा ।
रचितं रामगीतान्तरार्थं मधु पुनातु वः ॥
केरळवर्मनाम्ना पुरळीनृपेण लिखितमिदमनुमोदनम् ॥

६—वल्मीकभूरकृत रामकथां पुरासौ
सूक्ष्मन्तदर्थमपि किं प्रकटीकरिष्यन् ।
अय्यात्तुरैपरपदान्तरितोत्र शास्त्री
शास्त्री सतामुपकृतौ स्वयमाविरासीत् ॥
अबाधितं न्यायपथेन वेदवेदान्तपीयूषझरेण सिक्तम् ।
अय्यात्तुरैशास्त्रिमुनिप्रणीतं रामायणार्थं कलयन्तु सन्तः ॥
मणन्तलनीलकण्ठशर्मा बि–के–संस्कृतपण्डितः
तलश्शेरि

७—शुभमस्तु । श्रीमत्यतिगंभीरे प्राचेतसमुनिवर-प्रणीते अनन्तगूढार्थरत्नाकरे सरसे रामायणार्णवे प्रविष्टा बहवोन्तर्वाणयः त्रैवर्गिकभूयिष्टं लोकमवगम्य तन्मतानुसारेण त्रिवर्गप्रधानान् अर्थमणीनेवोद्धृत्य यद्यपि प्राकाशयन् । तथाप्यधुना रामायणार्णवाधस्तलावधि निमग्नेन तादृशार्थ-मणिलाभमात्रेणापरितुष्यता अमृतत्वनिदानभूताद्वैतार्थरत्नम-णीनेवान्विष्यता पूर्वं श्रीभागवतपौराणिक इति करभूषणा-ङ्कनप्रथितेन इदानीं रामायणार्णवनिलीनाद्वैतार्थरत्नप्रकाश-क इत्यपि प्रसिद्धिं गतेनाय्यात्तुरैशास्त्रिणा उद्धृत्य प्रकाशि-ता अद्वैतार्थमणयः ममेव सर्वेषां सहृदयानां हृदयानन्दस-न्दोहदायिनो भवन्तीत्यनुमोदामहे ॥

अत्रायं श्लोकः


गंभीरे बहुळार्थरत्ननिबिडे रामायणाब्धौ पुरा
प्राचीनैरवगाह्य भावमणयो बाह्या जयन्त्युद्धृताः ।
अद्याय्यात्तुरशास्त्रिणान्तरतमाद्वैतार्थरत्नान्यपि
प्रोद्धृत्य प्रतिपादितानि जनयन्त्यानन्दमग्नं मनः ॥

इदं कल्पादिग्रामवासिना अण्णय्यापरपर्यायेण चि-दम्बरेश्वरशास्त्रिणा लिखितमय्यात्तुरैशास्त्रिप्रणीतरामायणा-न्तराद्वैतार्थानुमोदनम् ॥

८—रामायणान्तरार्थप्रदीपिका हरतिनस्तमोन्तरिह
आयाग्रण्यय्यतुरैसूर्याकालितेयमत्र किञ्चित्रम् ॥

इरिवेनाट्ट किलक्केटत्त कुञ्ञिक्कणन्एळयनस्यार

श्रीरामो जयतु



वाल्मीकिरामायणान्तरार्थदीपिका
श्रीभागवतपौराणिकाख्यात्तुरैशास्त्रिप्रणीता।



॥ अवतारिका ॥



श्रीमद्भागवतमहाभारताद्यार्यमतप्रमाणप्रतिपाद्यमानानां भूगोळादिसर्वविषयाणां इदानीमांग्लेयैस्तद्भाषानिपुणैः कैश्चिदार्यैरप्युच्यमानानाञ्च तेजस्तिमिरयोरिव परस्परविरुद्धता सर्वानुभवसिद्धैव। आंग्लेयैरुच्यमानान् निषिद्धार्यमतप्रमाणप्रतिपाद्यमानान् सयुक्तिकं सानुभवञ्च स्थापयितुमार्यैरशक्यमेवेति विज्ञानचिन्तामण्यादिपत्रेषु बहूद्घुष्टमस्माभिः। किञ्च गोळात्मिकेयं भूमिराकाशे तिष्ठति। ज्योतिश्चक्रञ्चाकाशे भूमेरुपर्यधः प्रतिदिनं पश्चिमाभिमुखं सञ्चरतीति गोळाध्याये स्पष्टमेवोक्तम्। तथैवेदानीन्तनैः कार्तान्तिकैरप्युच्यते। तत्र निदर्शनञ्चन्द्रसूर्योपराग एव। एवञ्च श्रीमद्भागवतपञ्चमस्कन्धोक्तानां प्रत्येकायुतयोजनविस्ताराणां अतलादीनां सप्तपाताळलोकानां महानपलाप एवेत्याम्रेडितमस्माभिस्तत्रैव विज्ञानचिन्तामणिपत्रे। अपि च परिमितप्रमाणे गोळाध्यायोक्तमानलक्षणवति भगोळे लक्षद्विलक्षयोज-

नेत्याद्युपर्युपरिद्विगुणमानवतां सप्तद्वीपसप्तसमुद्राणामनवकाश एव स्पष्टमवगम्यते । किञ्च प्रियव्रतरथचरणनेमिपरिखातास्सप्त सिन्धव इति स्पष्टमुक्तं खलु पञ्चमस्कन्धे । हा हा चतुष्षष्टिलक्षयोजनविस्तारचक्रयुतो रथ इति कथं घटेत? । तादृशरथारूढः प्रियव्रतस्तस्मिन् रथे निबद्धास्तुरगाश्च कीदृशा इति वयं न विद्मः । आंग्लेयपरिहासास्पदलैनैवंविधा युक्त्यनुभवविकला बहवो विषयास्सन्त्येव भागवतभारतादिपुराणेष्विति विज्ञानचिन्तामण्यादिपत्रेष्वस्माभिर्बहूपन्यस्तमपि सुचिरमूषरे वर्षितमेव ।

अयि महाशया आर्याः! ब्रह्मसूत्रदशोपनिषद्भगवद्गीताख्यवेदान्तशास्त्रेष्वद्वैतब्रह्मतत्वप्रतिपादकोतिगम्भीरो योऽर्थः प्रतिपादितस्स एवार्थो भागवतभारतादिपुराणेष्वपि गर्भीकृतो वर्तते । तादृशार्थस्फारकतयैव भागवतभारतादिपुराणेषु बाह्यार्थो वर्ण्यते । न तु सत्यतयेति निर्विशयं सधृष्टं ब्रूमो वयम् ।

किञ्च भागवतभारतादिपुराणानां अद्वैततत्वप्रतिपादकतया व्यज्यमानान्तरार्थोयमयमित्यस्माभिर्यथामति पुस्तकरूपेण विरच्य मुद्रापितः । अपि च श्रीमद्भागवतमहाभारतादिपुराणान्तरार्थोस्माभिर्यथावगतस्तथा वाल्मीकिरामायणान्तरार्थो नैवावगतः । आदिकाव्यत्वादतिगंभीरत्वाच्चास्य रामायणस्य ।

॥ ३ ॥

अथेदानीं केरळेषु शिरश्श्रेण्याख्य(तलश्शेरि)पत्तने श्रीबृहद्वनवासिनं भगवन्तं दाशरथिं भजद्भिरस्माभिश्श्रीवाल्मीकिरामायणमर्थतो गीयते । अत्राद्वैतपरब्रह्मात्मकश्रीरामचन्द्रकृपया वाल्मीकिरामायणस्याप्यान्तरार्थोंद्यावगतः । निरवधिकमहिमानं वाल्मीकिरामायणान्तरार्थं साकल्येन वक्तुं को वा शक्नुयात् । तथापि केषाञ्चिन्मुख्यविषयाणां यथामत्यान्तरार्थनिरूपणाय कयोश्चिद्विप्रयोस्संवादरूपेणेदं पुस्तकं विरच्यतेस्माभिः । ये तावदस्मिन् जन्मनि जन्मान्तरे वाप्यकृतसुकृतास्ते मामुन्मादिनं ब्रूयुरेव । तथापि मदुच्यमानान्तरार्थाश्श्रीरामचन्द्रकृपया महतामुन्मोदाय भवेयुरेवेति विश्वसिमो वयम् ।

अपि चास्मदुच्यमानान् श्रीवाल्मीकिरामायणान्तरार्थान् ये खण्डयिष्यन्ति तैर्महाशयैरार्यैः पुस्तकेस्मिंस्तत्र तत्र (—) एतदङ्कद्वयमध्यगतानां सर्वेषां विषयाणां समीचीनतया समाधानपुरस्सरं खण्डनं कर्तव्यम् । तदपि लेखनेनैव । न तु वाङ्मात्रेण । वाङ्मात्रखण्डनस्य सलिललिखितलिपिवदनन्तरक्षणविनाश्यत्वादिति सविनयं महद्भ्योर्पयामो नमश्शतानि ।

श्रीभागवतपौराणिकः अय्यात्तुरैशास्त्री

कल्लिक्कोट्टै तळि

॥ श्रीरामो जयतु ॥

॥ श्रीवाल्मीकिरामायणान्तरार्थदीपिका ॥

श्रीभागवतपौराणिकाय्याचार्यैः शास्त्रिभिः प्रणीता.



क्षमन्तां साहसमिदं सन्तस्सन्तोषशालिनः ।
किञ्चास्माननुगृह्णन्तु गुणदोषविवेचकाः ॥ १ ॥
अज्ञानेन यदस्माभिरबद्धमिह भाष्यते ।
तदन्यदपि तत्सर्वं रामचन्द्रार्पणं भवेत् ॥ २ ॥
कर्मनिष्ठो द्विजः कश्चित् सत्यनिष्ठस्तथापरः ।
मानसे मण्डपे स्थित्वा संवादं चक्रतुर्मिथः ॥ ३ ॥

१—कर्मनिष्ठ उवाच । सखे सत्यनिष्ठ! कियतः कालात् पूर्वं केनचिदांग्लेयभाषाविदुषा रामायणपरिशोधनं नाम किमपि पुस्तकं कैरळ्या वाचा विरचितं मुद्रापितञ्च । तद्भवता दृष्टं किं? ॥

सत्यनिष्ठोऽब्रवीत् । मदीयाभिधानमुखविलसितं तत् पुस्तकं केनचिन्मह्यं प्रेषितम् । दृष्टमेवाम्मूलचूडं मया ॥

२ कर्मनिष्ठः । तत्र किं प्रतिपाद्यते । तद्विषये भवता किमभिप्रेतम् ॥

सत्यनिष्ठः । वाल्मीकिरामायणे अघटिता बहवो विषया विवृताः । इदं रामायणमांग्लेयानां परिहासास्पदमेवेति प्रणमुक्तन्तेन कविना । अपि च परप्रतारणपूर्वकं ध-

नार्ज्जनपरेण पूर्वकालीनेन केनचिदस्मादृशा विदुषा कृतमिदं रामायणमिति पुस्तककर्तुरभिप्रायः। विद्वानयं पुस्तककर्ता नयनपाटवविकल एवेत्यस्माभिरुक्तोभिप्रायः॥

३ कर्म—केनैवंविधोभिप्रायो भवतोक्तः॥

सत्य—श्रीवाल्मीकिरामायणे श्रीभागवते महाभारते चान्येषु पुराणेष्वपि कविनानेनोक्तव्यतिरेकेणाघटिता बहवो विषया विद्यन्ते। आंग्लेयपरिहासास्पदाश्च। आंग्लेयभाषाविदुषानेन तेषां साकल्येनादृष्टत्वादेव॥

४ कर्म—श्रीभागवते महाभारते वाल्मीकिरामायणे चार्यमतप्रमाणेष्वघटिता विषया आंग्लेयपरिहासास्पदाश्च वर्तन्त इति भवताप्यंगीकृतं किम। तथा चेत्तत्समाधानायार्या विद्वांसो न सन्ति किम?।

सत्य—विद्वद्भिरार्यैः क्रियमाणेषु समाधानेष्वप्यघटिताः परिहासास्पदाश्च जायेरन्। पुनरपि तत्समाधाने पुनस्तत्रापि जायेरन्। सखे कर्मनिष्ठ! आर्यमतप्रमाणानि श्रीभागवतमहाभारतवाल्मीकिरामायणादीनि सत्यान्येवेतीदमेव समाधानं समीचीनम। प्रमाणानामतिगांभीर्यार्थत्वात्॥

५ कर्म—भवतोक्तमिदं कथं समाधानं भवेत्?। हन्तार्यमतप्रमाणानां भागवतभारतरामायणादीनां असाधुत्वे कथमार्यमतन्तिष्ठेत्। कष्टमिदानीम्महत्संकटमापन्नोहं कर्मपरः॥

सत्य—सखे! मा विषीद। भागवतभारतरामायणादिप्रमाणेष्वद्वैतब्रह्मप्रतिपादकवेदान्तशास्त्रमनुसृत्यातिगम्भीर आन्तरार्थो गर्भीकृतो विद्यते। तादृशान्तरार्थस्फोरकतयैव बाह्यार्थो वर्ण्यते। न तु बाह्यार्थस्य सत्यतया। एवंविधान्तरार्थगन्धानभिज्ञानामार्याणां प्रमाणमिदं भागवतभारतरामायणादिकं आंग्लेयपरिहासास्पदमेवेत्येतद्विज्ञानाचिन्तामणिपत्रेषु जिज्ञासासतकमित्याद्युपन्यासैरस्माभिरुद्घुष्टमप्यरण्यरुदितमेव वर्तते कालेयकालमहिमातिरेकेण॥

६ कर्म—आर्यमतप्रमाणानां पुराणानामघटितत्वांग्लेयपरिहासास्पदत्वपरिहारायान्तरार्थो विद्यते चेद्भवद्भ्य एव तादृशोऽर्थो भवता लोकोपकृतये॥

सत्य—वृत्तान्तपत्रेषूपन्यासैरार्यमतसञ्जीविनीत्यादिकतिपयपुस्तकरचनेन चास्माभिर्भागवतभारतयोरान्तरार्थो यथामति विवृतः। इदानीं यथामति वाल्मीकिरामायणान्तरार्थनिरूपणमावश्यकमेव। प्रस्तुतत्वात्तत्प्रसंगस्य॥

७ कर्म—भागवतभारतादीनि पुराणानि व्यासप्रोक्तानि। तदुक्ता तु नैमिशारण्यवासिभ्यस्सूत एवेति खलु प्रसिद्धिः। रामायणन्तु वाल्मीकिप्रोक्तम्। आदिकाव्यं गेयमेव। गायकौ त्वश्वमेधमहामण्डपे कुसलवावेवेति निश्चयः। एवंविधनिश्चयस्यान्तरार्थः कः॥

सत्य—अद्वैतब्रह्मप्रतिपादकं वेदान्तशास्त्रं प्रस्थान-

त्रयाख्यब्रह्मसूत्रभगवद्गीतादशोपनिषत्सु समासेन प्रोक्तम् । तदेव ब्रह्मप्रतिपादकशास्त्रं पुराणेषु व्यासेन विस्तरेण प्रोच्यते । तस्मात् पुराणानि व्यासप्रोक्तानीत्युच्यते । अत्र व्यासशब्दो विस्तारवाचकः । नैमिशारण्यन्तु ब्रह्मणा विसृष्टस्य चक्रस्य नेमिर्यत्र शीर्यते कुण्ठीभवति तन्नैमिशं स्थानम् । तदेव भवादृशैः कर्मपरैर्नैमिशारण्यमित्युच्यते । अस्माकन्तु सत्यपराणां "चक्रे विसृष्टमजयेश्वर! षोडशारे निष्पीड्यमानमुपकर्ष विभो! प्रपन्न"मिति प्रह्लादोक्तस्य मनश्चक्रस्य ब्रह्मसृष्टस्य लयस्थानमेव नैमिशम् । तत्तु ब्रह्मनिष्ठैव । तस्मिन्नैमिशारण्ये ब्रह्मनिष्ठायां स्थितेभ्यस्सूतेन रसेन पुराणानि पठ्यन्ते । अत्र सूतशब्दो रसवाचकः । रसस्तु ब्रह्मरस एव । "रसो वैसः । रसं ह्येवायं लब्ध्वानन्दीभवती"तिश्रुतेः । "रसो ब्रह्म रसं लब्ध्वानन्दीभवति नान्यथे"ति स्मृतेश्च । (अन्यथास्य पुराणवक्तुस्सूतस्य रोमहर्षण इति नाम कथञ्जातं? वद सखे! ।)ब्रह्मरसानुभवस्य द्योतकं हि रोमहर्षणम् । अतस्सूतो ब्रह्मरस एव । तीर्थाटने नैमिशं गतो बलरामस्सूतं रोमहर्षणमवधीत् । तत्र स्थितैर्याचितस्तत्पुत्रमुग्रश्रवसं पुराणवक्तारं सूतमकरोदिति ब्राह्मण्यां क्षत्रियाज्जातस्सूत इति च वर्ण्यमानानां आन्तरार्थस्समीचीनतयास्त्येव । अत्राप्रस्तुतविस्तराद्विरमामः । अयि सखे! व्यासप्रोक्तानां भागवतभारतादिपुराणानां श्रोतारो मनोलयात्मकब्रह्म-

निष्ठायां स्थिता एव । वक्ता तु रोमहर्षणोपलक्षितब्रह्मरसानुभववानेव । न तु वीणामङ्के निधाय कल्याणीशहनाबिहाकैझंझोटीतिगायकः । व्यासप्रोक्तानां पुराणानामद्वैतब्रह्मरसप्रतिपादकत्वात्

८ कर्म—सखे! सत्यनिष्ठ! समासप्रोक्तानि दशापानषद्भगवद्गीताब्रह्मसूत्राण्यपि व्यासप्रोक्तान्येवेत्यस्माकं निश्चयः

सत्य—समीचीन एवायं युष्मन्निश्चयः । यतो निर्गुणन्निरवयवं शान्तं शिवमद्वैतं ब्रह्म तत्वमस्यादिमहावाक्येषु भागलक्षणया समासेन प्रतिपाद्यते । तत्समासापेक्षया ब्रह्मसूत्रादिषु व्यासेन विस्तरेण प्रोच्यते । अतो ब्रह्मसूत्रादीन्यपि व्यासप्रोक्तान्येव ॥

९ कर्म—तर्हि ब्रह्मसूत्रादीनि भागवतभारतादीनि पुराणानि च केन प्रोक्तानि? । वद सखे! ॥

सत्य—इदं चोद्यं सर्वकर्तुस्सर्वशक्तस्य स्वतन्त्रस्येश्वरस्याभाववादिनामेव युज्यते । न तु कर्मतत्फलेष्वासक्तस्य तव । अयि सखे! त्वाञ्च माञ्च त्वदभिमते धर्मपत्नीत्वेन स्वीकृतां कुचकंचुकनासामौक्तिकालंकृतां स्त्रियञ्च त्वत्पितृपितामहप्रपितामहादींश्चराचरात्मकमिदञ्जगच्च यः कृतवान् स एवाकरोन्महावाक्यानि ब्रह्मसूत्रादीनि पुराणानि चेत्यस्माकन्निश्चयः । हा हा इदमनेन कृतमिदमनेनकृतमिति प्रपञ्चान्तर्गतस्य सर्वस्य वस्तुजातस्य पृथक् पृथक् कर्तारमु-

त्वा त्वत्तोषापादने वयमशक्ताः । अलमप्रस्तुतप्रश्नोत्तराभ्याम् । प्रकृतमेवानुसरावः ॥

१० कर्म—रामायणं वाल्मीकिना कृतमिति तच्चाश्वमेधमहामण्डपे कुशलवाभ्यां गीतमिति च केनाभिप्रायेण वर्ण्यते ॥

सत्य—इदं रामायणं भागवतभारतादिभ्योऽत्यन्तं महदेव । वाल्मीकिरेवैतत्कर्ता । एतच्चाश्वमेधमहामण्डपे एव गेयम् । गायकौ तु कुशलवावेवेति श्रुतेर्निश्चयः ॥

११ कर्म—महाभारतादपि वाल्मीकिरामायणं महदेवेति यत् तन्न युज्यते । सपादलक्षग्रन्थात्मकं भारतम् । रामायणन्तु तत्तुरीयांशेऽपि किञ्चिन्न्यूनम् । भारते उपाख्यानानि बहूनि विद्यन्ते । रामायणे तूपाख्यानानि तन्न्यूनान्येव । अतो भारत एव महान् ॥

सत्य—सदा कर्मनिपुणत्वेन होमधूमावृतदृष्टस्तवायमाक्षेपो युज्यत एव । सखे भारते मुख्यो बलवान् योद्धा वायुपुत्रो भीमः । रामायणे तादृशस्तु हनूमानेव । द्वयोः को वा बलवत्तरः? । भारते सोमवंशजानां राज्ञां कथा वर्ण्यते । रामायणे तु सूर्यवंशजानां राज्ञां कथा । सोमसूर्ययोः कोऽवातितेजस्वी । सम्यग्विचार्य वद ॥

१२ कर्म—"कालस्सूक्ष्मतरो लोके स्थूलं गृह्णाति मानुषम् । शैलं स्थूलतरो राजन् कं गृह्णाति भयान्वितः

म्" । इत्यभियुक्तवचनात् सूक्ष्मविचारे रामायणमेव भारता-न्महत् । भीमादपि हनूमतो बलाधिक्यात् । सोमादपि सूर्यस्यातितेजस्वित्वाच्च । एवंविधस्य रामायणस्य कर्त्ता वाल्मीकिरेवेति श्रुतिनिश्चयोस्ति वा । वाल्मीकिरयमादिकविः परमगुरुः को वेति न ज्ञायते ॥

सत्य—श्रुतिसिद्धस्य भगवतो वाल्मीकेस्तत्वतस्स्वरूपज्ञानाय स्कान्दे वैशाखमाहात्म्ये शंखव्याधकथैवात्र विचार्या । तथा हि शंखनामानं कञ्चन महर्षिं वैशाखस्नानाय गोदावरीं प्रति गच्छन्तं कश्चिद्व्याधोतिक्रूरो मध्येमार्गं वटे बध्वा तदीयं कुण्डलादिकं धनं बलादहार्षीत् । तथाप्यकुध्यता शान्तेन पादुकाप्रतिप्रदानतुष्टेन तेन शंखेनोपदिश्यमाने वैशाखधर्मे व्याधमारकत्वेनागतयोर्गजसिंहयोरन्योन्ययुद्धेन नाशादुत्सृष्टचापाद्यायुधाय शुद्धचित्ताय व्याधाय दयालुरयं शंखस्तत्र तटाकतीरस्थवटवृक्षच्छायायामुपविश्य भगवतो वासुदेवस्य वैशाखधर्मस्य च महिमानं सम्यगुपादिशत् । तदानीन्तयोराश्रयो वटरसद्यः पपात पञ्चशाखी । घटनिलयः कश्चिद्व्याळोपि दीर्घदेहः कराळो नष्टः । तदा शिष्यत्वेन स्वीकृताय व्याधाय राम रामेतिकूजस्वेत्युपादिशत्तारकब्रह्माख्यं राममन्त्रं परमगुरुश्शंखः । व्याधोपि तन्मन्त्रानवरतजपध्वस्तपापपञ्जरः कळंकरहितो वल्मीकादवतीर्य वाल्मीकिरिति प्रसिद्धः कर्मबन्धनिकन्तनीं रामकथां लोके प्र-

ख्यापयामासेति सुस्पष्टमीर्यते वैशाखमाहात्म्ये । सखे! कर्मनिष्ठ! शृण्वस्य शंखोपाख्यानस्यान्तरार्थम् । "अस्ति सर्वान्तरस्साक्षी शंकरः परमेश्वरः । साक्ष्यमात्रे जगत्साक्ष्यं कथं भाति सुरोत्तमाः" । इति ब्रह्मगीतासूपनिषत्सु प्रतिपादितस्सर्वसाक्षी देहेन्द्रियादिकल्पनाधिष्ठानरूपः कूटस्थ एवात्र शंखनामा मुनिरिति वर्णितः । शंखवत् कळंकरहितत्वात् । "कूटस्थे कल्पिता बुद्धिस्तत्र चित्प्रतिबिंबकः । प्राणानान्धारणाज्जीवस्संसारेण स युज्यते" । इति प्रतिपादितो जीव एव व्याधः । "जलव्योम्ना घटाकाशो यथा सर्वस्तिरोहितः । तथा जीवेन कूटस्थस्सोन्योन्याध्यास इष्यते" । इत्युक्तकूटस्थतिरोधानमेव शंखस्य सर्वस्वमपहृतं व्याधेनेत्यवर्णयत् । "पुत्रकामो यजेत धनकामो भोगकामो यजेते"त्याद्युक्तसकामधर्मास्सर्वे ऋग्यजुस्सामशाखासूक्तत्वात् शाखाधर्मा एव । "करोति यद्यत्सफलं परस्मै नारायणायेति समर्पयेत्तत" । इत्युक्तधर्मास्तु वैशाखधर्मा मोक्षधर्मा एवेत्यवगन्तव्यम् । एवञ्च मोक्षधर्मोपदेशेन जीवदुःखप्रदत्वेन प्रसिद्धयोर्मदक्रोधयोर्नाशमेव गजसिंहमरणत्वेनाकथयत् । तदा त्यक्तसकामधर्माय शुद्धाय जीवाय सर्वकल्पनाधिष्ठानत्वेन सर्वव्यापके विष्णुतत्वे सम्यगुपादिष्टे पाञ्चभौतिकदेहमिथ्यात्वं पञ्चशाखायुक्तवटवृक्षपतनत्वेनाकथयत् । तदा चाहं ब्राह्मणः क्षत्रियो वैश्यश्शैवो वैष्णवः कुलीनो विद्वानित्याद्यभिमाननाशमेव कराळदीर्घ-

देहव्याळनाशत्वेनाब्रवीत् । एवं ।नरामममानाय शुद्धाय जीवाय रामरामेतिजपात्मकं रामतापनीयोक्तं निर्गुणब्रह्मोपासनमुपादिदेश प्रत्यग्रूपो गुरुश्शंखः । तदुपासनेन जीवभावजगद्भावबाधे स्वात्मैव शिष्यत इत्युक्तप्रकारेण कूटस्थमात्रावशेषतया मुक्तोभवदिति वक्तव्यमर्थं वल्मीकादवतीर्य वाल्मीकिरिति प्रसिद्धोभवदिति वर्णयामास स्कान्दे वैशाखमाहात्म्ये । अयि कर्मनिष्ठ! "देहादभ्यन्तरः प्राणः प्राणादभ्यन्तरं मनः । ततः कर्ता ततो भोक्ता गुहा सेयं परम्परा" । इतिगुरुपादैरुक्तां "परेण नाकं निहितं गुहाया"मिति श्रुत्या चोक्तां पञ्चकोशगुहामेवात्र वल्मीकत्वेनाब्रवीत् । (अन्यथा मृद्रूपाद्वल्मीकात् कश्चिदृषिर्जायेत किम्? । शंखव्याधकथायाः एवंविधान्तरार्थाभावे भावितां मुनिभिर्मुहुरिति तत्रैव वैशाखमाहात्म्ये कथाविशेषणमुक्तं कथं घटेत? । वदन्त्वार्याः) एवंविधेत वाल्मीकिना प्रत्यगभिन्नब्रह्मसाक्षात्कारवता जीवन्मुक्तेन परमगुरुणा संसारतापतप्तजीवोपकाराय कृतमद्वैतब्रह्मप्रतिपादकमिदं रामायणं कर्मबन्धनिकृन्तनमेवेति श्रुत्यभिप्रायः ॥

१३ कर्म—कथमस्य रामायणस्यादिकाव्यत्वम् । अश्वमेधमहामण्डपे कुशलवाभ्यामेव गेयत्वञ्चागतम् । वद सखे? ॥

सत्य—जगदादेः प्रत्यगभिन्नस्य ब्रह्मणः प्रतिपाद-

कत्वादादिकाव्यत्वम् । अथवा "जगृहे पौरुषं रूपं भगवान्महदादिभिः । संभू तं षोडशकलमादौ लोकसिसृक्षये"ति आदावेव सृष्टस्य समष्टिशरीरात्मकस्य ब्रह्माण्डस्यायोध्यापुरत्वेन वर्णनादादिकाव्यत्वम् । (अन्यथा भवन्मते दिव्यवर्षाणां द्वादशसहस्रात्मकचतुर्युगादित्वं उतैकसप्ततिचतुर्युगात्मकमन्वन्तरादित्वं किं वा चतुर्युगसहस्रात्मकदैनन्दिनकल्पादित्वं आहोस्वित् द्विपरार्द्धात्मकब्रह्मकल्पादित्वमुच्यते । अथवा छन्दोमयपादबद्धपद्यरूपपुराणेतिहासकाव्यानामादित्वम । तथैवेति चेत् शंखव्याधजननात् पूर्वं छन्दोमयपादबद्धश्लोकात्मकः कश्चिदपि ग्रन्थो नास्तीति प्रसज्यते । अपि च व्याधस्य रामनामजपात्मकभजनकालो रामावताराद्र्वागेवेति सिद्धे वाल्मीकेर्जन्मापि रामावतारादनन्तरमेवेति वक्तव्यम् । तथैवेति चेत् "चर्षणी वरुणस्यासीद्यस्याञ्जातो भृगुः पुनः । वाल्मीकिश्च महायोगी वल्मीकादभवत् किले" ति श्रीभागवतवचनं कथं घटेत? । किमनेन प्रलपनेन "संभवामि युगे युगे" इतिवचनेन रामावतारा बहवस्सन्त्येव । तस्मान्न कोपि विरोध इति चेत् आर्याणामेवंविधं समाधानमेवान्ते शरणम् ।) सखे! अस्मदुक्तमादिकाव्यत्वमेव समीचीनम् । एवंविधमादिकाव्यं रामायणं अश्वमेधमण्डपे एव गेयम् । तथा हि । अश्धातोर्गत्यर्थत्वादश्वा गतयः । गतयस्तु भूरादिसत्यपर्यन्ताः पुण्यलोका एव । मेधशब्देन हिं-

सोच्यते। यज्ञशब्दस्य ब्रह्मविचारत्वं बहुधा प्रतिपादितं सूतसंहितायां यज्ञवैभवखण्डे। "सर्वं कर्माखिलं पार्थ! ज्ञाने परिसमाप्यत" इति गीतायामपि ज्ञानयज्ञ एव मुख्यो यज्ञ इति परमगुरुणा वासुदेवेनाप्युक्तमर्जुनाय। अतो ब्रह्मलोकपर्यन्ताः पुण्यगतयो मिथ्याभूता एव ब्रह्मणि कल्पितत्वादिति निश्चित्याद्वैतब्रह्मचिन्तनमेवाश्वमेधयज्ञः। (अन्यथा "तरति तरति ब्रह्महत्याम्। योऽश्वमेधेन यजते"। इति श्रुतिः कथं समीचीना भवेत्?। सयुक्तिकं सानुभवं वदन्त्वार्याः।) "परोक्षं ब्रह्मविज्ञानं शाब्दं देशिकपूर्वकम्। बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वह्निवत्"। इति गुरुवचनेन "ज्ञानाग्निस्सर्वकर्माणि भस्मसात् कुरुते तथे"ति भगवद्वचनेन चाद्वैतब्रह्मविचार एव ब्रह्महत्यादिपापनिवर्तकोऽश्वमेधयज्ञः। तन्मण्डपे एवेदं गेयं रामायणम्। न तु सकामानां कर्मपराणां मण्डपे। तस्य कृमिकुण्डत्वात्। "तद्वायसं तीर्थमुशन्ति मानसा न यत्र हंसा निरमन्त्युशिक्क्षयाः" इति भागवतवचनाच्च। सखे रामायणमिदमादिकाव्यं गेयमेव। न तु पाठ्यम्। "एतमानन्दमयमात्मानमुपसंक्रम्य। इमाँल्लोकान् कामान्नीकामरूप्यनुसञ्चरन्। एतत्साम गायन्नास्ते"। इति श्रुत्यैव गेयत्वमुक्तम्। रामायणपठनमित्युक्तौ श्रुतिकोपो भवेत्। तस्माद्गेयमेव रामायणम्। गायकौ तु कुशलवावेव। तथा हि। "कुशपाणिर्विनीतव"दिति "तद्विज्ञानार्थं सद्गु

रुमेवाभिगच्छेत् । समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् । आचार्यबान् पुरुषो वेदेति । शान्तो दान्तो विरक्त" इति च प्रमाणैस्सर्वं गृहादिकमुत्सृज्य ब्रह्मविचाराय गुरुमाभिगच्छति यस्संमित्कुशपाणिः । यश्च ब्रह्मलोकपर्यन्तभोगो लवप्राय एवेति निश्चित्य ब्रह्मानन्दभोगानुभवाय गुरुमभिगच्छति तावेव कुशलवौ विदेहकैवल्यलक्ष्म्यास्सीतायास्सुतौ साक्षादश्वमेधमहामण्डपालंकारस्याद्वैतपरब्रह्मणश्श्रीरामचन्द्रस्य वैदेहीप्राणवल्लभस्य बिंबादिवोद्गतौ बिंबौ रामायणगायकौ । (अन्यथा वीणावादनकुशलौ कल्याणीबिहाक्शहनाकापितोडिरागालापपटुमृदुकण्ठस्वरौ द्वौ गायकावेवेति चेत् सर्वसंगत्यागिनां सन्यस्तानां वनस्थानां नैष्ठिकानां मुनीनामेतयोर्गानेन परितोषः कथं भवेत्? । कश्चिद्ब्रसीमन्यः काषायवस्त्रं अपरो यज्ञोपवीतञ्जटाबन्धनमेकोपरस्साधुवादं पारितोषिकं ददुरिति वर्ण्यमानं कथं घटेत? ।) रामायणमिदं वाल्मीकिविरचितमादिकाव्यं अद्वैतब्रह्मप्रतिपादकमेवेत्यत्र न कोपि संशयः ॥

१४ कर्म—भवदुच्यमानमिदं सर्वमसंगतमेव । भवदभिमतमद्वैतं केन प्रमाणेन सिद्ध्यति । प्रत्यक्षादिप्रमाणाभावान्नास्त्येवाद्वैतम् । अपि च विदेहकैवल्यमिति कथं घटेत? । चराचरात्मकजगद्देहविशिष्टस्य भगवतो नारायणस्य दिव्यमूर्तेस्सत्वात् । अद्वैतमिति भवदुक्तिः कर्णकठोरैव । अ-

द्वैतमेव सत्यमन्यत्सर्वं मिथ्यैव चेत् क्षीराब्धिर्मेरुरुर्वीति भगवदवतारा इति वाल्मीकिरिति रामायणमिति दशरथोयोध्या तद्वासिन इति कर्मनिष्ठस्तपोनिष्ठ इति च किमपि मा वद। यत्रकुत्रचित कोणे तूष्णीन्तिष्ठ। असंबद्धप्रलापिना त्वया सह सल्लाप एवानुचित इति भाति॥

सत्य—सहर्षम्। अस्मिन् वाल्मीकिरामायणान्तरार्थविचारे पौलस्त्यो विश्रवसः पुत्रो दशाननो रावणो नाम निशाचरः क इति मम विचारोयमद्य सफलो जातस्त्वत्प्रसादात्। सखे विदेहकैवल्यलक्ष्मीमधिक्षिपतस्तव वैदेहीप्राणवल्लभे श्रीरामे कथं भक्तिस्स्यादिति विषीदामितमाम्। तवाक्षेपरूपचतुर्दशप्रश्नस्यास्य निरूपणमुपरि मूलबलयुद्धनिरूपणे भवत्। यथाक्रमं रामायणान्तरार्थमेव पृच्छतु भवान्। सदा कर्मनिष्ठत्वेन होमधूमदूषितयोस्सूक्ष्मार्थग्रहणासमर्थयोस्त्वन्नेत्रयोर्दर्शनपाटवाय रामायणान्तरार्थस्यैव सिद्धाञ्जनत्वात्॥

१५ कर्म—अयोध्येति दशरथ इति तत्पत्न्यः कौसल्यादयस्तत्पुत्राश्चत्वारो रामादय इति पुरोहितो वसिष्ठ इति च वर्णमानानामान्तरार्थः कः॥

सत्य—("देवानां पूरयोध्या। तस्यां हिरण्मयः कोशः" इति। "यो वै तां ब्रह्मणो वेद। अमृतेनावृतां पुरीम्।" इति च श्रुतिप्रतिपादिता पुर्ययोध्या का?। गंगास्नानाय

काशीं गताः पुनस्स्वदेशमागताः केचिदार्या वयमयोध्यामपि गत्वा दृष्टवन्तो रामराजधानीमिति वदन्ति सा चायोध्यापुरी का? । द्वे अप्येकैव पुरी उत परस्परभिन्ने । अत्रार्याणामभिप्रायः कः? । आर्यैरुच्यमाना काश्युत्तरदिशि स्थिता पुर्येवायोध्येति चेत्तु तस्या अयोध्येति नाम कथं घटेत? । अस्माकं चक्रवर्तिना आंग्लेयेन युद्धे जितत्वादयोध्येति न मन घटेतैव ।) हा हा "त्रयोदशाब्दसाहस्रं ब्रह्मचर्यमखण्डितम् । यत्र स्थितश्चकारासौ रामस्तस्य पुरीं शुभाम् । वक्तं कश्शक्नुयाद्भूमौ प्राचेतसमृषिं विना ।" सर्वे कर्मनिष्ठा मामुन्मादिनं ब्रूयुरेवान्तर्वाणयो भवादृशाः । मदीयोन्माददशायां स्फुरितामयोध्यां वच्मि । "प्रकृतिमहदहंकाराश्च मात्राश्च भूतान्यपि हृदपि दशाक्षी"त्युक्तचतुर्विंशतितत्वैर्विरचितं ब्रह्माण्डात्मकं शुद्धसात्विकं समष्टिदेहमयोध्या । मनवंशजानां मानवानां राज्ञां पुरी अयोध्येति प्रसिद्धैयमेव । अद्वैतब्रह्ममननमेव मनुः । मननं कुर्वाणा एव मानवाः । अद्वैतब्रह्ममननविकलानां मानवत्वन्न घटेतैव । "तरवः किन्न जीवन्ति भस्त्राः किन्न श्वसन्ति च । न खादन्ति न मेहन्ति किं ग्रामपशवोपरे ।" इति श्रीशुकेन निषिद्धत्वात् । मानवानामेवेयं पुर्ययोध्या । पुरुषसूक्तप्रतिपादितेयं पुरी ब्रह्ममननाय नैव सृष्टेति न केनाप्यार्येण युद्धे वादेन जेया अतोऽयोध्येति नाम साद्भूतेव । ब्रह्ममननजन्यब्रह्मानन्दानुभ-

वार्यैव ब्रह्माण्डस्य सृष्टत्वात्। "कष्टा ते सृष्टिचेष्टा बहुतर-भवखेदावहा देहभाजामित्यवं पूर्वमालोचितमजित! मया नै-वमद्याभिजाने। नो चेज्जीवाः कथं वा मधुरतरमिदं त्वद्व-पुश्चिद्रसार्द्रं नेत्रैश्श्रोत्रैश्च पीत्वा परमरससुधांभोधिपूरे रमे-रन्।" इत्यनेन श्रीनारायणभट्टाख्यपरमभक्तवचनेनापि ब्र-ह्माण्डसृष्टेर्ब्रह्मानन्दानुभवसाधनत्वं स्पष्टमवगम्यते। तस्मा-दिदं समष्टिशरीरं ब्रह्माण्डमेवायोध्या पुरीति रामायणे वर्ण्य-तें। ब्रह्माण्डे सर्वेषां देवानामीश्वरावयवत्वेन स्थितत्वाद्देवा-नां पूरयोध्येति श्रुत्युक्तमपि साङ्गच्छेत्। एवंविधायोध्यापुरे सर्गविसर्गस्थानपोषणोतिमन्वन्तरेशानुकथानिरोधमुक्त्याश्रया णां अर्थचिन्तनात्मको दशविधो यो विचारः तादृशब्रह्म-विचारवानेव दशरथः। अभीष्टदेशप्रापको हि रथः प्रसिद्धः। दशविधास्सर्गविसर्गादय एवाभीष्टाद्वैतब्रह्मप्रापकाः रथाः य-स्य स दशरथः। ब्रह्मविचारवानेव दशरथ इति गर्भीकृता-र्थः। अत्र सर्गविसर्गादयो दशविधविचाराः श्रीभागवते द्वितीयद्वादशस्कन्धयोः प्रतिपादिता एव। एवंविधार्थज्ञा-नगन्धेनापि विकलानां पौराणिकानां दशदिक्षु यस्य रथो गच्छेत् स दशरथ इत्येव गतिः। अत्र ब्रह्माण्डे सत्त्वगुण-शक्तिरीश्वरोपाधिर्विद्यैव कौसल्येत्युच्यते। (अन्यथा कोसल-पतेर्दशरथस्य कोसलपतेः पुत्री कौसल्या भार्येति कथं घ-टेत? । उत्तरकोसलपतिर्दशरथः दक्षिणकोसलराजपुत्री कौ-

सल्या तयोर्विवाहसम्बन्धो घटेतैवेति चेत् वेदान्तशास्त्रे दक्षिणोत्तरशब्दयोः प्रवृत्तिनिवृत्तिपरमर्थमजानतामेवैतत्समाधानं रमणीयम् । ननु परञ्जनपत्नी पुरञ्जनीतिवत् कोसलपतेः पत्नी कौसल्येति घटत एवेति चेत् कैकेयीसुमित्रयोरतिव्याप्तिर्दुर्वारा ।) विद्याशक्तेः कुशलात्मकत्वाद्द्वैव कौसल्येत्यान्तरार्थस्सुगमः । "विक्षेपावृतिरूपाभ्यां द्विधाविद्या प्रकीर्तिता ।" इत्युक्ताविद्याद्वैविध्ये विक्षेपशक्तिरेव सुमित्रेत्युच्यते । विक्षेपात्मकस्य वियदादिजगतः ब्रह्मविचारस्य मित्रवदुपकारकत्वात् सुमित्रेति नामास्यास्साध्वेव । आवरणशक्तिर्मायैव कैकेयीत्युच्यते । कैकेयीरूपेण मायैवावतीर्णेति विदितमेव विश्वेषाम् । के जनाः कया मायया न मुह्येरन् इति वाक्ये केकयेति पदद्वयाभिमान एव केकयः। स एवाश्वानां ब्रह्मलोकपर्यन्तगतीनां भोक्तृत्वेन पालकत्वादश्वपतिः । तस्मान्मायैवाश्वपतेः पुत्री कैकेयीत्युच्यते । किञ्च तमोगुणोत्पन्नचराचरजगद्भ्रामकसंवत्सररूपकाल - चक्रान्तर्गतदिनरात्रय एव दशरथस्य शतत्रयशतार्द्धा भार्याः। अयि कर्मनिष्ठ? संवत्सरान्तर्गतदिनरात्रयस्सर्वा अप्यद्वैतब्रह्मविचारायैवोपयोक्तव्याः। नत्वेव प्रपञ्चभोगाय । अतो दशरथस्य भार्याश्शतत्रयशतार्द्धा इत्यस्मिन्नादिकाव्ये वर्णनं युक्तमेवं । (अन्यथा दशरथस्य भार्याणां शतत्रयशतार्द्धसंख्योपादाने प्रयोजनं वीणामंके निधाय गायद्भिः

पौराणिकैर्वक्तव्यमेव । दिनरात्रीणां पार्थक्याभिप्रायेण "मातृस्सप्तशतास्तारतु"इति क्वचिद्रामायणे दृश्यते । तदपि साध्वेव । ननु सौरचान्द्रादिभेदेन संवत्सरपञ्चकस्य "मातल,पाताल,वरांगि,विमला,तुलाः"इत्युक्तसंख्यामनुपादाय शतत्रयशतार्द्धसंख्याग्रहणादनुचित एवायमान्तरार्थ इति चेत् आदिकवेर्वाल्मीकेर्ज्ञादिन्मुक्तम्यामानुषत्वात्तद्धृदयं को वा वेद? । "न ते वागनृता काव्ये काचिदत्र भविष्यती"ति पितामहानुग्रहात् सर्वमपि साध्वेव । अपि च ब्रह्मविचारात्मके अश्वमेधयज्ञे अद्वैतस्य ब्रह्मणस्समष्टिदेहरूपायोध्यायां प्रतिबिम्बदर्शनकामनैव पुत्रकामेष्टिः । तस्यामिष्ट्यां परमार्थतत्वमार्गणपरेषु शृंगवत्प्रसिद्धेन ऋश्यशृंगाख्येन शान्तानुगतेन गुरुणा क्रियमाणायां "अहमन्नमहमन्न"मितिश्रुत्युक्तं यत् परमान्नं लब्धं तत्प्राशनेन सदद्वैतं यद्ब्रह्म तदेव समष्टिविग्रहायोध्यायां विद्योपाधिकं सत् स्पष्टमेव प्रतिबिम्बितम् । इममेव वक्तव्यमुपानिषदर्थं भगवानयोध्यायां दशरथपुत्रश्श्रीरामः कौसल्यायामवतीर्ण इति सुमंगळत्वेनावर्णयत् परमगुरुरादिकविः । तदा च "आनन्दो ब्रह्मेति व्यजाना"दितिश्रुत्युक्तब्रह्मानन्दोपि कैकेय्यामावरणशक्तिरूपायां मायायां परमभक्तो भरत इत्यवतीर्णः । अयि सखे शंखावतारो भरत इति भवादृशैरुच्यते खलु । "अपान्तत्वन्दरवर"मितिश्रीभागवतवचनादसत्वमेव शंखः । असत्वन्तु ...

सः। रसस्तु ब्रह्मानन्द एव। "रसो वै सः। रसं ह्येवायं लब्ध्वानन्दीभवती"तिश्रुतेः। अत आनन्द एव भरतः मायायामावरणशक्त्यामवतीर्णः। आवरणपूर्वकमेवानन्दप्राप्तिर्वक्तव्या। तुञ्चनाम्ना केरळीयेन केनचिदक्षराभ्यासगुरुणा परमार्थतत्वज्ञानवताप्युक्तं मायैवानन्दप्राप्तिहेतुभूतेति। किं बहुना श्रीरामे दण्डकान् प्रविष्टे अयं कैकयीतनयः नन्दिग्रामे स्थितस्सर्वानानन्दयन् समष्टिदेहायोध्यां बिभर्त्तीति भरतनामा जातः। तथैव वालिनं प्रतिश्रीरामेण वक्ष्यते च। सर्वानानन्दयता भरतेनाज्ञया वयम्। त्वन्तु ब्रह्मानन्दं भरतमनादृत्य केवलमैहिकामुष्मिककामपरतन्त्रो वर्तसे। अतो मया वध्योसीति। सर्वथा आनन्द एव भरत इति गर्भीकृतोर्थः। अपि चाद्वैतब्रह्मतत्त्वं विचारयतः अहं ब्रह्मास्मीत्यपरोक्षानुभवेन भाव्यमेव। सोनुभव एव विक्षेपशक्त्यां सुमित्रायां जातो लक्ष्मणः। किञ्च चिद्रूपस्याद्वैतब्रह्मणश्चित्प्रकाशोपि समष्टिविग्रहे जायेत। स चित्प्रकाश एव सुमित्रायां शत्रुघ्नः पुत्रः। सखे कर्मनिष्ठ! संकर्षणावतारो लक्ष्मणस्सुदर्शनावतारश्शत्रुघ्न इति भवादृशैरुच्यते खलु। संकर्षणस्याहन्तत्वोपाधिकत्वात् अहं ब्रह्मास्मीत्यनुभव एव लक्ष्मणः। ब्रह्मलक्षणस्य प्रतीच्यपि लक्ष्यमाणत्वात् लक्ष्मण इति नामास्य सार्थकमेव। तेजस्तत्वं सुदर्शनमिति भागवतवचनेन चित्प्रकाश एव शत्रुघ्नइत्यान्तरार्थः विशदायते।

चित्प्रकाशसुदर्शनस्य तमोरूपशत्रुहननसामर्थ्यात् शत्रुघ्न इति नामास्य युक्तमेव। (अन्यथा लक्ष्मणशत्रुघ्नयोर्नामाभिप्रायो वक्तव्य एवार्यैः।) किञ्चाद्वैतब्रह्मज्ञानस्याहं ब्रह्मास्मीत्यनुभवज्ञानसाहचर्याद्रामलक्ष्मणयोस्साहचर्यं ब्रह्मानन्दस्य चित्प्रकाशसाहचर्यात् भरतशत्रुघ्नयोस्साहचर्यञ्चास्मिन्नादिकाव्ये वर्ण्यमानं साध्वेव। अन्यथा वीणावादनकुशलैः पौराणिकैः रामलक्ष्मणयोर्भरतशत्रुघ्नयोश्च साहचर्यकारणं वक्तव्यमेव बालभावेऽप्यभ्यस्तत्वकारणव्यतिरेकेण।) भागलक्षणया महावाक्यार्थे विचार्यमाणे अखण्डाकारान्तःकरणवृत्तावुत्पन्नं ज्ञानमेव वसिष्ठो गुरुस्सूत्रात्मकप्राणादुत्पन्नः। विचारसहकारिण एव सुमन्त्रादयो मन्त्रिण इत्यत्रावगन्तव्यम् ॥

१६ कर्म—विश्वामित्रवचनात्ताटकां पुनस्सिद्धाश्रमे सुबाह्वादींश्च हत्वा मारीचं विद्राव्य यज्ञमरक्षदिति वर्णने कोऽभिप्रायः ॥

सत्य—अद्वैतब्रह्मज्ञानमेव मुख्यो यज्ञ इति बहुभिः प्रमाणैरुक्तं खलु। तादृशयज्ञस्य वैराग्यवानेव कर्ता। तस्मात्सत्यलोकपर्यन्तेषु विषयेषु वैराग्यमेवात्र रामायणे तपस्वी क्रोधनो विश्वामित्र इत्युच्यते। वैराग्यस्य शत्रुः प्रपञ्चविषयभोगाशैव। सैवात्र ताटकेत्युच्यते। प्रपञ्चविषयस्फुरणमेव मारीचः। मरिचवत्तापकत्वात्। प्रपञ्चविषयभोगाव

कर्म कुर्वाणो बाहरेव सद्बाहुश्शोभनो बाहुरित्याद्यभिमाना एव सुबाहूवादिनिशाचराः। अयि सखे! समष्टिविग्रहायोध्यायामवतीर्णमद्वयं ब्रह्मैव श्रीरामः प्रपञ्चविषयभोगाशां विनाश्य तद्विषयस्फुरणं विद्राव्य सुबाहूवाद्यभिमानान् हत्वा ब्रह्मज्ञानयज्ञमरक्षदिति गर्भीकृतोऽर्थः। सिद्धाश्रममपि किञ्चिद्विवृणोमि। प्रत्यगभिन्नब्रह्मविचारायैव ब्रह्माण्डसृष्टिरिति प्रमाणैः प्रतिपादितं खलु पूर्वम्। एतदीषदप्यज्ञात्वा ब्रह्माण्डान्तर्गतजगद्भोगायैव यज्ञादिना भगवानाराध्य इति केषाञ्चिदभिमानो बलवानेव वर्तते। स एव महाबलिरित्युच्यते पुराणेषु। तन्निग्रहाय प्रथममाराधनीयप्रतिमारूपेण वामनो भूत्वा पुनर्ब्रह्माण्डन्तदन्तर्गतं सर्वमपि जगत्स्वशरीरे प्रदर्श्याभिमानमुपशाम्य भगवता त्रिविक्रमेण सर्वं खल्विदं ब्रह्मेति ज्ञानयज्ञानुष्ठानाय योग्यतामापादितमिदं जगदेव सिद्धाश्रममित्युच्यते। एतच्च भागवतान्तरार्थविचारे स्पष्टमेवोक्तमस्माभिः॥

१७ कर्म—मिथिलोपवने विश्वामित्रेण सह गच्छन्दाशरथिरिन्द्रसंगमापराधेन गौतमशप्तां शिलारूपामहल्यां पादरजसोद्दधार शापादिति वर्ण्यमानस्यान्तरार्थः कः॥

सत्य—गोशब्दः पशुवाचकः। पशुस्तु जीव एवेति प्रमाणसद्भावाद्ब्रह्मविचारार्हमानुषदेहमापन्नः उत्तमोजीव एवात्र गौतमशब्देनोच्यते। तेन क्रियमाणाद्वैतब्रह्मवि-

चारादेः प्रोक्तत्वात् ब्रह्मविद्वल्ली भृगुवल्लीत्याद्युपनिषद्देवाह-ल्येत्युच्यते। अपि सर्व कर्मनिष्ठा। एकबीजावापेन शतगु-णफलप्राप्तये हलेन कर्षणयोग्या कृषिभूमिर्हि हल्या। सा कर्मकाण्डश्रुतिरेव। इयं तु निषदैहिक मामुष्मिकफलं प्राप्तये ह-ल्या न भवति। अतो भगवल्ल्याद्युपनिषदेवाहल्या। इय-महल्या भवादृशैः कैश्चिदार्यैस्त्रैलोक्यभोगायोपयुज्यते। स उपयोग एव त्रिलोकाधिपेन्द्रसंगमापराधः। अनेनापराधेन शिलारूपा कार्यकरणाशक्ता भवेत्यहल्यां त्वमफलो भवेति त्रिलोकाधिपतिमिन्द्रञ्चाशपदुत्तमर्जो गोतमः। एवंविधा-हल्याशापनिवर्तकं अद्वैतस्य परब्रह्मणश्श्रीरामस्य पादरज एव। नान्यज्ज्योतिष्टोमादिकं कर्म भवादृशैः क्रियमाणम्। कर्मणोपीन्द्रसंगमापराधित्वात्। अतः क्षाळयामि तव पाद-पङ्कजेनाथ दारुदृषदोः किमन्तरम्। मानुषीकरणचूर्णमस्ति ते न पादयोरिति कथा प्रतीयते। इति कविभिर्वर्ण्यमानं सा-ह्यमेव। (अहल्याशापविमोचनस्य एवंविधार्थकल्पनमयुक्त-मिति चेत् तर्हि वनाद्दैर्यं संभियुक्तो रहल्यागौतमयोर्मिथिलो-पवने वासः केनाभिप्रायेण वर्ण्यते। शापाद्राक्षसतामापन्न-स्सौदासो राजा मिथिलोपवने गच्छन् गोतमं ददर्शेति पु-राणान्तरेष्वप्युक्तत्वेन गोतमस्य मिथिलोपवने वासो दृढी-कृतः। अपि च हल्यापुत्रस्य शतानन्द इति नाम कथमा-सीत्। किं पितामहनाम्ना उत मातामहनाम्ना। शतानन्द

स्य विदेहराजपौरोहित्ये कारणं किम् । पौराणिकैरार्थैर्वक्तव्यम् ।) अयि सखे शृणु । स एको मानुष आनन्दः । ते ये शतं मानुषा आनन्दाः । इत्यारभ्य स एको ब्रह्मण आनन्दः । इत्यन्तेन वाक्यकदम्बेन ब्रह्मविद्वत्त्वामुत्तरोत्तरशतगुणतया य आनन्दः प्रतिपाद्यते स एव हल्यागोतमयोः पुत्रश्शतानन्दः । देहभिन्नत्वात्मचिन्तनेनाद्वैतब्रह्मतत्वं विचारयतां विदेहानां शतानन्देनैव पौरोहित्यं कार्यम् । अद्वैतब्रह्मतत्वं विचारयता जीवोत्तमेन गोतमेन ब्रह्मविद्भृगवल्लीसहायेन विदेहोपवने एव वस्तव्यम । न तु सदेहोपवने । वाल्मीकिरामायणं गायतां पौराणिकानां एवंविधान्तरार्थविचारोऽस्ति वा । नास्त्येव । तेषां वीणातन्त्रीकृत्तकरणे स्वररामणीयकावादनाय तन्त्रीप्रोतकाचमणिचालने च सदा दत्तचित्तत्वात् ॥

१८ कर्न—मिथिलायां शिवचापखण्डनपूर्वकं सीताविवाहो वर्ण्यते । सखे सीताविवाहस्यान्तरार्थः कः ॥

सत्य—अयि सखे सीताविवाहं वक्तुमहं कियानन्तर्वाणिः किञ्चिज्ज्ञः । (मानववंश्यस्येक्ष्वाकोर्भूर्यतोविकुक्षिनिमिदण्डका इति त्रयः पुत्राः । तत्र विकुक्षेर्वंशे शताधिके पुरुषान्तरे अतीते अजस्य पुत्रो दशरथो जात इति स्पष्टमुक्तम् । तस्यैवेक्ष्वाकोः पुत्रस्य विकुक्षेरनुजस्य निमेर्वंशे विंशतिन्यूनपुरुषान्तरे अतीते सीरध्वजो नाम सीतापिता ज-

नकराजो जातः । एकवंशजयोर्दशरथजनकयोः कथं विवाहसम्बन्धो घटेत । किञ्च बहुकालव्यत्यासेन भिन्नभिन्नकालस्थयोस्तयोः कथं समकालस्थायित्वम् । तदुक्त्वार्याः ।)पुराणेषूच्यमानानान्देवर्षिब्रह्मर्षिराजर्षिप्रभृतीनाम्महतामस्मत्तुल्यत्वाभावाद्घटत एव विवाहसम्बन्धः । विदेहराजानां ब्रह्मनिष्ठत्वेन दीर्घायुष्यात् युक्तैव समकालस्थायित्वमिति महतामुत्तरं समीचीनमेव । रामायणस्याद्वैतप्रतिपादकवेदान्तानुरोधेनान्तरार्थं वदतामस्माकमनुकूलत्वात् । सखे प्रपञ्चोयं सत्य एवेति विश्वस्य तद्भोगाय कर्माणि कृत्वा होमधूमदूषितदृष्टेरुपर्यधो भ्रमतस्तव संसारचक्रभ्रमणोपशान्त्यै सीताविवाहश्श्रोतव्य एव । अतो मदीयकण्ठक्षोभं सुचिरमूर्ध्वं कल्पितमकर्णाणस्संमाहितमनाश्शृणु । देहादिप्रपञ्चोयं मिथ्येति सम्यग्विचारवानेव विदेहः । प्रपञ्चमिथ्यात्वे निश्चिते का वा सतेति विचारमेव वैदेहो मिथिलाधिपो यज्ञार्थं भूकर्षणमकरोदिति वाल्मीकिर्गुरुरादिकाव्ये वर्णयामास । सिद्धान्तकौमुद्यन्तराद्धे पठ्यमाने भूसत्तायामित्यादावेवोच्चरन्ति खलु विद्यार्थिनः । अतो भूकर्षणन्नाम सत्ताविचार एवेत्यत्र विद्यार्थिनां पाठ एवास्माकं प्रमाणमशीलितपाणिनीयशास्त्राणाम् । सत्ताशोधने क्रियमाणे विदेहकैवल्यलक्ष्मीस्मद्रूपिणी सर्वोत्तरसौन्दर्या सीतानाम्न्याविरभूत् । सैव वैदेहीत्युच्यते वेदवित्तैरिमन्नादिकाव्ये । एतामुद्वोढुं यश्शक्

चापखण्डनेन लब्धविजयस्स एव शक्तः नत्वन्यः। तथा हि। "शिवश्शक्तियुतश्शश्वत्त्रिलिंगो गुणसंवृतः। वैकारिकस्तैजसश्च तामसश्चेत्यहन्त्रिधा। ततो विकारास्सञ्जाताः षोडशामीषु कश्चन। उपधावन् हि भूतीनां सर्वासामश्नुते गतिम्।" इति श्रीभागवते दशमस्कन्धान्ते प्रतिपादितम्। अतस्त्रिगुणात्मकानां षोडशविकाराणां प्रपञ्चविषयाणां श्रीरुद्रानुग्रहरूपत्वात् त्रैगुण्यविषयं सर्वं शैवधनुरित्युच्यते। निस्त्रैगुण्येनैव विदेहकैवल्यलक्ष्मीस्सीता लभ्या। 'त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुने"ति जीवं प्रतीश्वरवचनं च। सखे कर्मनिष्ठेयं विदेहकैवल्यलक्ष्मीः प्रपञ्चान्तर्गतं त्रैगुण्यविषयं सर्वं वामहस्तकनिष्ठिकया प्रक्षिपेदेव। अतस्सर्वाभिरसहेयं सीता कुबेराक्षीक्रीडायां [കഴഞ്ചിക്കൊക്കളിക്കുന്നാൾ] शिवचापाधःप्रविष्टमेकमक्षमादातुं वामहस्तकनिष्ठिकया तद्धनुरचालयदिति तच्च जनको दृष्ट्वा शैवधनुष्यस्मिन् ज्यामारोपयति यस्तस्यैवेयं महिषीति निरचैषीदिति च पुराणान्तरेषु वर्णनेन त्रैगुण्यविषयभंगमेव धनुर्भंगमिषेणावर्णयद्भगवानादिकविः। हा हा समष्टिविग्रहायोध्यायां कृतावतारं अद्वैतब्रह्मात्मकं महानुभावन्दाशरथिं विना को वा शक्नुयाच्छैवकोदण्डखण्डनपूर्वकं वैदेहीमुद्वोढुम्। अतस्सीतारामयोः पाणिग्रहणमंगळं शोभनमेव विश्वेषाम्। सखे कर्मनिष्ठा त्रैगुण्यविषयस्य खण्डनं वैराग्यपूर्वकमेव कर्तव्यम्।

अतो विश्वामित्रसन्निधौ तदनमोदनेन धनुरखण्डयद्राम इत्यवर्णयद्भगवानादिकविः ॥

१९ कर्न—श्रीरामस्सीतालक्ष्मणाभ्याञ्चतुर्दश वर्षाणि दण्डकेष्ववसदिति तद्विरहतप्तो दशरथस्स्वर्गतोभूदिति भरतो नन्दिग्रामे वसन्नरक्षद्योध्यामिति च वर्णने कोवान्तरार्थः? ॥

सत्य—प्रकृतिर्महदहंकारादिचतुर्विंशतितत्त्वसमुदायात्मकं समष्टिशरीरं ब्रह्माण्डमेवायोध्येति तदन्तः प्रकाशमापन्नं सदद्वैतं ब्रह्मैव श्रीराम इति सर्गावसर्गाद्याश्रयान्तदशविधविचारेण ब्रह्ममननं कुर्वाण एव दशरथ इति च प्रतिपादितं खलु पूर्वम्। सर्वे षण्णवत्यंगुलायामं व्यष्टिशरीरमेव दण्डकमित्यत्रादिकाव्ये रामायणे वर्ण्यते। व्यष्टिशरीराणां बहुत्वात् क्वचिद्दण्डकान् दण्डकेष्विति बहुवचनं प्रयुक्तमस्मिन्नादिकाव्ये। (अन्यथा दण्डकं दण्डकान् दण्डके दण्डकेष्विति बहुवचनैकवचनप्रयोगाभिप्रायं वदन्त्वार्याः पौराणिका वीणावादनकुशलाः।) यदद्वैतं ब्रह्म समष्टिशरीरे श्रीराम इति प्रकाशमापन्नं तदेव व्यष्टिशरीरेष्वपि प्रविश्य चतुर्दशेन्द्रियवृत्तिरूपेण प्रकाशते। अत एव चतुर्दश वर्षाणि श्रीरामस्य वनवास इत्युक्तिस्साध्व्येव। अद्वैतस्य ब्रह्मणो देहादिभ्यो विवेचितत्वात् विदेहकैवल्यलक्ष्म्या सीतया अहं ब्रह्मास्मीत्यपरोक्षज्ञानसाहचर्यादहन्तत्त्वो-

पाधिकसंकर्षणरूपलक्ष्मणेन च सहैव दण्डकेषु वासमसाध-रेव । व्यष्टिदेहप्रवेशे ब्रह्मतत्वविचारशैथिल्यमेव दशरथमर-णत्वेनावर्णयत् । समष्टिदेहे ब्रह्मप्रकाशविरळत्वमेवायोध्या-निलयानां दुःखप्रलापरूपेणोक्तं । ब्रह्म मातृकशंखावतारो ब्रह्मानन्दो भरतश्चिद्रूपसुदर्शनावतारशत्रुघ्नेन सह स्वस्वरू-पानन्दे नन्दिग्रामे वसन् समष्टिशरीरायोध्यामपालयत् ॥

१० कर्म—भगवतो दाशरथेर्वनवासो निशाचरान् हत्वा दण्डकशल्यपादनेन देवानामृषीणामनुग्रहार्थ इति पू-र्वं दशरथेन कैकेय्यै दत्तस्य वरद्वयस्य सत्यतापादनेन पि-तृवाक्यपरिपालनार्थ इति च वर्ण्यते । एतस्य वर्णनस्या-न्तरार्थः कः ॥

सत्य—व्यष्टिशरीराण्येव दण्डकारण्यानीत्युक्तं ख-लु । व्यष्टिदेहेष्विन्द्रियाण्येव देवाः । ब्रह्मविचाराय प्रयत्ना-नि बहुविद्योपासनान्येव महर्षयः । एतेषां देवानामृषीणा-ञ्च शत्रवो निशाचरा एवेत्यत्र न कोपि विशयलेशः । स-र्वे देहादिप्रपञ्चे दृढसत्यबुद्धतया तत्त्यागलम्पटं मत्सदृशः को वा कर्माणि करोतीत्यभिमानमण्डलारूढतया जलपात्रा-लंकृतहस्तं तालवृन्तवीजनपटुतरेतरहस्तं कुण्डलालंकृतक-र्णयुगळं नाभिरूपरिविराजमानकटिसूत्रं रजततन्त्रीवदातधव-ळमुष्टिमेयोपवीतं पिचण्डिलतयानवरतविगळद्धौतवस्त्रपरिवे-ष्टितकटितटं श्रीमन्तं श्रुतिं पठन्तं भवन्तं बोधयितुमशक्य-

मेव । तथापि किञ्चिद्ब्रवीमि । "या निशा सर्वभूतानां तस्यां जागर्ति संयमी । यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ।" इति गीताद्वितीयाध्यायान्ते भगवदुक्तस्यास्य श्लोकस्यार्थो भवता विचारितः किम् । अद्वैतब्रह्मतत्त्वं पश्यतो मुनेः या निशा सा प्रपञ्चनिष्ठैव । तस्य तस्यामीषदपि दर्शनाभावात् । तस्यां निशायां प्रपञ्चनिष्ठायामेव ये चरन्ति त एव निशाचराः ऋषिकण्टका देवशत्रवः एवंविधान्निशाचरान् हत्वा दण्डकान् शुद्धीकर्तुमेवास्मत्परदेवतायाः श्रीराममूर्तेरयोध्यायामवतारो दण्डकेषु प्रविश्य वासश्च । (ननु निशाचरशब्दस्यैवंविधार्थाभावे कार्यगौरवाद्रात्रौ ग्रामाद्ग्रामान्तरं गच्छत्स्वस्मासु निशाचरत्वप्रसक्तिर्दुर्वारा । रात्रिसञ्चारादेव केवलान्न निशाचरत्वं किन्तु "राक्षसीमासुरीञ्चैव प्रकृतिम्मोहिनीं श्रिताः ।" इत्युक्तक्रूरप्रकृतित्वादेव निशाचरत्वं वक्तव्यमिति चेदस्मदुक्तनिशाचरत्वमेव दार्ढ्यमापन्नम् । अत्रार्याणामभिप्रायो वक्तव्य एव ।) अत्र भगवतश्श्रीरामस्य दण्डकेषु व्याघ्रशरीरेषु प्रवेशे कैकेय्या वरद्वयमपि घटेतैव । तथा हि । पूर्वं दण्डकेषु वैजयन्तपुरे तिमिध्वजेन सह देवप्रार्थनया दशरथस्य युद्धे परिश्रान्तन्दशरथं अरक्षत् कैकयी । तत्परिचरणतुष्टेन दशरथेन तस्यै द्वौ वरौ दत्तौ । उचितसमये ग्रहिष्यामीति तया कैकेय्या तस्मिन्नवसरे तिमिध्वजेन सह युद्धे जटायुर्नाम पक्षी दशरथ-

स्य साहाय्यमकरोत। दशरथश्च जटायुना सह सख्यमक-रोदिति पुराणान्तरे विदितं खलु विश्वेषाम्। अस्य चाय-मान्तरार्थः। व्यष्टिदेहेषु कामा एवोत्कृष्टत्वेन विजयन्ते इत्यभिमान एव दण्डकेषु वैजयन्तपुरम्। तस्मिन् तिमि-ध्वजो मीनध्वजः स्वर्गकामः पशुकामो धनकाम इत्यादि-कामः। ब्रह्मतत्वं विचारयता दशरथेनास्यापि कामो जय्यः। महाशनो महापाप्मा दुष्पूर इति भगवद्वचनेन बलवत्त्वा-दस्य युद्धे दशरथपरिश्रमो युक्त एव। आवरणशक्तेर्माया-याः विलासा एवैते कामा इति समाधानमेव कैकयीकृतद-शरथपरिचरणम्। अपि कर्मनिष्ठ! "त्रिवृद्वेदसुपर्णाख्यो य-ज्ञं वहति पूरुष"मिति बृहद्रथन्तरं पक्ष इति च बहुभिः प्र-माणैः वेद एव गरुड इति निश्चिते गरुडप्रजोरुणः तत्पुत्रौ सम्पातिजटायू इमे पक्षिणश्च वेदा एवेति निश्चयस्समीचीनः। ब्रह्मार्पणतया कर्माणि कर्तव्यानीति कर्माणि प्रतिपादयन् क-र्मकाण्डात्मको वेद एवात्र रामायणे जटायुरित्युच्यते। काम-जये सोपि दशरथस्य ब्रह्म विचारयतः वयस्य इति वर्णनं स-मीचीनमेव। एवञ्च समष्टिदेहायोध्यायामवतीर्णमद्वयं ब्रह्मैव श्रीरामः व्यष्टिदेहेषु दण्डकेषु [तदियलित] चतुर्दशेन्द्रिय-वृत्तिरूपेण प्रविश्य वसतु। ब्रह्मानन्दस्तु भरतः समष्टिदेहं ब्र-ह्माण्डमयोध्यां रक्षतु। इत्यावरणशक्तेर्मायायाः निश्चय एव कैकयीवरद्वयमिति वर्ण्यते। मायाया निश्चयमन्यथयितुन्न को-

ऽपि शक्तः। अतो वरद्वयबद्धं दशरथ पितरं मोचयितुं श्रीरामस्य वनवास इति वर्णनं समीचीनमेव। (सखे श्रीरामवनवासस्यैवंविधान्तरार्थाभावे बाह्यार्थस्यैव सत्यत्वे श्रीरामवनवासप्रयाणकाले "पुत्रं प्रथमजं प्राप्य जननी नाभ्यनन्दत" इत्युक्तिः कथं घटेत। पुत्राभावे मम सद्गतिर्नास्त्येवेति तप्यमानैरेव दशैः कैश्चिदार्यैः पुत्रलाभाय श्रीरामकथा गीयते श्रूयते च। तादृशं सद्गतिप्रदं सीमन्तजं पुत्रमनादृत्य तत्साधनमात्रे श्रीरामे कोऽयमाग्रहोऽयोध्यावासिनाम्। साधनापेक्षया साध्यस्य मुख्यत्वात् पुत्रं प्रथमजमिति श्लोकोऽयमनुचितः खलु। वदन्त्वार्याः) ॥

२१ कर्म—दण्डकारण्ययात्रायामादावेव गुहो नाम कश्चिन्निषादाधिपतिश्श्रीरामदर्शनायागतः। अयं श्रीरामस्यात्यन्तमिष्टो भरतापेक्षयाप्यतीव भक्तश्च। त्वदीये राज्ये त्वया अप्रमादिना स्थेयमिति रामोऽप्येनमुपादिशत्। एतदाश्रिता निषादा बहवस्सन्तीति वर्ण्यते। सखे कोऽयमान्तरार्थे गुहः? ॥

सत्य—(वने वसतोऽस्य निषादस्य राजधान्यां वसतश्चक्रवर्तिसुतस्य श्रीरामस्य च वयस्यत्वं कथमागतम्। अयोध्यापतीनां वने पर्वतप्रान्तेषु कृषिभूमिरस्ति वा। तदधिकृतः कश्चित् कृषीवलः किमयं गुहः। अथवा मृगयायान्निषादराजेनानेन सख्यं जातं किम्। अपि चास्य गुह इ

ति नाम्नः को वार्थः । "श्रियो निवासो यस्योरः" तेन रामचन्द्रेणालिंगनयोग्यतास्य कथञ्जाता । एतत्सर्वं विचार्येत वा पौराणिकैरार्यैः ।) हन्त हन्त हिन्दुस्थानिकापि बहाकशहनाझंझे टीतिरागालाप एव दत्तचित्तानां पौराणिकानामेतद्विचारावसरः कुतः? । सखे मदीयचित्तभ्रमे भातमेनं गुहं वच्मि शृणु । चराचरात्मकजगद्भ्रमस्य ईश्वरभ्रमस्य च यदधिष्ठानं चैतन्यं तदेव ब्रह्मेति देहेन्द्रियादिभ्रमस्य जीवभ्रमस्य च यदधिष्ठानं चैतन्यं तदेव कूटस्थस्साक्षी प्रत्यगात्मा सर्वान्तरश्शंकर इति च उच्यते । भागलक्षणया महावाक्यार्थविचारेण जीवेश्वरभ्रमनाशे तु प्रत्यगात्मैव ब्रह्मेत्यद्वैतमेव सत्यमितीशकेनकठप्रश्नाद्युपनिषत्सु प्रतिपाद्यते । एवञ्च जगदधिष्ठानस्याद्वैतस्य ब्रह्मणश्श्रीरामपूर्तेस्समष्टिशरीरायोध्यायां कृतावतारस्य व्यष्टिशरीरेषु दण्डकेषु प्रवेशाद्यक्षणे पञ्चकोशगुहान्तस्थस्य कूटस्थचैतन्यस्य दर्शनं प्रथमतो गुहदर्शनव्याजेनोक्तमादिकाव्ये गम्भीराभिप्राये । (एवंविधान्तरार्थो न युज्यतएवेति निस्संशयं वदद्भिरार्यैः पौराणिकैर्निषादाधिपतेर्गुह इति नाम्नोभिप्रायमुक्त्वा पश्चाद्वीणातन्त्रीऋजूकरणं स्वररामणीयकापादनाय तन्त्रीप्रोतकाचमणिचालनञ्च कर्तव्यम । नो चेत्तेषां रामायणगायकानां तोन्तरनगायकत्वमेव विशदं भवेत् ।) सखे गुहाधीना निषादास्तु कूटस्थचैतन्याध्यस्ताश्चिदाभासा जीवा एव । महाभारतान्त-

गेतवनपर्वणि कैरातपर्वणः आन्तरार्थे विवृतस्य परमभक्त- स्यास्य गुहस्य परमार्थस्वरूपमीषदप्यजानतामार्याणां शृंग- पुच्छचतुष्पादहीनतैकैव न्यूनतेति वक्तुं बिभेमि सखे! ॥

२२ कर्म—सीतालक्ष्मणाभ्यां दण्डकेषु प्रविश्य ग- च्छता दाशरथिना प्रथमतो विराधो हतः किल। कोयं वि- राधो निशाचरः ॥

सत्य—रामायणान्तरार्थमीषदप्यजानद्भिर्भवादृशै- रार्यैराशास्यमानो विविधः काम एव विराधो निशाचरः। अत्र विराधपदधात्वर्थ एव साक्षी। व्यष्टिदेहेषु प्रविष्टो भ- गवान् श्रीरामः विदेहकैवल्यलक्ष्मीमपहरन्तं कामं प्रथमतो- जैषीत्। "न जातु कामः कामानामुपभोगेन शाम्यति। ह- विषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते।" इति बचनाद्बाणैः खड्गाभ्यां मुष्टिभिश्शिलाभिर्हन्यमानोप्ययं न सहसा ममा- र। अत एनमवटे चिक्षिपतुर्दाशरथी इतिवर्णनं साध्वेव ॥

२३ कर्म—दण्डकेषु जनस्थाननिवासिनी सा शू- र्पणखा का?। या छिन्नकर्णनासा विक्षरन्ती शोणितं चतु- र्दश राक्षसान् रामेणामारयत्। पुनः किञ्चित्संशुष्कशोणि- ता रक्षसाञ्चतुर्दशसहस्रैरसह खरदूषणत्रिशिरसोपि समर्हि- नोद्रामपावके शलभप्रायान्। जनस्थानयुद्धं विवृणु सखे॥

सत्य—जनानां व्यष्टिदेहोपाधीनाञ्जीवानां पुनः पु- नस्थूलदेहनाशे मरणे। तदुत्पत्तौ जनने च स्थानं मन ए-

व। "मनः कर्ममयं नृणामिन्द्रियैः पञ्चभिर्युतम। लोकाल्लोकं प्रयात्यन्य आत्मा तदनुवर्तते।" इति वचनात् दण्डकेषु व्यष्टिशरीरेषु मन एव जनस्थानमित्युच्यते। तत्र स्रक्चन्दनवनितादिविषयबुद्धिरेव शूर्पणखेत्युच्यते। दुर्वारवेगामेनां विषयबुद्धिं विदेहकैवल्यलक्ष्मीकबळनोद्यतां प्रतिवारयितुं कुरूपयितुञ्च कश्शक्नुयादहं ब्रह्मास्मीत्यनुभवमकर्षणावतारलक्ष्मणं विना। विषयबुद्ध्यनुगतानि ज्ञानेन्द्रियपञ्चककर्मेन्द्रियपञ्चकान्तःकरणचतुष्टयात्मकचतुर्दशेन्द्रियाण्येव चतुर्दश राक्षसाः। सहस्रश आवर्तितास्तेषां वृत्तिभेदा एव चतुर्दशसहस्रं निशाचराः। (अन्यथा चतुर्दश राक्षसाः पुनश्चतुर्दशसहस्रं राक्षसाः जनस्थाने रामेण हताइति संख्योपादाने निमित्तं किं वदन्त्वार्याः।) अयि कर्मनिष्ठ धनवानहं बन्धुमान् सुरूपस्सर्वकर्मसु समर्थोऽहं सोमयाजी पौराणिकोऽहं घनपाठ्यन्तर्वाणिरिति सदा मनसि वर्तमानोऽभिमान एव जनस्थाननिवासी खरो नाम निशाचरः। त्रिगुणात्मकं त्रैलोक्यमिदं सत्यमेवेत्यभिमानस्त्रिशिरा नाम राक्षसः। स्वर्गादिसुखायैव यज्ञादिकर्माणि कर्तव्यानीति निश्चित्य "सुखमस्यात्मनोरूपं सर्वेहोपरतिर्हि तत्"इत्यवधूतप्रतिपादित स्वस्वरूपाद्वैतसुखं दूषयन् योऽभिमानो बलवान्मनसि वर्तते स एव दूषणो नाम रात्रिञ्चरः। एतान् सर्वानपि जनस्थाननिवासिनो निशाचरान् हत्वा जनस्थान-

मनस्शुद्धीचकार भगवानयोध्यापतेः पुत्रः परमात्मा श्रीरा-
मः । सखे कर्मनिष्ठ! बहुजन्माभ्यस्तं स्थिरीभूतम्मनसि स्थि-
तं खरं देहाभिमानं हातुं त्रिपुरान्तकस्य श्रीरुद्रस्य कृपयैव
भाव्यम् । अतः खरवधे श्रीरामो रुद्रांश एवेति भवादृशैरु-
च्यमानं साध्वेव ॥

२४ कर्म—"संसारचक्रक्रकचैर्विदीर्णमुदीर्णनानाभवतापतप्तम् । कथञ्चिदापन्नमिह प्रपञ्चं त्वमुद्धर श्रीनृहरे! नृलोकम् ।" इति श्रीधरस्वामिवचनेन कथञ्चिन्मनुष्यजन्मापन्ना एव संसारन्तरन्तीति निश्चित्य ये रामायणं गायन्ति शृण्वन्ति श्रीरामं पतितपावनं भजन्ति च नरास्ते एव कृतार्थाः । केचिद्रामायणमिदं त्रैवर्गिकप्रधानं न तु मोक्षोपयोगि श्रीमद्भागवतमेव मोक्षार्थिभिरादरणीयमिति मन्वानाः कुलपरम्परागतं वाल्मीकिरामायणगानमनादृत्य श्रीभागवतपौराणिका वयमित्यात्मानं कृतार्थम्मन्यन्ते । हा हा "अष्टादशपुराणानि सेतिहासानि चानघाः । रामायणैकदेशस्य कलान्नार्हन्ति षोडशी"मिति वचनं स्मृत्वैव । अयि सखे सत्यनिष्ठ! मायया कनकमृगरूपमारीचसहायेन श्रीराममपोह्य रामपत्नीं वैदेहीमपहृत्य मध्येमार्गं रुन्धानं जटायुमपि हत्वा दशमुखेनाशोकवने स्थापिता सीतेति वर्ण्यमानस्य सीतापहारस्यान्तरार्थः कः? ॥

सत्य—विषयस्फरणमेव मारीच इत्युक्तं खलु ...

न्मया। इदं विषयस्फुरणं मायामयमपि कनकवत्सर्वैर्मृग्यते। अतो मारीचो मायया कनकमृगो भूत्वा सीतां विदेहकैवल्यलक्ष्मीमलोभयत्। अद्वैतः परमात्मा भगवान्दाशरथिः प्रणवमयकोदण्डपाणिर्विषयस्फुरणनाशायोद्युक्तः। तदानीं विदेहकैवल्यलक्ष्मीरक्षकत्वेन निरूपितो योहं ब्रह्मास्मीत्यपरोक्षानुभवरूपो लक्ष्मणस्तस्यापरोक्षानुभवस्याप्यपगमे विदेहकैवल्यश्रियमपाहरद्रावणो लोककण्टको दशास्यः। अयि सखे! रामायणान्तरार्थे कोयन्दशवदन इति मया चिन्त्यमाने तवाक्षेपरूपचतुर्दशप्रश्नेनैव स्फुरितं दशाननस्यान्तरार्थमिदानीं वच्मि। पौलस्त्य इति रावण इति विश्रवसः पुत्र इति दशवदन इति लंकाधिपतिरिति च पदानामर्थविवरणे केषाञ्चिदार्याणां प्रकोपो भवेदेव। तथापि "न ते वागनृता काव्ये काचिदत्र भविष्यती"ति पद्मजानुगृहीतानां पञ्चकोशगुहावल्मीकादवतीर्णानां प्रत्यग्रपत्वेन प्राचेतस इति प्रसिद्धानामाचार्यपादानामनुग्रहेण प्रकोपोपि प्रहर्षाय भवेदेवेत्यभीतोहं विवृणोमि रावणम्। वाल्मीकिरामायणस्यैवंविध आन्तरार्थो न भवेदेवेति निस्सन्देहन्निर्भयश्च यो रोरवीति स एव रावण इति हृद्गतोर्थः। सखे श्रीरामनामश्रवणे तप्येत वपुरापादमस्तकं रावणस्येति प्रसिद्धिस्साध्वी खलु। रामपदे धात्वर्थ आनन्द एवेत्यत्र दाक्षीसुतशासनमेव प्रमाणम्। "आनन्दो ब्रह्मेति व्यजानात्। एकमेवाद्वितीयं

ब्रह्म । नेह नानास्ति किञ्चन । मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति । " इत्यादिश्रुतिभिः—

"उद्भूतं भवतस्सतोपि भुवनं सन्नेव सर्पस्स्रजः
कुर्वन् कार्यमपीह कूटकनकं वेदोपि नैवंपरः ।
अद्वैतन्तव सत् परन्तु परमानन्दं पदन्तन्मुदा
वन्दे सुन्दरमिन्दिरानुत हरे मा मुञ्च मामानतम् ॥
धामत्रयपथातीतं धामत्रितयसाक्षिणं
तुरीयं शिवमद्वैतमात्मानं विद्धि राघवम् ।
आश्रयं सर्वजगतामनाश्रयमविक्रियं
रामं विद्धि परं ब्रह्म सच्चिदानन्दलक्षणम् ॥
भिद्यते हृदयग्रन्थिर्यस्मिन्दृष्टे परावरे
क्षीयन्ते चास्य कर्माणि रामस्तद्ब्रह्म शाश्वतम् ।
यन्न जिज्ञासते ज्ञात्वा यद्गत्वा न निवर्तते
तदेकमद्वयं ब्रह्म रामञ्जानीहि शाश्वतम ॥
दाम्नीवाहिरिदं यस्मिन्नामरूपात्मकञ्जगत् ।
असत्सदिव भात्येनं रामन्तद्ब्रह्म संस्मर ॥ " इत्यादि-

स्मृतिभिश्च प्रतिपादितं पुरुषसूक्तप्रतिपादितसमष्टिविग्रहायोध्यायामवतीर्णस्य भगवतो दाशरथेस्स्वरूपं अद्वैतं ब्रह्मैव । तदेव सत्यम् । अन्यत्सर्वं वियदादिकञ्जगन्मिथ्यैवेति श्रुते यस्यापादमस्तकं तप्यते वपुः स एवं रावण इति वेदवित्तैरस्मिन्नादिकाव्ये रामायणे वर्ण्यते । रावणोयमेतन्मित्राणि

रक्षांसि च पौलस्त्या एव तथाहि । स्वावयवेभ्यः प्रजापतीन्देवादींश्च सृष्ट्वा ब्रह्मा लोकपतिस्तेभ्यस्स्वावयवांशमदादिति श्रीभागवते प्रतिपादितम् । तत्र पुलस्त्यः कर्णयोर्जातः । तस्य हविर्भुजि पत्न्यां द्वौ पुत्रौ । अगस्त्यो विश्रवाश्चेति । इळिबिळा कैकसी चेति द्वे पत्न्यौ खलु विश्रवसः । रुद्रभक्तः कुबेर ऐळिबिळिः । रावणकुम्भकर्णविभीषणाः कैकसीसम्भवाः । अयि सखे अत्रेदं चिन्त्यं स्वप्नप्राये मायामयेऽस्मिन् जगति कर्णाभ्यां यद्यच्छ्रूयते तत्तत्सत्यमेवेत्यभिमानः पुलस्त्यः कर्णयोर्जातः । तत्तदनुभोक्तव्यमेवेति मतिर्हि हविर्भुक् तस्य पत्नी । चराचरात्मकजगतो भगवतो नारायणस्य देहत्वात् सत्यत्वाच्च जगद्भोगानुभव एव विशेषकीर्तिरित्यभिमान एव हविर्भुजि जातो विश्रवा नाम पुलस्त्यस्य पुत्रः । चराचरात्मकजगतो भगवद्देहत्वेन सत्यत्वेपि प्राकृतप्रक्षये श्रीरुद्रकोपेन दह्यमानत्वाद्ब्रह्मकल्पपर्यन्तं श्रीरुद्रकृपया कुं चराचरात्मकभूमिं बिभर्तीति कुबेरनामा विश्रवसः पुत्रः । स एव लीयमानायाः चराचरजगद्देहलङ्कायाः पतिः । चराचरजगद्देहान्तर्गतानां निधीनां धनानां पालक[illegible] । चराचरजगद्देहस्य प्रळयकाले लीयमानत्वेपि पुनः पु[illegible]ष्यादावुत्पत्तिदर्शनात् कीकसवद्दृढत्वाच्च सत्यमेवेद[illegible]त्यभिमान एवं कैकस्यां विश्रवसः पुत्रो रावणो नाम [illegible] । चराचरजगद्देहस्य सत्यत्वमन्वानोऽयं पौलस्त्यो

विश्रवसः पुत्रः कुबेरं पराजित्य श्रीरुद्रानुग्रहलब्धं लंकाख्यं चराचरजगद्देहं तस्मादपहृत्य लंकाधिपतिस्सन् चराचरजगद्देहविशिष्टं सर्वव्याप्तं भगवतो नारायणस्य स्वरूपमेव सत्यम । तच्चाप्राकृतदिव्यवैष्णवलोके शंखचक्रगदापद्मालंकृतचतुर्वाहुमत्मेतं वर्त्तते । निर्गुणं निरवयवं निरञ्जनमद्वैतं ब्रह्मेति किमपि नास्त्येव । तच्छून्यतत्वमेव । प्रमाणाभावादिति सर्वान् रावयन् रावणो नाम प्रसिद्धः । दाशरथिमद्वैतं रामं द्विषन् कैवल्यलक्ष्मीरस्माकमेवाधीना भवतु स त्वद्वैतो रामो हन्तव्य इति निश्चित्य विदेहकैवल्यलक्ष्मीमपहृत्य ब्रह्मार्पणतया निष्कामकर्म्मप्रतिपादककर्म्मकाण्डवेदं दशरथसखजटायुं मध्येमार्गं रुन्धानं निष्कामतया कर्म्मकरणे किमिह प्राप्यं फलं भगवद्देहत्वेन जगतस्सत्यत्वात् सत्यकामेनैव कर्म्माणि कार्याणीति प्रतिपादयत् श्रीरामबन्धुजटायुं विदार्य सत्तारूपिणीं विदेहजां मुक्तिलक्ष्मीं चराचरजगद्देह लंकायां बलात् स्थापयामास । हविर्भुजि जातः पुलस्त्यपुत्रोगस्त्यस्तु सोन्यजन्मनि देहाग्निरिति प्रमाणेन चराचरजगद्देहे जाठराग्निस्सन् चराचरजगद्देहलङ्कानाथस्य रावणस्य नाशाय प्रणवमयवैष्णवचापदानेन सर्वं खल्विदं ब्रह्मेति ब्रह्मास्त्रदानेन च साक्षादद्वैतस्य ब्रह्मणश्श्रीरामस्य साहाय्यकृदेवेति विशदमुक्तमारण्यकाण्डे परमगुरुणा वाल्मीकिना । (अत्र चराचरजगद्देह एव लंकेति यदुक्तं तदसमीची-

नमेवेति चेत् पूर्वं लङ्काधिपः कुबेरः पश्चात्तं पराजित्य रावणस्तस्माद्धार्षील्लङ्कां खलु । दिक्पालेषु उत्तरदिक्पालस्य कुबेरस्य दक्षिणलवणोदधिमध्ये लंकेयं कथमासीत् । लङ्कायास्तत्र निर्माणे कारणं किं वदन्त्वार्याः पौराणिकाः ।) मखे चराचरजगद्देह एव लंकेत्यान्तरार्थस्समीचीनः । "शुक्लकृष्णे गती ह्येते जगतश्शाश्वते मते । एकया यात्यनावृत्तमन्ययावर्तते पुनः"रितिवचनेन चराचरजगतो दक्षिणगत्यन्तर्भूतत्वात् ॥

२५ कर्म—सखे सत्यनिष्ठ त्वमतिर्मार्गमसि । यतः निर्भयं वदसि रामायणस्यान्तरार्थम् । लङ्काधिपते रावणस्य दशमुख इति नाम कथं जातम् । वेत्सि किं वद ॥

सत्य—चराचरजगत्सृष्टिस्तु श्रीभगवते दशविधत्युक्ता । तथा हि । "षडिमे प्राकृताः प्रोक्तास्सर्गास्ते विश्वसृक्कृताः । वैकृतास्त्रय एवैते कौमारस्तूभयात्मकः । " इति सृष्टिकथनावसरे मैत्रेयेणोक्तम् । सखे प्राकृतसृष्टिष्षड्विधा । वैकृतसृष्टिस्त्रिधा । प्राकृतवैकृतोभयात्मिका सृष्टिस्त्वेकविधैवेति प्रतिपादितदशविधसृष्टिरूपचराचरजगद्देह एवायं रावणोभिमुखो वर्तते । जगन्निषेधावधित्वेन सिद्धे परमात्मन्यद्वैते ब्रह्मणि दाशरथौ न कदाचिदप्ययमभिमुखः । तस्माद्दशमुख इति नामास्य साध्वेव । (अन्यथा दशमुखत्वकारणं वक्तव्यमेव पौराणिकैरार्यैः ।)

२६ कर्म—सीतान्वेषणाय सुग्रीवेण सख्यमकरोदिति वालिनं हत्वा वानरराज्ये सुग्रीवं राजानमकरोदिति च वर्ण्यते । अत्र च श्रीरामं प्रति वालिकृताक्षेपाय श्रीरामोक्तमुत्तरं न सम्यगासीदिति केषाञ्चिदार्याणामभिप्रायो वर्तते । श्रीरामेण सम्यगुत्तरमुक्तं वा ब्रूहि सखे ॥

मत्य—श्रीमद्रामायणे वाल्मीकिहृदयमीषदप्यजानतामार्याणां काकस्य कति वा दन्ता इतिवदाक्षेपसमाधानैः किं प्रयोजनम् । सखे स्वाक्षेपाय श्रीरामकृतसमाधानेन सन्तसन्मन् त्वत्प्रभावमविज्ञाय मूढेन मयाधिक्षिप्तोसि । त्वया सम्यगुत्तरमुक्तं मदाक्षेपं क्षमस्वेति वाल्यब्रवीत् खलु । श्रीरामोक्तमुत्तरमसम्यक् चेत् पुनर्वालिनोक्तमप्यसम्यगेव । तथैवेति चेत् असम्यक्त्वं वर्णयन्नादिकविरप्यसमीचीनस्तत्कृतमादिकाव्यं रामायणमप्यसम्यगेवेति प्रसज्येत । तिष्ठतु बाह्यार्थविचारः । चराचरजगद्देहवैशिष्ट्यवादिना लोककण्टकेन दशास्येन सत्तारूपिण्यां विदेहकैवल्यलक्ष्म्यां अपहृतायां तदन्वेषणाय सुग्रीवसख्येन वालिवधेन च भाव्यमेवेति श्रुत्यभिप्रायः । तथा हि । बह्व्यः क्रियाशक्तय एव वालिसुग्रीवादिवानरसंज्ञयात्र रामायणे वर्ण्यन्ते । त्रिविधकरणजन्यानि कर्माणि । मनोवाक्कायरूपत्रिविधकरणन्तु पञ्चकोशगुहान्तर्गतमेव । प्रवृत्तौ प्रपञ्चसुखे निवृत्तौ मोक्षसुखे च किं किं न धास्यतीयं पञ्चकोशगुहा । सर्वं धास्यत्ये-

त्र। अतः पञ्चकोशगुहैवात्र रामायणे किष्किन्धा वानरनगरीत्युच्यते। सखे कर्मनिष्ठ त्रैलोक्यसखाय प्रवृत्तौ प्रयोजिता क्रियाशक्तिरेव त्रिलोकाधिपेन्द्रपत्रो वाली। मोक्षमखाय निवृत्तौ प्रयोजिता क्रियाशक्तिरेव मोक्षद्वारात्मकसूर्यपुत्रस्सुग्रीवः। वालिनस्सकामत्वाच्चराचरजगद्देहलङ्काधिपेन सकामेन दशमुखेन सख्यवर्णनं माध्वेव। अपि चेदानीमयोध्यापालकं ब्रह्मानन्दं भरतमनादृत्य त्वं केवलं कामप्रधानोसि। मयोदितेषु निष्कामधर्मेषु नैव वर्तसे। अतो मया वध्य एव। सत्तारूपिण्याः विदेहकैवल्यलक्ष्म्याः मार्गणाय निष्कामधर्मेण सुग्रीवेण सह सख्यं युक्तमेवेति श्रीरामवचनाभिप्रायं वालिनं प्रति श्रीरामसमाधाने गूढार्थञ्च को वा जानाति पौराणिकः कोकिलवत् गायन्नपि। किञ्च अहमपशान्तः। त्वन्तु किष्किन्धायां राजा भव। आवयोर्यौगपद्येन सुखं न दैवकल्पितमिति सुग्रीवं प्रति वालिवचनस्याभिप्राय "कर्म प्रवृत्तञ्च निवृत्तमप्यृतं वेदे विविच्योभयलिंगमाश्रितमविरोधि तद्यौगपदेककर्तरी"ति दक्षं प्रति सतीदेवीवचनमत्र स्पष्टीकरोति॥

२७ कर्म—श्रीरामकथाश्रवणेन रावणापहृता सीता लङ्कायां स्थितेति वाचा केवलं वानरेभ्यस्साहाय्यकरणेन च पूर्वन्दग्धावपि सम्पातेः पक्षौ पुनरुत्पन्नाविति वर्ण्यते। सम्पातेः पक्षदाहोत्पत्योरान्तरार्थः कः॥

सत्य—चित्तशुद्धये निष्कामकर्मप्रतिपादकः कर्मकाण्डो वेद एव जटायुरिति विशदमुक्तं खलु प्राङ्मया ॥ तदग्रजस्संपातिस्तु प्रत्यगभिन्नब्रह्मप्रतिपादकः ज्ञानकाण्डो वेद एव आम्नायस्य क्रियार्थत्वात ज्ञानकाण्डस्याप्याम्नायत्वाविशेषात् कर्मतत्फलप्रतिपादकत्वमेव युक्तमिति केषाञ्चिदार्याणामभिमान एव दग्धपक्षत्वं संपातेः । प्रत्यगभिन्ने ब्रह्मणि सम्यक् पतितुं शीलं यस्य स संपातिः । अयं संपातिर्ज्ञानकाण्डो वेदः कर्मकाण्डवेदं जटायुं रक्षितुमुद्युक्तश्चेत् गरुत ब्रह्मणि पतनसामर्थ्यं दह्येतैव सूर्यतेजसा ।अतो जटायुं रक्षितुमुद्युक्तस्संपातिस्सूर्यकिरणदग्धपक्षो भूदिति वर्णनं समीचीनमेव । संपातेः पक्षाहरीति किञ्चिद्वच्मि । मा मे कर्मनिष्ठ मा कुप्य । धूमापूपचणकचूर्णकृतगोळकादिभक्ष्यैराज्यलोलिनैरानासमागळमुदरपूरणाय कलाचतुष्टयलाभाय च कृतप्रयत्नैर्भवादृशैः कैश्चिदार्यैर्ब्रह्मविदाप्नोति परमिति भृगुर्वै वरुणिरिति च सुस्वरमुच्चैरुतद्घुष्यते ॥ अपि च मत्पुत्रः कदा बी–ए–बी–एलित्यादि परीक्षायां विजयी भवेत् स्वामिन् नारायण कदाहं पौत्रमुखदर्शनेन कृतार्थस्स्यामित्याद्याशापाशशतावृतैः कटितटघटितपट्टवस्त्रापरिविराजमानकनकसूत्रैर्विचित्रलतारेखान्वितराजतपञ्चपात्रालंकृतहस्तैः कैश्चिदार्यैरुपनिषज्जापका एव द्वादश्यां पादप्रक्षाळने स्वीकार्याः न कदाचिदपीतरे इति मधुरस्वरैः

ते। सखे शृणु। दुःखे कस्मिंश्चिदायाते बलादारब्धकर्मणः। सा द्वादशी भवेदेकादश्येव प्रभुवेश्मसु। किञ्चैजमानगृहे द्वादश्यामुपनिषदं पठसि चेत् कलाचतुष्टयदक्षिणा मृष्टान्नभुक्तिश्च लभ्येत। हन्त रे पुत्र उपनिषदं पठेति केचिदार्या गुरुतरकार्याण्यपि परित्यज्य स्वपुत्रमुपनिषदं पाठयन्ति च। अयमेव संपातेः पक्षदाहः। यदायं ज्ञानकाण्डो वेदस्संपातिर्वैदेहीस्थितिकथनेन श्रीरामभक्तानामुपकारं करोति तदा दग्धयोरपि पक्षयोर्विरोहो भवेत्। (संपातेः पक्षिणस्तत्पक्षदाहविरोहयोश्चैवंविधार्थकल्पनमयुक्तमेवेति चेत् सूर्याग्निदग्धपक्षं विन्ध्ये गिरौ पतितं पुनष्षड्रात्रान्ते लब्धसंज्ञं कथञ्चिद्दुःखेन स्वसमीपमागतमेनं संपातिं दृष्ट्वा निशाकरो नाम कश्चिन्महानुभावो महर्षिः रामदूतानामागमनपर्यन्तमेवन्तिष्ठ। आगतेभ्य स्तेभ्यो वानरेभ्यो वैदेहीस्थितिं कथय। तदा पक्षावुत्पत्स्येते। इत्यब्रवीत् खलु। तस्य महर्षेर्निशाकर इति नाम कथञ्जातम्। पितामहनाम्ना उत मातामहनाम्ना वदन्तु पौराणिकाः।) सखे कर्मनिष्ठ शृणु। य एवं विद्वानुदगयने प्रमीयते इत्यारभ्य आदित्यस्य सायुज्यं गच्छतीति। अथ यो दक्षिणे प्रमीयते इत्यारभ्य चन्द्रमसस्सायुज्यं सलोकतामाप्नोतीति च मातेवोपदिशन्तीश्रुतिः ज्ञानकाण्डवेदस्य फलं सूर्यमण्डलद्वारा मोक्ष इति कर्मकाण्डवेदस्य फलं सोमलोकप्राप्तिस्तदनु पुनरावृत्तिश्चेति वदति ख

लु। तस्मात् परमात्मन्यद्वैते ब्रह्मणि पतनाशक्तस्य ज्ञानकाण्डस्य वेदस्य उपदेशेनानुग्राहकस्सोम एव। स सोम एव निशाकरो महर्षिरित्यस्मिन्नादिकाव्ये गंभीराभिप्राये रामायणे वर्ण्यते। एतौ वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयतीति श्रुत्यैव प्रसिद्धं संपातेस्तत्वतो रूपमजानतां पौराणिकानां जनरञ्जनाय वीणातन्त्रीऋजूकरणमेव गतिः॥

२८ कर्म—मारुतिश्शतयोजनमायतं लवणोदधिमुल्लंघ्याशोकवनगतां सीतां दृष्ट्वा तयानुगृहीतोशोकवनं भङ्क्त्वा लंकामदहदिति सुन्दरकाण्डे वर्ण्यते। अस्यान्तरार्थः कः। आञ्जनेयं विवृणु सखे॥

सत्य—दूरीकृतसीतार्तिः प्रकटीकृतरामवैभवस्फूर्तिः। दारितदशमुखकीर्तिः पुरतो मम भातु हनुमतो मूर्तिः॥ श्रीमते हनुमतेनमः। सखे परमभागवतस्याञ्जनेयस्य महिमानं वक्तुं को वा शक्नुयात्। अथापि किञ्चिद्विवृणोम्यस्य परमार्थं यथामति। "बुद्धीन्द्रियमनःप्राणाञ्जनानामसृजत् प्रभुः। मात्रार्थञ्च भवार्थञ्च आत्मनेकल्पनाय च।" इति श्रुतिगीताप्रारम्भे श्रीशुकवचनेन प्राणसृष्टेरकल्पनाय कल्पनानिवृत्तये इति विशदमवगम्यते। प्रत्यगभिन्ने ब्रह्मण्यद्वितीये यज्जीवेश्वरजगत्कल्पनं तन्निवृत्तये मुख्यप्राणस्य परमभागवतस्य श्रीरामदासस्याञ्जनेयस्यानुग्रहं विना क-

श्शक्नुयात् सोमयाज्यपि चतुश्शास्त्रपण्डितोपि सम्यगधीत-
वेदोपीति किमु वक्तव्यम् । श्वमितमपि न कोपि शक्तः ।
प्राणन्देवा अनुप्राणन्ति । मनुष्याः पशवश्च ये । इति श्रु-
त्यैवास्य महिमोद्घुष्यते । "ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्म-
णा हुतम् । ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना । " इ-
ति भगवता वासुदेवेनोक्ता ब्रह्मार्पणक्रियाशक्तिरेवाय हनू-
मानिति वाल्मीकिरामायणे वर्ण्यते । शतायुःपरिमितपार्थिव-
देहे अहम्ममेत्यभिमानावेश एव शतयोजनविस्तारो लवणो-
दधिः । अस्य महतो हनूमतो वेगे कियानयं शतयोजन-
मात्रस्सागरो देहाभिमानः । चराचरजगद्देहविशिष्टमेव त-
त्त्वमित्यभिमानावेशवशंवदेन दशास्येन साक्षादद्वैतपरब्रह्म-
णो दाशरथेस्सत्तारूपिण्यां प्राणप्रियायां विदेहकैवल्यलक्ष्म्यां
चराचरजगद्देहलङ्कापरिणीतायां परमभागवतो मारुतिरयं
तान्द्रष्टुकामश्शतायुःपरिमितदेहाभिमानजलधिमुल्लंघ्य ल-
ङ्काश्रियं पराजित्य चराचरजगत्सत्यमेव तदेवाशोकवनमिति
दशास्यरक्षिताशोकवने निगूढां विदेहजां कैवल्यलक्ष्मीं द्र-
ष्ट्वा तयानुगृहीतः पौलस्त्यरक्षितमशोकवनं तदानन्दस्था-
नत्वैस्त्यक्षोन्मथ्य दशमुखप्रयुक्तसप्तप्रकृतिपञ्चविषयाक्षादी-
न्निहत्याद्वैतब्रह्मवाचकस्य प्रणवस्यान्यथार्थकल्पनेनेन्द्रजिति
प्रसिद्धं मेघनादमपरोक्षज्ञानरूपी रामानुजो जेष्यतीति नि-
श्चित्य दशाननन्दृष्ट्वा तस्मै श्रीराममाहात्म्यमुक्त्वा स्वद्र

हप्रवृत्तस्य तस्य चराचरजगदिहलङ्कां दग्ध्वा प्रतिनिवृत्तश्श्रीरामपादारविन्दमत्र ह स्वशिरसायं स्मरणमात्रार्तिनाशनस्सेवकानाम । सखे कर्तनिष्ठ दशमखहृतायास्सर्वोत्तरसौन्दर्यवत्यास्सत्तारूपिण्या विदेहकैवल्यलक्ष्म्यास्सन्दर्शनं प्रतिपादयतोऽस्य काण्डस्य बालायोध्येत्यादिक्रममपहाय सुन्दरकाण्ड इति नामधेयं वल्मीकगृहाया निर्गतैर्गुरुपादैरेव निश्चितम । अतस्समीचीनमेव काण्डनाम । (सुन्दरकाण्डस्यैवंविधार्थकल्पनायुक्तस्चेत् एतत्काण्डाभिधानाभिप्रायं वदन्त्वार्याः । अपि च सीतादर्शनायाशोकवनं गन्तुमिच्छतो मारुतेः "सिद्धिमग्निश्च वायुश्च पुरुहूतश्च वज्रभृत् । वरुणः पाशहस्तश्च सोमादित्यौ तथैव च । सिद्धिमे संविधास्यन्तु देवास्सर्षिगणास्त्विह । नमोऽस्तु वाचस्पतये सवज्रिणे" इत्यादिप्रार्थनायाः बन्धनिवृत्तिद्वारा मोक्षप्रासये उपनिषदर्थविचारप्रवृत्तानाम्महतामार्याणां "शन्नो मित्रश्शं वरुणः । शन्नो भवत्वर्यमा । शन्न इन्द्रो बृहस्पतिः । शन्नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो ।" इत्यादिप्रार्थनायाश्च को विशेषः । वदन्त्वार्याः पौराणिकाः वीणाहस्ताश्शाहनारागालापसमर्थाः ।) सखे! अइउण् ऋलृक् चैवमिकोयणचि इत्यपि । निधाय हृदि विश्वेशं पर्वतो वह्निमानिति । सोपाधिकोऽयं व्याप्यत्वासिद्ध इत्यपि चादरात् । ये पठन्ति सदा तेषु महत्सु न वृथा भवेत् । कण्ठक्षोभो मे

दीयोयमिति दाशरथिं भजे । तत्पादपद्मम् । शिरसा वहन्मामवताद्धरिः ॥

२९ कर्म—किञ्चाद्दहस्य । सख सत्यनिष्ठ! "भक्ष्याशयाहिमंजूषां दष्ट्वाखुस्तेन भक्षितः" इतिवत् रामायणान्तरार्थप्रतिपादने प्रवृत्तस्त्वं स्वानिष्टप्राप्त्या महत्संकटमापन्नोसि । यतो हनूमत्कृतचराचरजगद्दहलङ्कादाहनान्तरार्थे त्वदभिमतायोध्यपुरमपि दग्धमेव । चराचरजगदात्मकब्रह्माण्डस्य समष्टिदेहस्यैवायोध्यापुरत्वेनोक्तत्वात । त्वदुन्मादोयन्तिरस्करणीमपहायेदानीं रंगं गत एव ॥

सत्य—सखे मा हस मां शास्त्रहृदयमविज्ञाय । चराचरात्मकब्रह्माण्डस्य समष्टिविग्रहस्येश्वरनिर्मितस्यैकत्वेपि अयोध्यापुरत्वेनोक्तो ब्रह्माण्डात्मकसमष्टिविग्रहः लङ्कापुरत्वेनोक्तो ब्रह्माण्डात्मकसमष्टिविग्रहश्च परस्परभिन्नावेव । प्रतियोगिबुद्धिभेदात् । "भार्या स्नुषा ननन्दा च याता मातेत्यनेकधा । प्रतियोगिधिया योषित् भिद्यते न स्वरूपतः ।" इति । ईशनिर्मितमण्यादौ वस्तुन्येकविधे सति । भोक्तृधीवृत्तिनानात्वात् तत्भेदो बहुधेष्यते ।" इति च गुरुवचनानभिज्ञस्त्वं परिहससि माम् । वाल्मीकिहृदयं शृणु । "जगृहे पौरुषं रूपं भगवान्महदादिभिः । सम्भूतं षोडशकलमादौ लोकसिसृक्षये"ति श्रीमद्भागवतप्रतिपादितो यस्समष्टिदेहः पौरुषस्सोद्वैतब्रह्मविचारायैव स्वीकृतः । अतो ब्रह्मवि-

च्चारायोपयुक्तस्समष्टिदेहोस्माभिरयोध्येत्युक्तः। पौरुषस्य समष्टिदेहस्य गृहीतत्वोक्त्या उत्सृष्टत्वमपि भवेत्। अतोऽन्यावतारसाधारणतया श्रीरामचन्द्रस्यायोध्यावासिभिस्सहैव स्वलोकगमनमुपवर्णितं वल्मीकादवतीर्णैः प्रत्यङ्निष्ठैर्गुरुभिः। अद्वैतब्रह्मण्यनभिमुखस्य दशमुखस्य मते तु परमतत्वस्य सदा चराचरजगद्देहवैशिष्ट्याभिमानात् लङ्कापुरत्वेनोक्तस्य चराचरजगद्रूपब्रह्माण्डस्य ब्रह्मार्पणमित्याद्युक्तक्रियाशक्तिस्वरूपेणाग्नेयेन दाह्यत्वमेवाभिमतं सर्वासूपनिषत्स्वित्यलमप्रस्तुतप्रसंगेन प्रकृतमेवानुसरावः ॥

३० कर्म—शतयोजनविस्तारे समुद्रे सेतुं बध्वा तेन तीर्त्वा सागरं लङ्कायान्निशाचरानवधीदिति वर्णनस्यान्तरार्थः कः ॥

सत्य—पुराणेषु पृथिव्यप्तेजोवाय्वाकाशाहन्तत्वमहत्तत्वाख्यसप्तप्रकृतय एव जम्ब्वादिसप्तद्वीपत्वेन वर्ण्यन्ते। मलिनचित्तैर्दुस्तरास्तदभिमाना एव लवणेक्षुसुरासर्पिर्दधिक्षीरोदकार्णवत्वेन वर्ण्यन्ते। अष्टमं प्रकृतितत्वमेव लोकालोकाचलत् परतस्तमोरूपेण वर्ण्यते। (अन्यथा सप्तसमुद्राणां लवणेक्षुसुरासर्पिर्दधिक्षीरशुद्धजलमयत्वं केनाभिप्रायेण वर्ण्यते। वदन्त्वार्याः।) भूमेर्लवणत्वं जलस्येक्षुरसत्वं अग्नेराग्नेयद्रव्यसुरात्वं शोषकस्य वायोराज्यत्वं विक्षेपात्मकाकाशस्य दधित्वं जगत्कारणाहन्तत्वस्य क्षीरत्वं शुद्धसात्वि-

करस्य महत्तत्त्वस्य शुद्धजलत्वं तमोरूपप्रकृतेस्तमस्त्वञ्च य-
ज्यते । तस्मात् प्रकृतिसप्तकमेव सप्तद्वीपसप्तसमुद्रा इत्या-
न्तरार्थस्समीचीनः । एवंविधान्तरार्थोऽस्माभिरश्रीमद्भागवता-
न्तरार्थे क्षीराब्धिमथननिरूपणे स्पष्टमुक्त एव । अत्र तु पृ-
थिवीतत्त्वाभिमान एव लवणोदधिः । पार्थिवस्य शरीरस्य
शतायुःपरिमितत्वात् दक्षिणगत्यन्तर्भूतत्वाच्च शतयोजनमा-
त्रे दक्षिणे लवणोदधौ सेतुबन्धनवर्णनं साध्वेव । (अन्य-
था लक्षयोजनविस्तारेण लवणोदधिना जम्बूद्वीपोयं सर्वतः
परिवेष्टित इति पञ्चमस्कन्धोक्तं कथं घटेत । भूगोलमिदमा-
काशे तिष्ठतीति सूर्यसिद्धान्ते गोलाध्याये स्पष्टमेवोक्तम् ।
अतो न घटतेव । किञ्च लक्षयोजनविस्तारे लवणोदधौ श-
तयोजनमात्रे लङ्केति वर्णने सा लङ्का त्रिकूटपर्वताग्रे स्थि-
तेति वर्णने च को वाभिप्रायः । अपि च क्षीराम्भोधिमध्य-
भाजि त्रिकूटे गजेन्द्रो नक्राक्रान्त इति स्पष्टमुक्तमष्टमस्क-
न्धे । गजेन्द्राश्रयस्त्रिकूटः लङ्काश्रयस्त्रिकूटश्च परस्परभिन्ना-
वुतैक एव पर्वतः । पर्वतस्य त्रिकूट इति नाम्नाभिप्रायः कः ।
पौराणिकैरार्यैर्वक्तव्यम् ।) सखे कर्मनिष्ठ त्रिगुणात्मकश्च-
राचरजगद्देह एव लङ्केति तुष्टो भव । सेतुबन्धनन्तु "मयो-
दितेष्ववहितस्स्वधर्मेषु मदाश्रयः । वर्णाश्रमकुलाचारमका-
मात्मा समाचरे"दिति भगवदुक्तवर्णाश्रमकुलाचारानिबन्धनमे-
वसेतुबन्धनम् । "एष सेतुर्विधरणमेषां लोकानामसम्भेदा-

ये" इति श्रुतेः। वर्णाश्रमकुलाचारानुष्ठानस्य देहाभिमाननिमित्तानां ब्रह्महत्यादीनां सर्वेषां पापानान्निश्शेषतया निवर्तकत्वात् सेतुस्नानेन सर्वपापनिवृत्तिरुपपन्नैव। (अपि सखे सेतुबन्धनस्यैवंविधार्थो न युज्यत एवेति चेत् "अबध्वा सागरे सेतुं घोरे च वरुणालये। लङ्का न मर्दितुं शक्या सेन्द्रैरपि सुरासुरैः।" इति समुद्रतरणमन्त्रणे सुग्रीवं प्रति विभीषणवाक्यमसाध्वेव। तदानीञ्जलयानाय नावस्सन्त्येव। चित्रकूटगमने भरतस्य सेनायाश्च गंगातरणाय पञ्चशतानां नावां घण्टालंकृतगजनौकायाश्च गुहेनानीतत्वात्। हनूमान् अन्यो वा मर्कट एकोत्पातेनायोध्यां गत्वा भरते निवेद्य शृंगिबेरपुरात् गुहेन नाव आनयेत् ताभिस्तरणे सुकरे सेतुं बध्वैव लंका मर्दितव्येति कोयमाग्रहो विभीषणस्य। वदन्तु पौराणिकाः।) सखे सेतुबन्धनमस्मदुक्तमेव। आर्यैरिदानीं रामेश्वरे यत् सेतुस्नानं क्रियते तदप्यान्तरार्थश्रद्धाजनकतयात्यन्तमावश्यकमेव। नो चेत् श्रद्धाशैथिल्येन निरीश्वरत्वापत्तेः। एवंविधं सेतुं बध्वा तीर्त्वा देहाभिमानं चराचरजगद्देहलङ्कास्थिता निशाचराः निष्कामकर्मशक्तिभिर्वानरैर्हन्तव्याः॥

३१ कर्म—लङ्कायां प्रासादाग्रस्थितस्य मकुटालंकृतस्य रावणस्य दर्शनेन कुपितो वानरराजस्सुग्रीवस्सुवेलाग्रादेकोत्पातेन दशास्योरसि पतित्वा तन्मकुटमपाहरदि·

ति विचित्रं वर्ण्यते । मकुटपातनस्यान्तरार्थः कः ॥

सत्य—लङ्काधिपोऽयन्दशमुखो लोकोत्तरगुणशाली भाग्यत्र निन्द्रादिदेवानपि शासितुं शक्तो महाभाग एवेत्यत्र न कोपि विशयलेशः । तथापि एकमेवाद्वितीयं ब्रह्मेत्यादि-श्रुतिप्रतिपादितस्य देवानां पूर्ण्याद्याति श्रुतिनिके अद्वैतब्र-ह्मननायैव सृष्टे समष्टिदेहायोध्यापुरे कृतावतारस्य दाश-रथेर्व्यष्टिदेहदण्डकेष प्रविष्टस्य परमात्मनश्श्रीरामस्य प्राण-प्रियां सत्त्वरूपिणीं वैदेहीं मुक्तिलक्ष्मीं प्रलोभ्य चराचर-चरजगद्देहलङ्कापुरमानिन्ये इति यत स एवास्य बलवान-धर्म एकः । अयमधर्म एव नाशहेतुरस्येति सुन्दरकाण्डे "बभूव बुद्धिस्तु हरीश्वरस्य यदीदृशी राघवधर्मपत्नी । इमा यथा राक्षसराजभार्या सुजातमस्येति हि साधुबुद्धेः । पुनश्च सोऽचिन्तयदार्तरूपो ध्रुवं विशिष्टा गुणतो हि सीता । अ-थायमस्यां कृतवान्महात्मा लंकेश्वरः कष्टमनार्यकर्म ।" इ-ति । "अहो रूपमहो धैर्यमहो सत्त्वमहो द्युतिः । अहो रा-क्षसराजस्य सर्वलक्षणयुक्तता । यद्यधर्मो न बलवान् स्या-दयं राक्षसेश्वरः । स्यादयं सुरलोकस्य सशक्रस्यापि रक्षिता" इति च हनूमद्वचनैरेव विशदयते । एतादृशाधर्माभिनिवे-शेन वैदेहीदूषणप्रवृत्तस्य दशमुखस्य तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा । इति "संसर्गो वा विशिष्टो वा वा-क्यार्थो नात्र युज्यते । अखण्डैकरसत्वेन वाक्यार्थो विदु-

षां मतः।" इति च प्रमाणमपहाय चिदचिद्विशिष्टत्वेन महावाक्यार्थकल्पनं यत् तदेव मणिमयकिरीटत्वेनोक्तम्। "स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः।" इति श्रुत्यर्थविचारवता श्रीरामवयस्येन निष्कामकर्मरूपवानरराजेन सुग्रीवेण तदेव मकुटमधःपातितं चटचटप्रहारझर्झरीकृतम्॥

३२ कर्म—रावणस्यानुजः कुम्भकर्णनामा निशाचरः कः। अयं सदा शयालुरप्येकस्मिन् दिने प्रबुद्धो भवेत्। यस्मिन् दिने प्रबुद्धस्तस्मिन् दिने सर्वानपि तापयेदेव॥

सत्य—रामायणान्तरार्थविचारे लङ्कापतेर्दशमुखस्यार्थविवरणेऽप्यभीतानामस्माकं कुम्भकर्णस्यार्थविवरणे को वा भयावकाशः। अयं सर्वैरपि गुणशीलाचारादिभिरग्रजसमान एव। चराचरात्मकमिदञ्जगत्सर्वं सत्यमेवेति स्थूलप्रपञ्चसत्यत्वाभिनिवेशवशंवदत्वादतिस्थूलकाय इत्युच्यते। पञ्चविधभेदभिन्ना देवासुरमनुष्यपशुपक्षिमृगादयो जीवास्स्वपुण्यार्जितसत्कर्मपरिपाके भगवल्लोके स्वस्वरूपेण सुखमनुभवन्तो वर्तेरन्। अयमेव मोक्षः। द्वैतप्रपञ्चस्य सत्यत्वादद्वैतमिति किमपि नास्त्येव। अद्वैतवादिनां पाषण्डित्वात्तैस्सह वासोऽपि न समुचित इत्यभिमान एव कुम्भकर्ण इत्यस्मिन्नादिकाव्ये वर्ण्यते। सा निशा पश्यतो मुनेरिति भगवदुक्तनिशायां द्वैतनिष्ठायामेव सदा स्थितत्वात् सदा निद्राल-

रयमिति वर्ण्यते। द्वैतप्रपञ्चकर्ता कश्चिदीश्वरोऽस्तीत्यपि सद्भावात् सदा निद्रालुरप्ययं षण्मासान्ते एकस्मिन् दिने प्रबुद्धो भवेदिति वर्ण्यते। प्रबुद्धोयं हि तापत्रयं खलु ज्ञानात् स्वबलाग्निना द्वादशसंवत्सरात्मककालहरणभीत इव। हन्त हन्त किं बहुनोक्तेन द्वैतप्रपञ्चसत्यत्वाभिमानात् "श्रोतव्यादीनि राजेन्द्र नृणां सन्ति सहस्रशः। अपश्यतामात्मतत्वं गृहेषु गृहमेधिना"मिति श्रीमद्भागवते द्वितीयस्कन्धे श्रीशुकवचनरीत्या श्रोतव्यत्वेन भीतस्तैस्तैर्द्वैतप्रपञ्चविषयैः पुनः पुनश्श्रुतैरप्यस्य कर्णौ कुम्भवद्दृष्पूरावेव। अतोऽस्य कुम्भकर्ण इति सार्थकमेवाभिधानम्। भगवतो नारायणस्यादिपुरुषस्य तेजस्त्वेन द्वादशारेण कालचक्रेण सदा सन्तप्यमानमिमं जनं स्वयमपि तापयन्तं स्वाग्रजस्य दशमस्वस्य नियोगेन युद्ध्यन्तं निष्कामकर्मरूपवानरान् भक्षयन्तं श्रीमदद्वैतश्रीरामसखेन वानरराजेन हृतनासिकाकर्णत्वात् शोणितं बहु विक्षरन्तं स्वसमीपमागच्छन्तमेनं कुम्भकर्णममारयदद्वैतः परमात्मा महाप्रभुश्श्रीरामः॥

३३ कर्म—लङ्कापतेर्दशमुखस्य पट्टमहिष्यां मयसुतायां मन्दोदर्यां मेघनादनामा पुत्रोऽतिशूर इति वर्ण्यते। अयमेवेन्द्रजिदिति प्रसिद्धो मायाविनां मुख्यः। जेतुमशक्यमप्येनं हनूमद्विभीषणसहायबलात् सौमित्रिरजयत् खलु। आन्तरार्थे कोयमिन्द्रजित्? ॥

सत्य—"आनन्दो ब्रह्मेति व्यजाना"दिति। "एतस्यैवानन्दस्यान्यानि। भूतानि मात्रामुपजीवन्ती"ति। "विज्ञानमानन्दं ब्रह्मे"ति च श्रुतिप्रमाणैस्सर्वानन्दकरे प्रत्यगभिन्ने ब्रह्मण्यद्वैते श्रीरामे सर्वदा विमुखस्य दशमुखस्य सुखं चराचरजगद्देहान्तरेव वर्तते। मास्त्वद्वैते सुखं किन्त "सुखमद्वैतमेव हि।" इति। सुखमस्यात्मनो रूपं सर्वेहोपरतिर्हि तत" इति च प्रमाणप्रतिपादिताद्वैतसुखे विचार्यमाणे कियन्मात्रमिदञ्चराचरजगद्देहोदरस्थं सुखं मन्दमेवेति वक्तव्यम्। तदपि मायामयत्वात्तुच्छमेव। एतदेवाभिप्रेत्य सुन्दरकाण्डे "यथा मत्तश्च मातङ्गश्शशाश्च सहितौ वने। तथा द्विरदवद्रामस्त्वं नीच शशवत् स्मृतः। स त्वमिक्ष्वाकुनाथं वै क्षिपन्निह न लज्जसे" इति अद्वैतब्रह्मसत्तया सीतयाप्युक्तम्। एवंविधमद्वैतानन्दमीषदप्यजानतो दशमुखस्य चराचरजगद्देहोदरस्थसुखवृत्तिरेव मयसुता मन्दोदरी पट्टमहिषीति वल्मीकादवतीर्णैरादिकविभिर्वर्ण्यते। चराचरजगद्देहोदरस्थसुखमेव मण्डवत् पेयमित्यभिमानात् मण्डोदरीति वा पाठः। एतादृशचराचरजगद्देहविशिष्टत्वसाक्षात्कारसुखं विना किमिदं सुखमद्वैते शून्यत्वे इति निश्चित्य केन प्रमाणेन सिध्यति युष्मदभिमतमद्वैतमिति मेघवन्नदन् अभिमान एव मेघनादनामा दशास्यतनयः। अयि सखे इद्धातोः परमेश्वरवाचकत्वादद्वैतस्य परमात्मनो वाचकः प्र-

णव एवेन्द्रशब्देनोच्यते "स मेन्द्रो मेधया स्पृणोत्वि"ति श्रुतिवाक्यस्थेन्द्रशब्दस्य भाष्यकारैराचार्यैः प्रणव इत्यर्थोऽभिहितः। तथाविधन्निर्गुणब्रह्मवाचकं प्रणवमिन्द्रं देहविशिष्टतत्वबाचकप्रतिपादनयुद्धे जयतीन्द्रजिदेवायं मेघनादः। मायाविनो मयस्य दुहितरि मन्दोदर्याञ्जातमेनन्दुष्टं हन्तुमहं ब्रह्मास्मीत्यपरोक्षानुभवात्मकसंकर्षणावतारो रामानुज एव शक्तः। इन्द्रजिद्धनने ब्रह्मार्पणं ब्रह्महविरित्यादिक्रियाशक्तिरूपेण रामानुजं वहता हनूमता इन्द्रजितपितृव्येन परमभागवतेन विभीषणेन च साहाय्ये वर्तितव्यमेवेति श्रुत्यभिप्रायः॥

३४ कर्म—अयमिन्द्रजित पूर्वन्नागास्त्रैर्बबन्ध रामलक्ष्मणौ। तन्नागास्त्रबन्धनं गरुडेन निवृत्तम। पुनरप्ययं सर्वानपि वानरान् दाशरथी च ब्रह्मास्त्रेण बबन्ध। तत बन्धनञ्च हनूमदानीतसञ्जीवनौषधेन निरस्तमिति वर्णने कथान्तरार्थः॥

सत्य—अद्वैतमसिद्धमिति मेघवन्नदन्नयं मन्दोदरीपुत्रः जीवोपाधेरहङ्कारस्य प्रतिशरीरं भिन्नत्वात्तदुपाधिका जीवा अपि प्रतिशरीरं भिन्ना एव। एवञ्च कथमद्वैतसिद्धिरिति गर्ज्जन् प्रत्यक्ब्रह्मणी रामलक्ष्मणौ जीवोपाधिभिरहङ्कारैर्बबन्ध। अत्र जीवोपाधयोऽहंकारा एव नागपाशत्वेन वर्ण्यन्ते। (अन्यथा साक्षात भुजगशायिनो नारायणस्य ततप-

थकस्यादिशेषस्य च कथन्नागास्त्रबन्धनं घटेत। वदन्त्वार्याः) अतो नागास्त्रबन्धनं जीवोपाधिबन्धनमेव। जीवोपाधीनामहङ्काराणान्निवारणे वेद एव शक्तः। तस्य प्रत्यगभिन्नब्रह्मप्रतिपादकत्वात्। अयि सखे कर्मनिष्ठ वेद एव गरुड इति प्रमाणासिद्धत्वात् गरुडेन नागपाशनिवृत्तिरुपपन्नैव। (एवंविधान्तरार्थामात्रे "महत्तत्वाद्विकुर्वाणादहन्तत्वमजायत। वैकारिकस्तैजसश्च तामसश्चेत्यहन्त्रिधा। सहस्रशिरसन्देवं यमनन्तं प्रचक्षते।" इत्यादिप्रमाणैरहन्तत्वस्यादिशेषस्यफणिरूपत्वत्वर्णने तस्य भगवच्छयनत्ववर्णने च को वाभिप्रायः वदन्त्वार्याः।) अतस्साक्षाज्जगत्कारणाहंकार एवादिशेषस्संकर्षणस्सहस्रफणामणिमण्डलमण्डितः। महत्तत्वोपाधिकस्य चित्ताधिष्ठातृवासुदेवस्य कारणत्वेनाहन्तत्वान्तर्गतत्वात् भुजगशायित्ववर्णनमपि युक्तमेव वासुकितक्षककार्कोटककालियादयो नागास्त्वहंकारावान्तरभेदा एव। "देहेन वै भोगवता शयानो बहुचिन्तया। सर्गेनुपचिते क्रोधादुत्ससर्ज्ज हि तद्वपुः। येऽहीयन्तामुतः केशा अहयस्तेंग जज्ञिरे। सर्प्पाः प्रसर्प्पतः क्रूरा नागा भोगोरुकन्धराः।" इत्यादिप्रमाणैर्देहाहङ्कारा एव क्रोधात्मना परिणतास्सर्पा इत्युच्यन्ते। अतो नागास्त्रबन्धनं नामाहङ्कारबन्धनमेवेत्यत्र न कापि संशयकणिका। ब्रह्मास्त्रबन्धनन्तु शब्दब्रह्मणो वेदस्य चराचरजगद्देहान्तर्गतकर्मतत्फलप्रतिपादकत्वात् च-

राचरजगतो भगवद्देहत्वेन सत्यत्वाच्च कथं वेदस्य प्रत्यग भिन्नब्रह्मप्रतिपादकत्वमुच्यते । प्रत्यक्ब्रह्मणी रामलक्ष्मणौ निष्कामकर्मशक्तयो वानराश्च हता एवेति गर्ज्जन् अयमिन्द्राजित् ब्रह्मणा वेदेन ब्रह्मास्त्रेण बबन्ध सर्वान्मेघवन्नानद्यमानः । जडस्य सर्वस्य जगतश्चिद्रूपेण जीवनहेतुरद्वैतं ब्रह्मैव तत ब्रह्मैव सञ्जीविनी । अतश्चिद्रूपिण्या सञ्जीविन्या ब्रह्मार्पणक्रियाशक्तिरूपाञ्जनेयानीतया ब्रह्मास्त्रबन्धनमपि निरस्तम् । एवञ्च नष्टसाधनकदम्बन्दशाननतनयन्दुष्टमिन्द्रजितं द्रष्टृदृश्यावेकीकृत्य प्रत्यग्रूपे स्वस्मिन् सम्यक् कर्षतीति संकर्षणाख्यो लक्ष्मणः पौलस्त्यस्य विभीषणस्य सहायेनावधीत ॥

३५ कर्म—अयं विभीषणः कः? ज्येष्ठस्य पुत्रं कथममारयत् "बन्धुर्वधार्हदोषोऽपि न बन्धोर्वधमर्हति । त्याज्यस्स्वेनैव दोषेण हतः किं हन्यते पुनः । " इतिप्रमाणपर्यालोचने विभीषणकृत्यमनुचितमेव । इमं विभीषणन्दाशरथिराचन्द्रार्कमभ्यषिञ्चत् खलु लङ्काराज्ये । "चतुर्भिर्मन्त्रिभिस्सार्द्धमुत्पपात विहायस"मित्युक्तम् । तन्मन्त्रिणश्चत्वारः के । सखे सत्यनिष्ठ विभीषणस्य विवरणनाप्यानन्दय माम्.

सत्य—अनारतं क्रियमाणे कर्मणिहोमधूमावृतशरीरस्त्वं तम एवेतीदानीं विशदायते । यतो रामायणान्तरार्थश्रवणे श्रद्धालुरसि । मदुच्यमानोयमान्तरार्थो वीणावाद-

नकुशलानां शह्नादिहाक्रझंझेटी तिंगणालापपूर्वकं कोकिल-वद्रामायणं गायतां तन्त्रीप्रोतकाञ्चनमणिचालन एव दत्तचि-त्तानां केषांचिदार्याणां न रोचतैव मनसे । तथापि त्वत्ता-पाक्रृत्यै विवृणोमि किमीयणं तन्त्रिकाश्च चतुरो चतुरोपि वीणावादने । अयं विभीषणो रावणानुजो राक्षसोपि श्रीरा-मभक्त एवेति विदितमेव विश्वेषाम् । सर्वे समाहितचित्त-श्शृणु । सुपुत्रिनमध्ये साधनं विनैव स्वप्रकाशनयानुभूयसा-नमद्वैतब्रह्मानन्दं श्रवियुक्त्यनुभवैरुपपाद्य "ब्रह्मानन्दे सु-निकटे सिद्धे सत्यन्यत्र श्रूयत" इति । अन्यदा जाग्रत्स्व-प्नयोरपि ब्रह्मानन्दं प्रतिपादयामि शृण्विति प्रतिज्ञापूर्वकं चराचरजगद्देहेपि श्रीरामभजनरूपमद्वैतब्रह्मानन्दमाचार्यैः प्रतिपादितं चराचरजगद्देहलङ्कास्थितोपि यः कृतपुण्यपुञ्ज-स्सदानन्दति जीव मकम्प एव रावणानुजो लङ्कास्थितो विभीषणो नाम निशाचर इत्यस्मिन्नादिकाव्ये गम्भीराभि-प्राये वल्मीकिनिर्गतैरादिकविभिर्वर्ण्यते । प्रवृत्तनिवृत्तयोः प्र-वृत्तस्य प्राथमिकत्वात् प्रवृत्तयोर्देहविशिष्टयोर्दशाननकुम्भ-कर्णयोर्ज्येष्ठत्वं निरञ्जनं निरवयवं ब्रह्माद्वैतं श्रीरामं भजतो विभीषणस्य तु निवृत्तत्वात् कानिष्ठ्यं युक्तमेव । वेदान्त-शास्त्राभिप्रायात् । निर्गुणोपासकानां परमभागवतानां श्री-रामभक्तानां चराचरजगद्देहलङ्कास्थितत्वेपि तद्धर्मायोगः त-द्यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवंविदि पापक-

र्मं न श्लिष्यते इति श्रुत्यैवोक्तः। अतः प्रळयपर्यन्तं लङ्का-पतिर्भवेति श्रीरामेणाभिषिक्तोयं विभीषण इति वर्णनं साध्वे-व। "नोद्विजेत जनाद्धीरो जनश्चोद्वेजयन्न तु।" इतिभ-क्तलक्षणस्योक्तत्वादस्य विभीषण इति नाम सार्थकमेव। अथ सखे एवंविधानाञ्जीवन्मुक्तानां परमभागवतानां वृत्ति-भेदेन ब्रह्मवित् ब्रह्मविद्वरः ब्रह्मविद्वर्यः ब्रह्मविद्वरिष्ठः इति चातुर्विध्यमुक्तमाचार्यैः। ते चत्वारो वृत्तिभेदा एव विभीष-णस्य चत्वारो मन्त्रिणः। (अन्यथा चतुर्भिर्मान्त्रिभिरिति स-चिवानां चतुस्संख्योपादाने कारणं किं वदन्त्वार्याः।) आ-यि कर्मनिष्ठ अयं विभीषणः प्रळयपर्यन्तं लङ्काराज्ये श्री-रामेणाभिषिक्तः खलु। दक्षिणे लवणाब्धौ शतयोजनात प-रं महानौकया सञ्चरद्भिरिदानीन्तनैः किमिति न दृश्यते। कलियुगे तिरोहितत्वादिति चेत् कलियुगे तिरोहितस्तिष्ठेति रामानुशासितः किमयम्। स्थूलदृष्टिभिर्न दृश्यते सूक्ष्मत्वा-दिति चेत् श्रीवाल्मीकिरामायणस्य सर्वोविदितार्थव्यतिरेके-ण सूक्ष्मार्थोस्तीति वक्तव्यमेव॥

३६ कर्म—इन्द्रजिन्मरणेन सन्तप्तो रावणश्श्रीरा-मात् भीतश्शरणमलभमानस्स्वस्य मूलबलत्वेन स्थितान् स-र्वानपि निशाचरानाहूय मैतेनं राममिति कोपादाज्ञान्ददौ। तच्च मूलबलं सागरोपममपारमभिमुखमायान्तं दृष्ट्वा भी-तान् सुग्रीवादीन्मा भैष्टेत्याश्वास्यालातचक्रप्रतिमं कण्डली-

भूतं कोदण्डमादाय स्वयमेक एव रणमध्ये तिष्ठन् मध्याह्ना-र्कवत् प्रतपन् यदा बाणमेकमुत्ससर्ज्ज तदा त्वं रामोऽहं रामस्सोऽयं रामस्तदिदं रामस्सर्वमपीदं राम इति परस्परप्रहारैर्नष्टे मूलबले विस्मितान् सुग्रीवादीन् विलोक्य "एतदस्त्रबलं लोके मम वा त्र्यम्बकस्य वे"त्युवाच भगवान् राम इति श्रोतृजनमनोरञ्जकं वर्ण्यते । को वान्तरार्थो मूलबलहनने ॥

सत्य—चराचरजगद्देहविशिष्टमेव तत्त्वं सर्वैरपि प्रमाणैरिसध्यति । न त्वेवाद्वैतन्तत्त्वं प्रमाणाभावादिति प्रलपन्दशमुखो लङ्केश्वरोऽयं सत्तारूपिणीं विदेहजां कैवल्यलक्ष्मीं देहविशिष्टत्वेन स्वायत्तीकर्तुमशक्नुवन् चराचरंजगद्देहलंकास्थितान् निशाचरान् सर्वदापि द्वैतस्थितं अतिस्थूलकायं कुम्भवद्दुष्पूरकर्णं परदेहन्तापयन्तं स्वानुजं कुम्भकर्णं अद्वैतमिति किमपि नास्त्येवेति मेघवन्नदन्तम्मन्दोदरीजातं स्वतनयमिन्द्रजितञ्च सर्वानन्दकोणाद्वैतपरमात्मना दाशरथिना हतान् दृष्ट्वा क्रोधावेशवशंवदस्सन् किमिदमद्वैतमित्युच्यते चतुरशीतिलक्षभेदभिन्ना देवमनुष्यतिर्यगादयो जीवा न सन्ति किं तत्क्रियमाणानि कर्माणि तत्फलभूतास्स्वर्गादिलोकाश्च तत्प्रतिपादकानि शास्त्राणि च क्षीराब्धिर्मेरुरुर्वीत्यादिकञ्च न सन्ति किं हा हा "अद्वैतवादिषु दुरुक्तिखलेषु मोहात् संघट्टितापि घटते न मदीयबुद्धिः

नागेन्द्रभोगपरिशोभितचक्रपाणेर्नित्यस्य नाशकथनात् सुगतायितेषु । ” इति गर्जन् स्वकीयमूलबलेन विथं पूर्वोक्तं सर्वमप्याहूय ध्नतैनमद्वैतं रामामित्यचोदयच्चतुर्दशप्रश्नं यत्रकुत्रचित् कोणे तूष्णीन्तिष्ठति मां प्रति त्वमिव । तदा चाद्वैतः परमात्मा दाशरथिर्महाप्रभुर्द्धनर्हि तत्र प्रणवं पठन्तीति प्रमाणप्रतिपादितं दह्नाग्निनागस्त्येन दत्तं कोदण्डं पाणावादाय सर्वं खल्विदं ब्रह्म “नेह नानास्ति किञ्चन । मृत्योस्स मृत्युमाप्नोति । य इह नानेव पश्यति । ” इत्यादिश्रुत्या सत्वं रजस्तम इति त्रिवृदेकमादौ सूत्रं महानहमिति प्रवदन्ति जीवम् । ज्ञानक्रियार्थफलरूपतयोरुशक्ति ब्रह्मैव भाति सदसच्च तयोः परं यदित्यादिस्मृत्या च प्रतिपादितं रामबाणमेकं तूणीरादादाय यदोत्ससर्ज निशाचरेषु तदा हन्त हन्त मूलबलस्यावस्थेदृशीति वक्तुं को वा शक्नुयान्न । आचार्याख्याधरस्थारणिसमनुमिळच्छिष्यरूपोत्तरारण्यविधोद्भासितेन स्फुटतरपरिबोधाग्निना दह्यमाने । कर्माळीवासनाततकृततनुभवनभ्रान्तिकान्तारपूरे दाह्याभावेन विद्याशिखिनि च विरते त्वन्मयी खल्ववस्था । ” इतिपरमभागवतैर्नारायणभट्टाख्यैर्विद्वन्मणिभिरुक्तन्यायेन त्वमहं रामस्सोयं रामस्तदिदं राम इति सर्वमपीदं जगदद्वैते ब्रह्मणि जलाकाराकारितलवणवल्लयमाप । सखे कर्मनिष्ठ तवाक्षेपरूपचतुर्दशप्रश्नस्थानेनैवोत्तरमुक्तमिति जानीहि । एतादृश मूलबल-

युद्धस्यान्तरार्थं अन्तर्वाणयोपि किमेति न जानन्तीति वि- षीदामितमाम। मूलबलनाशं दृष्ट्वा विस्मितान् सुग्रीवा- दीन् प्रति एतदस्त्रबलं लोके मम वा त्र्यम्बकस्य वेत्यवा- च भगवानद्वैतश्श्रीरामः। श्रीरामसदाशिवयोरभेदात् सम्य- गेव दाशरथिनोक्तम॥

३७ कर्म—"गगनं गगनाकारं सागरस्सागरोपमः। रामरावणयोर्युद्धं रामरावणयोरिव।" इतिवर्ण्यमानस्य रा- मरावणयुद्धस्यान्तरार्थः कः॥ वद सखे वेदान्तार्थान- सारेण॥

सत्य—स्वप्रयुक्ते सर्वस्मिन्नपि मूलबले नष्टे सत्य- स्याद्वैतस्य परमात्मनश्श्रीरामस्य विजयेन परितप्यमानोय- श्चराचरजगद्देहलङ्कापतिर्दशमुखः चराचरजगद्देहविशिष्टं त- त्त्वं उताद्वैतं तत्त्वं द्वयोरेकमेव भवतु द्वयोरवस्थितिः कथं घटेत? तस्मादरावणमरामं वा जगद्भवत्विति निश्चित्य यु- योधाद्वैतपरमात्मना श्रीरामेण। अत्र हि रामरावणयोर्युद्ध- वर्णनम्। अद्वैतः परात्मा श्रीरामो जयत्विति ब्रह्मार्पणक्रि- याशक्तिषु सुग्रीवादिवानरेषु देहविशिष्टोस्माकं स्वामी दश- मुखो जयत्विति निशाचरेषु च द्विधावस्थितेषु पश्यत्सु भ- गवतो नारायणस्य देहमिदं चराचरजगत् सत्यमेवेति वी रवादं वदतो लङ्कापतेः प्राकृतवैकृतोभयात्मकदशविधसृ ष्टिरूपमिदञ्जगन्मिथ्या प्रळये नाशदर्शनादिति वदन् चक

र्तास्य दशापि शिरांस्यद्वैतः परमात्मा दाशरथिः। दशविधसृष्टिरूपमिदञ्जगत् प्रळये नश्यदपि सृष्टिकाले पुनरप्युत्पत्तिदर्शनात् सत्यमेवेति लंकापतिर्वीरवादमकरोत्तैरेवांकुराद्भिर्मुखैः। यदसद्भासमानन्तन्मिथ्या स्वप्नगजादिवदिति वदन् पुनरपि चकर्तास्य शिरांसि लङ्कापतेः परमात्मा श्रीरामः। जगतोसत्यत्वे श्रुत्यादिप्रमाणानामप्यसत्वात् केन प्रमाणेन सिध्यत्यद्वैतं रे रे हतोसीति पुनरप्यंकुरद्भिश्शिरोभिर्भत्सयामास दशाननः। "किम्मानमिति चेन्नास्ति मानाकांक्षा स्वयम्प्रभे" इति वदन् पुनरपि चकर्तास्य शिरांसि रामः। स्वप्रभत्वेपि किं मानं वद रामेतितर्ज्जयतोस्यांकुरितानि दशापि शिरांसि। सखे कर्मनिष्ठ एवंविधं रामरावणयुद्धं महात्मभिर्बहुधा वर्णितम्। तथा हि। "अद्वैदीरितवीरवादमहरद्रामो यदस्त्रैः क्षणात्तैरेवांकरता मुखेन जगदे शेषञ्च लङ्कापतेः। साम्ये सत्यपि चातगीभिरुभयोर्द्वौनुष्कमायाविनोर्विच्छिन्नाननदर्शनैस्समभवल्लीला रणे रावणे।" इतिवर्णयद्भिः कविभिः रामरावणयुद्धस्यान्तरार्थो ज्ञातः किमज्ञातो वेति को वेद हृदयं महात्मनाम्। सखे किं बहुना अद्वैतं शून्यतत्वमेवेति लोकान् रावयतोस्य रावणस्य लङ्कापतेश्शिरःखण्डनेनावध्यत्वमालोच्य "स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः।" इत्यादिश्रुतिप्रमाणज्ञानता दहाग्निरूपेण वातापिमर्दनेन भगवता सर्वदा-

हृकेनागस्त्येनोपदिष्टादित्यहृदयमन्त्रबलात्तस्य लङ्कापतेर्हृदयं भित्वा जयमवाप भगवानद्वैतः परमात्मा वैदेहीपतिः। रावणहृदयविदारणविवरणं श्रीरामभक्तैरेव ज्ञेयम्। गुरुं प्रकाशयेद्धीमान् न तु मन्त्रं प्रकाशयेत् इति प्रमाणं परमहंसकोट्यारूढनिजानन्दस्वामिगुरुशासनञ्चानुस्मृत्यात्र रावणहृदयविदारणविवरणाद्विरमामः॥

३८ कर्म—रावणवधानन्तरमग्निप्रवेशशुद्धया सीतया समेतस्सानुजस्सर्वैर्भक्तजनैस्सहायोध्यां प्रविष्टोऽभिषिक्तस्सर्वानानन्दयामासेति वर्ण्यमानस्य श्रीरामपट्टाभिषेकस्यान्तरार्थः कः॥

सत्य—अद्वैततत्वस्थापनायैव चतुर्विंशतितत्वरूपया स्वाभिन्नया शक्त्या चराचरजगद्रूपब्रह्माण्डायोध्यापुरीन्निर्माय तस्यां श्रीरामरूपेणावतीर्णस्साक्षादद्वैतः परमात्मा श्रुतिस्मृतिपुराणेतिहासादिप्रमाणसिद्धाद्वैतपरिपन्थिनो निशाचरान् हत्वा तादृशपरिपन्थिनिशाचरवशगतां सत्तारूपिणीं विदेहकैवल्यलक्ष्मीं प्रत्यगभिन्नब्रह्मज्ञानाग्निप्रवेशशुद्धां स्वीकृत्य तया विराजमानो महावाक्यार्थविचारजन्याखण्डाकारान्तःकरणवृत्तिज्ञानरूपवसिष्ठादिगुरुभिः पट्टाभिषिक्तस्सर्वोपनिषत्सिद्धान्तपारं गतैः परमाचार्यैस्संसेव्यमानपादांबुजस्स्वस्वरूपाद्वैतानन्देन सर्वानानन्दयन् सीतापतिर्जयति लोकमलग्नकीर्तिः। इतिवल्मीकादवतीर्णैः प्रत्यक्कनि-

ष्ठैः प्राचेतसैराचार्यैर्विरचितमिदमादिकाव्यं चरिभत्यन्तरार्थमद्वैतानुगतम् । (एवंविधान्तरार्थाभावे श्रीमद्भागवते एकादशस्कन्धे तुरीयाध्याये वसुदेवनारदसंवादे ऐक्ष्वाकं निमिनृपं प्रति नवयोगिष्वन्यतमेन जायन्तेयेन द्रमिळेन सीतापतिर्ज्जयति लोकमलघ्नकीर्तिरिति वर्तमानकालेना लट्क्रिया प्रयुक्ता कथं घटेत । तदानीं श्रीरामस्य राज्यभरणकाल इति श्रीधरस्वामिनोक्तमिति चेत् निमिनृपश्रीरामयोर्बहुकालव्यत्यासात्तदपि कथं घटेत वदन्त्वार्याः ।) अयि सखे ब्रह्माण्डायोध्यायामवतीर्णस्याद्वैतस्य परमात्मनश्श्रीरामस्येदानीमपि राज्यभरणकाल एवेति तुष्टो भव । एवंविधार्थानुसन्धानमार्याणामननुमतश्चेत् वाल्मीकिरामायणे भागवते भारते च बहुषु विषयेषु परस्परविरोधो दुष्परिहार्यः ॥

३९ कर्म—श्रीरामे राज्यं प्रशासत्ययोध्यायां कस्यचिद्विप्रस्य पुत्रे मृते किमिदमत्रमद्राज्ये विप्रपुत्रमरणमिति नगरपरीक्षार्थं सञ्चरन् श्रीरामः कञ्चिच्छूद्रं जम्बुकनामानं वृक्षे लम्बमानमधोमुखं धूमन्धयन्तं दृष्ट्वा तप्यन्तन्तं हत्वा ब्राह्मणपुत्रमजीवयदिति वर्ण्यमानस्यान्तरार्थः कः ?॥

सत्य—सखे ब्राह्मणपुत्रमरणे शूद्रस्य तप एव कारणम् । अत्र न संशयकणिकापि । यो वृक्षेधोमुखो धूमन्धयंस्तप्यति स एव शूद्रः । अत्रापि विशयलेशो नास्त्येव । तथा हि । आत्मप्रतिबिंब एव पुत्र इति विदितं खलु स-

वैषम्। समष्टिविग्रहायोध्यायां प्रतिबिंबरूपेणावतीर्णं सदद्वैतं ब्रह्मैव सर्वेषाम त्मा बिंबभूतः। पुत्रस्तु तत्प्रतिबिंबः। एवंविधस्य पितुः पुत्रस्य च ज्ञानं वेदज्ञानेनैव भाव्यम्। "पिता पुत्रेण पितृमान् योनियोनौ। नावेदविन्मनुते तं बृहन्तम्।" इति श्रुतेः। एवंविधज्ञानवानेव ब्राह्मणः। समष्टिदेहायोध्यायां प्रतिबिंबितमद्वैतं ब्रह्मैव श्रीराम इति ज्ञानवैकल्यमेव ब्राह्मणपुत्रमरणत्वेनोक्तमत्रोत्तरे रामायणे। एतादृशज्ञानवैकल्यकारणं शूद्रस्य तप एव। वृश्च्यत इति वृक्षो देहः। ब्रह्मविचारार्हे मानुषे देहे वर्तमानोप्यूर्ध्वे। सर्वोत्तरे ब्रह्मणि आभिमुख्यं विहाय जगदिदं सत्यमेवेत्यधोमुखस्सन् ऐहिकामुष्मिकभोगलम्पटो यस्तप्यति स एवाधोमुखो धूमं धयन् शूद्रः। शमदमादिब्राह्मणधर्माभावात्। धूमस्तु "धूमो रात्रिस्तथा कृष्णष्षण्मासा दक्षिणायन"मितिभगवद्वचनेन "मा वः पदव्यः पितरस्मदास्थिता या यज्ञशालासु च धूमवर्त्मभि"रिति दक्षं प्रति सतीदेवीवचनेन च ज्ञातव्यः। सखे श्मशाने चैतन्यहीनकुणपभक्षकजम्बुकवन्मायामयातितुच्छविषयभोक्तृत्वेन जम्बुक इति शूद्रस्य नाम युक्तमेव। जडातितुच्छविषयाभिमुख्येन जळात्मकशम्बूकवत् जडप्रायत्वात् शम्बूक इति वा शूद्रस्य नाम। एवंविधं शूद्रं हत्वा सर्वेषामयोध्यावासिनां जनानां स्वस्याद्वैतब्रह्मप्रतिबिंबत्वज्ञानं प्रवर्तयामास भगवान्दाशरथिः। (एवं-

विधात्र्थाभावे शूद्राणां तपश्चरणार्हताप्रसक्तिर्दुर्वारा। शूद्राणान्तपश्चरणानर्हतेष्टापत्तिरेवेति चेत् "तं होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति।" श्रुत्युक्ततपश्चरणप्राप्त्या ब्रह्मैवाहमित्यच्युततावाप्तिश्शूद्राणां कथमुक्ता भगवता वासुदेवेनोद्धवाय। "स्त्रियो वैश्यास्तथा शूद्रास्सन्ति ह्यच्युततां गताः" इति श्रीकृष्णवचनमनुपपन्नं किल। वदन्त्वन्तर्वाणय आर्याः) अयि कर्मनिष्ठ न ते वागनृता काव्ये काचिदत्र भविष्यतीति ब्रह्मणानुगृहीतानां वल्मीकादवतीर्णानामाचार्याणां न कापि वागनृतप्रपञ्चविषया भवेत्। अतस्सर्वमपि वाक्यमद्वैतब्रह्मप्रकाशकमेवेत्यत्रादिकाव्ये रामायणे सर्वमकळङ्कम्॥

४० कर्म—"यामेव रात्रिं शत्रुघ्नः पर्णशालां समाविशत्। तामेव रात्रिं सीतापि प्रसूता दारकद्वयम्।" इति वर्ण्यमानस्य कोऽभिप्रायः। अपि च सर्वावतारासाधारणतया सर्वैरपि भक्तजनैरयोध्यावासिभिश्च सहैव श्रीराममूर्तेर्वैकुण्ठारोहणं केनाभिप्रायेण वर्ण्यते॥

सत्य—सत्तारूपिणी विदेहकैवल्यश्रीर्यदा प्राचेतसपर्णकुटीमानन्दमयकोशगुहामद्वैतसिद्धये श्रीरामाज्ञया याता तदा अद्वैतपरब्रह्मणस्तेजस्त्वसुदर्शनावतारश्शत्रुघ्नोऽपि लवण इति व्यपादिश्यमानं पृथिव्यादिकं जगदिदं मिथ्येति विनाश्य मधुराख्यामानन्दमयीं पुरीं निर्माय स्वयमपि प्राचेत

सपर्णकुटीमानन्दमयकोशगुहां प्रविष्टस्सुषुप्तिसाक्षित्वेन स्थितः। तस्मिन् समये श्रीरामोप्यधोमुखस्य तपः कुर्वाणस्य शूद्रस्य शिरश्चिच्छेद। तदा प्राचेतसपर्णकुटीगुहायां स्थिता सीतापि पूर्वन्त्रयोदशविवरणे रामायणगायकत्वेनोक्तौ कुशलवौ पुत्रौ सुषुवे। सखे तपः कुर्वतोधोमुखस्य शूद्रस्य शिरश्छेदाभावे सीतापुत्रयोः कुशलवयोर्जनिः कथं भवेत्। सर्वोत्तरे ब्रह्मण्यद्वैते अनभिमुखः ऐहिकामुष्मिकभोगलम्पटतया प्रपञ्चाभिमुख एवाधोमुखश्शूद्रः खलु। तस्य शिरश्छेदानन्तरक्षणे ब्रह्मविचाराय कुशपाणिस्सन् गुरुसमीपं गच्छन् कुशः प्रपञ्चभोगोयं लव इति निश्चित्य ब्रह्माभ्यासाय गुरुसमीपं गच्छन् लवः तयोर्ज्जनिर्घटेत। तथैवोक्तं परमभागवतैर्महानुभावैः केरळीयैर्न्नारायणभट्टैः। "शत्रुघ्नेनार्दयित्वा लवणनिशिचरं प्रार्दयश्शूद्रपाशं तावद्वाल्मीकिगेहे कृतवसतिरुपासूत सीता सुतौ ते।" इति। (एवंविधान्तरार्थो नारायणभट्टैर्नैव चिन्तित इति चेत् अत्र पद्ये तावच्छब्दप्रयोगस्याभिप्रायं वदन्त्वार्याः।) एवं सत्तारूपिण्यां विदेहकैवल्यलक्ष्म्यामुत्पन्नौ वल्मीकादवतीर्णस्य परमगुरोश्शिष्यतां प्राप्तौ कुशलवौ परमानन्दाद्वैतप्रतिपादकरामायणगानेन परमहंसैर्मुनिभिरपि पूज्यमानौ समष्टिदेहायोध्यायां ब्रह्मविचाराख्याश्वमेधयज्ञमहामण्डपे अद्वैतपरमात्मनश्श्रीरामस्य सन्निधौ रामायणं सर्वानन्दकरमगायताम्। तद्गाना-

न्ते विदेहकैवल्यश्रीरपि भुवि सत्तायामेवान्तर्हिता। तदा समष्टिदेहायोध्यायामवतीर्णोऽद्वैतः परमात्मा श्रीरामोऽपि निश्शेषमक्तैर्योध्यावासिभिस्सहैव निर्गुणन्निरवयवं सच्चिदानन्दमद्वैतं स्वस्वरूपमेवाविशत्। स्वाभिन्नया शक्त्या स्वस्मिन् अध्यस्तं सर्वमपि जगत् स्वस्मिन्नेव प्रविलाप्याखण्डैकरसत्वेन प्रत्यगभिन्नब्रह्मात्मनावस्थानमेव श्रीरामस्य वैकुण्ठारोहणम्। अतोऽन्यावतारासाधारणतया सर्वैरयोध्यावासिभिस्सहैव श्रीरामस्य वैकुण्ठारोहणं वर्ण्यमानं साध्वेव। (अन्यथा सर्वावतारासाधारणतया श्रीरामवैकुण्ठारोहणस्याभिप्रायं वदन्तु पौराणिकाः।) सखे कर्मनिष्ठ स्वस्य वैकुण्ठारोहणं प्रति प्राजापत्येन कालपुरुषेण सह श्रीरामे मन्त्रयति सति स्वाज्ञामतिक्रम्यान्तःप्रविष्टेन लक्ष्मणेनावेदितं दुर्वाससं क्षुधितं मृष्टान्नेनाशयित्वा लक्ष्मणत्यागपूर्वकं सर्वैर्भक्तैस्सह वैकुण्ठमगादित्युक्तं खलु। अत्र दुर्वाससो मृष्टान्नदानं सद्य एव वैकुण्ठारोहणमिति वर्णने कोऽवाभिप्रायः। वैकुण्ठारोहणमन्त्रणकाले स मुनिरागतः। तस्मात्तं क्षुधितमन्नेन तर्पयित्वा वैकुण्ठमगाद्रामः। अयमेवाभिप्रायः न त्वन्योऽभिप्राय इत्येव वीणामंके निधाय गायतां पौराणिकानामन्ते गतिः। सखे दुर्वाससे मृष्टान्नदानन्नाम श्रीरुद्रकोपाय सर्वस्यापि जगतस्समर्पणमेव। सर्वथा रामायणमिदमादिकाव्यं अद्वैतस्थापकमेवेति सर्वमनवद्यम्॥

४१—कर्न—सखे सत्यनिष्ठ त्वया श्रमानेयं वाल्मीकिरामायणस्यान्तरार्थः वाचा केवलं सिध्यति । नत्वेव प्रमाणैः । अपि चाद्वैतस्थापकतया रामायणेस्मिन् क्वापि किञ्चिदपि नोक्तम् । अतोयमसाधुरेवान्तरार्थः ॥

सत्य—"वाचन्देवा उपजीवन्ति विश्वे । वाचं गन्धर्वाः पशवो मनुजाश्चान्यर्पिता" । इति श्रुतेः सर्वमपि वाचैव सिध्यति । किञ्च प्रमाणानामपि वाग्रूपत्वात् वाचा केवलं सिद्धिरसाध्वेव । अपि चात्राद्वैतस्थापकतया किञ्चिदपि नोक्तमिति यदुक्तन्तदसाधु । अत्रेदं चोद्योत्तरम् । चोद्यं "यश्च रामं न पश्येत्तु यञ्च रामो न पश्यति । निन्दितस्स भवेल्लोके स्वात्माप्येनं विगर्हते" । अयं श्लोकः कुत्र केनोक्तः । उत्तरम् । श्रीवाल्मीकिरामायणे अयोध्याकाण्डे श्रीरामस्य दण्डकारण्यप्रयाणे अयोध्यावासिभिरुक्तः । चोद्यम् । अस्यार्थः कः । उत्तरम् । यद्दृष्टिगोचरो रामो रामदृष्टिगोचरो यस्स एव कृतार्थः अन्यस्तु निन्दित आत्महन्ता चेत्यस्यार्थः । चोद्यम् । अर्थोयमयोध्यावासिषु केवलं सम्बध्यते उतेदानीमस्मास्वपि । उत्तरम् । कालत्रयेपि सर्वेष्वपि जनेषु सम्बध्यते । चोद्यम । श्रीरामस्यायोध्यावासिभिस्सहैव वैकुण्ठारूढत्वादिदानीं त्वं श्रीरामं पश्यसि किं न चेन्निन्दित आत्महन्ता च भव । उत्तरम । शिलालोहादिकृतबिंबरूपेणेदानीमपि श्रीरामं पश्याम्येव । चोद्यम । तर्ह्ययोध्यावासि-

नोपि श्रीरामे दण्डकान् गतेपि शिलालोहादिकृतबिंबरूपेण श्रीरामं पश्यन्तु तेषां प्रलापोनन्वित एव अपि च बिंबरूपेण वा रामं यो न पश्यति दुर्मतिः। निन्दितस्स भवेदित्यपि तत्रायोध्याकाण्डे वक्तव्यमेवादिकविना। उत्तरम्। तर्हि यश्च राममिति श्लोकोयन्तदानीमयोध्यावासिष्वेव सम्बध्यते। नत्वेवेदानीमस्मासु। चोद्यम्। हा हा। वृद्धिमिष्टवतोमूलमपि नष्टमितीरितम्। लौकिकं वचनं सार्थं सम्पन्नं त्वत्प्रसादतः। रामायणान्तरार्थनिषेधप्रवृत्तेन त्वया नास्मद्विषयो रामायणार्थ इति रामायणमेव निषिध्यते। उत्तरम्। किमनेन प्रलपनेन तव। श्रीरामं भजन्तः परमभागवतास्तमिदानीमपि पश्यन्त्येव। चोद्यम्। सखे मा कुप्य। सर्वैरयोध्यावासिभिस्सहैव श्रीरामस्यान्तर्हितत्वादिदानीन्तद्दर्शनं कथं घटेत। उत्तरम्। दशरथपुत्रस्य श्रीरामस्यान्तर्हितत्वेपि यो रामरूपेणावतीर्णस्स भगवान् भक्काननुगृह्णन् दिव्यमंगळदेहविशिष्टो वर्तते। तमिदानीमपि तद्भक्ताः पश्यन्त्येव। चोद्यम्। सखे मयि कृपां कुरु। स भगवान् कः। उत्तरम्। "पाताळमेतस्य हि पादमूलं पठन्ति पार्ष्णिप्रपदे रसातलम्"। इत्यादिना श्रीमद्भागवतशास्त्रे सहस्रशीर्षा पुरुष इत्यादिना पुरुषसूक्ते च प्रतिपादित एव। चोद्यम्। "जगृहे पौरुषं रूपं भगवान्महदादिभिः। सम्भूतं षोडशकलमादौ लोकसिसृक्षयेति" श्रीमद्भागवतवचनेनास्य भ-

गवद्रूपस्य महदादिभिः प्रकृतितत्त्वैर्विरचितत्वात् द्विपरार्द्ध्यातिक्रान्ते ब्रह्मणः प्रळये लीयमानत्वाच्च दिव्यमंगळदेहविशिष्टस्स भगवान् कुत्र वर्तते । ब्रूह्यनुगृहाण । उत्तरम् । तदानीमप्राकृतदिव्यवैष्णवलोके चतुर्बाह्वाद्यलंकृतदेहविशिष्टो वर्तते । चोद्यम् । तदानीन्तस्य भगवतो देहः महदादिभिः प्रकृतितत्त्वैर्विरचितपौरुषदेहवत् प्राकृतः किमुताप्राकृतः । सक्रोधमुत्तरम् । भगवन्तमजानता मोमुह्यमानेन तपतपेत्युक्तेन पुनर्ब्रह्मणा तपस्तप्त्वा दिव्यवर्षसहस्रान्ते दृष्टं दिव्यमंगळं भगवतो देहं प्राकृतमिति ब्रूषे । श्रीमद्भागवतगन्धेनापि विकलस्त्वं सम्भाषणानर्हः । चोद्यम् । सखे मा क्रुधः । पाताळमेतस्य हि पादमूलमित्यादिना श्रीमद्भागवतशास्त्रे प्रतिपादितो भगवान् दिव्यमंगळ एवेत्यत्र सन्देहः । "यो नादृतो नरकभाग्भिरसत्प्रसंगैरिति" ब्रह्मणैवोक्तत्वात् । महदादिभिः प्रकृतितत्त्वैर्विरचितस्य तद्देहस्य प्राकृतप्रळये लये सति अप्राकृतदिव्यवैष्णवलोके वर्तमानस्य भगवतो देहः कीदृशः । उत्तरम् । अप्राकृत एव । चोद्यम् । तस्मिन्नप्राकृते लोके तादृशाप्राकृतदेहविशिष्टं भगवन्तं ये पश्यन्ति ते प्राकृताः किमुताप्राकृताः । वद सखे । उत्तरम् । तं पश्यन्तोप्यप्राकृता एव । सहर्षं चोद्यम् । सखे त्वमतीव सन्निकृष्टोसि । त्वया वक्तव्यमल्पमेवावशिष्टम् । दिव्यवैष्णवलोकोप्यप्राकृतः । तत्र वसन् भगवानप्यप्राकृतः । तस्य

दिव्यमंगळदेहोऽप्यप्राकृतः । तत्र ये तं पश्यन्ति तेऽप्यप्राकृताः । सर्वोऽपि व्यवहारोऽप्राकृतः । एवञ्च सर्वस्याप्यप्राकृतत्वाभेदात् प्रकृतिसम्बन्धशून्यं निर्गुणन्निरवयवमद्वैतमिति भवता वक्तव्यम् । सखे कर्मनिष्ठ कर्माळीवासना ततकृततनुभुवनभ्रान्तिकान्तारमृगयार्थं धृतकिरातमूर्तेश्शङ्कराल्लब्धविजयाय त्रिलोकाधिपेन्द्रादिदेवोपभोग्यखाण्डववनदाहेन प्रत्यगभिन्नब्रह्मज्ञानाग्निबलदाय सत्त्वैकतानमनोबुद्ध्यहङ्कारचित्ताख्यश्वेतहयचतुष्टययुक्तदेहरथारूढाय ऐहिकामुष्मिकभोगरूपराष्ट्राणि सत्यान्येवेति यैर्धृतानि तेषां धार्तराष्ट्राणां हननार्थं ब्रह्मज्ञानाग्निदत्तगाण्डीवालंकृतपाणये प्रह्लादनारदजायन्तेयादिभिः प्रतिपादितं मोक्षलक्षणं भागवतं धर्मं स्वाग्रजं युधिष्ठिरमखण्डमण्डलाधिपत्ये स्थापयितुं बद्धकङ्कणायार्ज्जुनाय जीवाय "ज्ञेयं यत्तत् प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते । अनादिमत् परं ब्रह्म न सत्तन्नासदुच्यते । अविभक्तञ्च भूतेषु विभक्तमिव च स्थितम् । ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते" । इत्यादिवाक्यैर्वासुदेवेन परमगुरुणेश्वरेण प्रतिपादितमद्वैतं ब्रह्मैव शुद्धसात्विकसमष्टिविग्रहायोध्यायां श्रीराम इति प्रकाशतेतराम् । तादृशम्महाप्रभुमद्वैतं श्रीरामं यो न पश्यति न जानाति श्रीराम राम रामेति वाचापि न जपति तस्मिन्महद्भिरुक्तेऽपि ब्रह्मैवेति न विश्वसिति स स एव श्वविड्वराहोष्ट्रखरवन्निन्दितः आत्महन्ता चेति

यश्च राममित्ययं श्लोक एव वाल्मीकिरामायणस्याद्वैतप्रतिपादकमान्तरार्थं स्पष्टीकरोति ॥

४२ कर्म—सखे सत्यनिष्ठ रामायणस्यान्तरार्थं वदतस्तवाभिमते बाह्यार्थान्तरार्थयोरुभयोरपि सत्यत्वं किं वा बाह्यार्थस्य मिथ्यात्वम्। प्रथमे बाह्यार्थस्य सर्वविदितस्य सत्यत्वादान्तरार्थकथने विशेषप्रयोजनाभावः। द्वितीये पक्षे अयोध्यामिथिलाराज्यजनस्थानपञ्चवटीकिष्किन्धारामेश्वरसेतुबन्धादीनां प्रत्यक्षदृष्टत्वेन बाह्यार्थस्य मिथ्यात्वं न घटेतैव। किञ्च वाल्मीकिरामायणे वर्ण्यमानानां सर्वेषां विषयाणां आन्तरार्थकथनमशक्यमेव। अतस्तवान्तरार्थकथनमयुक्तमेव ॥

सत्य—"अकोविदः कोविदवादवादान् वदस्यथो नातिविदां वरिष्ठः। न सूरयो हि व्यवहारमेतं तत्वावमर्शेन सहामनन्ति। तथैव राजन्नुरुगार्हमेधवितानविद्योरुविजृम्भितेषु। न वेदवादेषु हि तत्ववादः प्रायेण शुद्धो न चकास्ति साधुः" अत्र द्वितीयपद्ये प्रायेणेति प्रायिकत्वग्रहणं परमार्थाद्वैतब्रह्मज्ञानाय चित्तशुद्ध्यापादकवेदोक्तकर्मपरम्। बुद्धे तत्वे तच्च हेयमिति श्रुत्यनुशासनम्। सखे कर्मनिष्ठ श्रीमद्भागवततात्पर्यगन्धोपि नाघ्रातस्त्वया। हन्तायमाक्षेप उत्सृष्टमृगशरीरं चरमशरीरेण विप्रत्वं गतं प्रपञ्चव्यवहारस्य सत्यताम्मन्वानाय सिन्धुसौवीरपतये रहूगणाय परमा

त्थैतत्त्वमुपदिशन्तं परमभागवतमार्षभं भरतं प्रति युक्तः । श्रीवाल्मीकिरामायणस्यान्तरंगं को वेद । मायामयस्य स्वप्नप्रायस्याद्वितीये ब्रह्मण्यध्यस्तस्य जगतस्सत्यतां मन्वानं तद्भोगाय कर्माणि कुर्वाणं त्वां बोधयितुमशक्यमेव । "रहूगणैतत्तपसा न याति न चेज्यया निर्वहणाद्गृहाद्वा । न च्छन्दसा नैव जलाग्निसूर्यैर्विना महत्पादरजोभिषेक"मिति तेनैव जायन्तेयेन भरतेनोक्तत्वात् । सखे आन्तरार्थावगमप्रयोजनाय पुरञ्जनोपाख्यानवद्बाह्यार्थमप्यंगीकरोमि । रामायणकर्तृभिः प्रत्यङ्निष्ठैराचार्यैरान्तरार्थस्फोरकनयैव बाह्यार्थस्य वर्णितत्वात् । आदिकाव्येस्मिन् ऋतुगिरिवननदीसमुद्रपुरवर्णनस्य श्रोतृजनमनोरञ्जकत्वात् सर्वविषयान्तरार्थो नापेक्ष्यः । आन्तरार्थमीषदप्यनदृत्य बाह्यार्थस्यैव सत्यत्वे भवादृशानामधिकाह्लादाय क्वाचित् क्वचित् किञ्चित् किञ्चिदपि रामायणे वक्तव्यम् । हन्त तद्विस्मृतं वाल्मीकिमहर्षिणा । तथा हि । प्ररूढगर्भाः पत्नीः प्रसमीक्ष्य राजा दशरथः कियत्पलमितं लशुनमानीतवानापणात् प्रसवौषधकृते । पिप्पलीश्च कियतीः । अथवा अग्रिमगर्भे सीमन्तानन्तरं प्रसवाय पितृगृहं गताः किं दशरथपत्न्यः कौसल्याद्याः । परमान्नप्राशनालाभाद्दुःखितानां शतत्रयशतार्द्धानां पत्नीनां नामानि कानि । तासां पितरः के । अपि च रामादीनां राजपुत्राणां विवाहे वरणमालानिक्षेपणाय भरतम-

से वोढुन्तन्मातुल आगत एव । यस्मिंस्तु दिवसे राजा चक्रे गोदानमंगळम् । तस्मिन्नेव दिने भरतमातुलो युधाजिदागत इति विशदमुक्तम् । श्रीरामन्त्वंसे वोढुं तन्मातुल आगतो वा न वेति न ज्ञायते । ननु कौसल्यासहोदरः किल कोसलपतिः स कोसलपतिर्दशरथो राममातुलोत्रास्त्येव । तर्हि राममातुलागमनं न वक्तव्यम् । दक्षिणोत्तरयोः प्रवृत्तिनिवृत्तिपरमर्थं अजानतां दक्षिणकोसलमुत्तरकोसलमिति राज्यद्वयं परस्परभिन्नमिति वदतामार्याणाम्मते राममातुलागमनं वक्तव्यमेव । लक्ष्मणशत्रुघ्नयोर्मातुलागमनं वक्तुं विस्मृतमेवादिकविना । हा हा बालस्य हि विनोदाय धात्री वक्ति शुभां कथाम् । इत्यादिवासिष्ठवचनगन्धमप्यनाघ्राय स्थूलप्रपञ्चसत्यतां मन्वानान् तद्विषयभोगलम्पटान् कश्मलविषयासक्तत्वेन श्वविड्वराहोष्ट्रखरैस्सम्मितान् पुरुषपशून् बोधयितुमशक्यमेवेति मन्वानोहमिदानीं वाल्मीकिरामायणान्तरार्थविवेचनादुपरम्य श्रीराम जय राम जय जय राम रामेति भजे दाशरथिं परमात्मानं भगवन्तमद्वैतम् ॥

४३ कर्म—सखे सत्यनिष्ठ अनवसितार्थपरिपाटीभिरनार्थिकाभिर्वाग्भिर्गुम्भितेस्मिन् वाल्मीकिरामायणान्तरार्थे प्रयोजनं किम् । प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तते । तस्मात् द्वैतविशिष्टाद्वैतमतनिन्दनं सकामकर्मपराणामार्याणान्निन्दनञ्च प्रयोजनमिति सुस्पष्टं भाति । "परस्वभावक

र्माणि न प्रशंसेन्न गर्हयेत्। विश्वमेकात्मकं पश्यन् प्रकृत्या 'पुरुषेण चे"ति एकादशस्कन्धे उद्धवं प्रति भगवद्वचनं जानतस्सत्यनिष्ठस्य तवेदमनुचितमेव ॥

सत्य—सखे कर्मनिष्ठ तवेममुपदेशं शिरसा वहंस्तुष्यामि.। द्वैतविशिष्टाद्वैतमतनिन्दनं सकामकर्मपराणां केषाञ्चिदार्याणान्निन्दनञ्च प्रयोजनमिति यत्त्वदुक्तं तन्न। प्रयोजनन्तु वाल्मीकिरामायणस्याद्वैतप्रतिपादकतया सहृदयहृदयाह्लादक आन्तरार्थोस्तीति मामकीनचित्ततोषणमेव। न त्वेव द्वैतविशिष्टाद्वैतमतनिन्दनं सकामकर्मपराणां केषाञ्चिदार्याणां निन्दनं वा। द्वैतविशिष्टाद्वैतमतयोरप्यस्माभिः परमार्थाद्वैततत्वज्ञानसाधनत्वेनांगीकृतत्वात्। "कर्मण्येवाधिकारस्ते मा फलेषु कदाचने" ति भगवदुक्तप्रकारेण वेदोक्तनिष्कामकर्मानुष्ठाने रुचिजनकतया सकामकर्मणोप्यस्माभिरंगीकृतत्वाच्च। किञ्च वाल्मीकिरामायणान्तरार्थविवरणे अद्वैतप्रतियोगिकद्वैतविशिष्टाद्वैतमतनिन्दनं सकामकर्मपराणां केषाञ्चिदार्याणान्निन्दनञ्च प्रसज्येते। तन्निन्दनात्मको दोषो मयि नारोप्यः। किन्तु "अवज्ञातं सदद्वैतं निश्शंकैरन्यवादिभिः। एवं का क्षतिरस्माकं तद्वैतमवजानतां। द्वैतावज्ञा सुस्थिता चेदद्वैता धी स्थिरा भवेत्। स्थैर्ये तस्याः पुमानेष जीवन्मुक्त इतीर्यते"। इति वदत्सु भारतीतीर्थविद्यारण्याभिधाचार्येषु "पुमांसापैति यत् गत्वा बिलस्वर्गं गतो यथा।

प्रत्यग्धामाविद इह किमसत्कर्मभिर्भवेत्” । इति । “हे लोका? विष्णुरेतद्भुवनमजनयत्तन्न जानीथ यूयं युष्माकं ह्यन्तरस्थं किमपि तदपरं विद्यते विष्णुरूपं । नीहारप्रख्य-मायापरिवृतमनसो मोहिता नामरूपैः प्राणप्रीत्यैकतृप्ताश्चरथ मखपरा हन्त नेच्छामुकुन्दे” । इति च वदत्सु परमभागवतेषु च मुक्तः । अपि च अनवसितार्थपरिपाटीभिरनर्थिकाभिर्वाग्भिर्गुम्भितोयमान्तरार्थ इति यदुक्तं तत्र अवसितार्थपरिपाट्यस्सार्थिका वाचः काः । वद सखे । श्रीवाल्मीकिरामायणस्य सर्वजनविदितबाह्यार्थविषया वाच एवेति चेत् दशरथाहल्यायोध्याशतानन्दगुहविराधकिष्किन्धासंपातिदशाननकुंभकर्णविभीषणादीनां सर्वेषामादिकाव्योक्तपदानामभिधानार्थमुक्त्वा बाह्यार्थविषयाणां वाचामवसितार्थपरिपाटीत्वं सार्थकत्वञ्च वक्तव्यं । सखे सीताविवाहात् पूर्वं शैवकोदण्डानयने तद्धनुर्मञ्जूषा अष्टचक्रेति तद्वाहकाः पुरुषाः पञ्चसहस्रमिति चोक्तं । तत्र भवन्मते मञ्जूषा अष्टचक्रेति पञ्चसहस्रसंख्याः पुरुषा वाहका इति च कथमवसितार्थपरिपाटीत्वमागतं ब्रूहि सखे । मञ्जूषायाः अष्टचक्रघटितत्वादतिमात्रं गरीयस्त्वाच्चेति तवान्ते शरणं न त्वनवसितार्थपरिपाटीत्वं । अस्मदभिमतान्तरार्थे तु जगत्यस्मिन् सर्वन्त्रैगुण्यविषयं खलु शैवन्धनुः । तन्निक्षेपात्मकजगन्मञ्जूषायाः “भूमिरापोनलो वायुः खं मनो बुद्धिरेव च । अ-

हंकार इतीयम्मे भिन्ना प्रकृतिरष्टधे" ति गीतावचनप्रमाणेन कोदण्डनिक्षेपमञ्जूषा अष्टचक्रेति शब्दादिपञ्चविषयात्मक-त्रैगुण्यविषयकोदण्डानयने वृत्तिभेदेन सहस्रधा भिन्नानि श्रोत्रादिज्ञानेन्द्रियाण्येव नृणां शतानि पञ्चाशदिति च स-मीचीनमेवावसितार्थपरिपाटीत्वं सार्थकत्वञ्च । आन्तरा-र्थमनादृत्य बाह्यार्थस्यैव सत्यतां मन्वानानामार्याणां वाच एवानवसितार्थपरिपाट्यः अनर्थिकाश्च । किं बहुना । अ-स्मदुक्तान्तरार्थप्रत्यर्थिनिकरनिराकरणाय। राममिन्दीवरश्या-मं राजीवायतलोचनं । ज्याघोषनिर्जितारातिं जानकीरमणं भजे । अनेन भजनेनैव सर्वमनाविलमित्याशासे सर्वे-षां मंगळम् ॥



समाप्तेयं वाल्मीकिरामायणान्तरार्थदीपिका ॥



कल्लिक्कोट्टै तळि श्रीभागवतपौराणिकः । अप्यात्तुरैशास्त्री ॥



...व्यपुस्तकसूची